1034

3 E 5

॥ द्राह्यायणश्रौतसूत्रम् ॥

THE

ŚRAUTA-SŪTRA OF DRĀHYĀYAṆA,

WITH THE

COMMENTARY OF DHANVIN.

INDIAN INSTITUTE 3E5

EDITED BY

J. N. REUTER, Ph.D., LL.D.,

LECTURER OF SANSKRIT IN THE UNIVERSITY OF HELSINGFORS.

PART I.

[*REPRINTED FROM THE "ACTA SOCIETATIS SCIENTIARUM FENNICÆ," T. XXV, PARS II.*]

LONDON:

LUZAC & CO. (OPPOSITE THE BRITISH MUSEUM).

1904.

PRELIMINARY NOTICE.

THE SRAUTA-SŪTRA OF DRĀHYĀYAṆA, belonging to the Sāma-Veda, consists of 31 Paṭalas, each divided, as a rule, into 4 Khaṇḍas; three Paṭalas form one Adhyāya. It is closely allied to the Srauta-Sūtra of Lāṭyāyana (edited by Ānandacandra Vedāntavāgīśa in the Bibliotheca Indica). The majority of the Sūtras are, indeed, identical with those of Lāṭyāyana, and in many cases only the distribution of the text on various Sūtras is different in the two works. On the other hand, there are many more discrepancies than would appear from the edition of Lāṭyāyana's Sūtras. The present text is accompanied by the complete Commentary of Dhanvin, compiled from fragments in various MSS. It is entirely independent of Agnisvāmin's Commentary on the Sūtras of Lāṭyāyana, and both will, I trust, be found to form useful complements to one another whenever the two Sūtra texts agree. Dhanvin's Commentary claims, besides, a special interest on account of its having been extensively used, as will be set forth fully in the Introduction to the present edition, by Sāyaṇa in compiling his Commentary on the Pañcaviṁśa-Brāhmaṇa and the Ṣaḍviṁśa-Brāhmaṇa.

The work will appear in the *Acta Societatis Scientiarum Fennicæ*, but a limited supply of copies will be published beforehand in three Parts of about 200 to 240 pages each. The concluding Part will contain an Introduction and Indices.

Whilst reserving for the Introduction a full discussion of the manuscripts used by me in preparing this edition, I subjoin here a list of them, together with the letters with which they are designated in the critical notes:—

(1) DEVANĀGARĪ MSS.

TD. Text only. Complete. India Office, Colebrooke Coll., No. 363*b*.
D. Text and Commentary. Paṭala 1–11. Do., No. 363*a*.
W. Text and Comm. Paṭ. 12–15, 4, 9. Bodleyan, Wilson Coll., No. 388. (Written by the same scribe as D.)
C. Text and Comm. Complete. Calcutta Sanskrit College, No. 259. (In reality two distinctly different MSS., supplementing each other.)
Ca. Text and Comm. Paṭ. 16–31. Do., No. 263.
Cb. Text and Comm. Paṭ. 16–31. Do., No. 261.
B. Text and Comm. Paṭ. 16–31. Benares.
Ch. Text and Comm. Paṭ. 26–31. Berlin, Chambers No. 551.
R 1 and R 2. Text. Paṭ. 1–7, with Rudraskanda's Audgātrasārasaṁgraha. Bodleyan, Wilson, Nos. 398 and 403.

(2) GRANTHA MSS.

TG. Text only. Complete. India Office, Burnell Coll., No. 152.
Tg. Text only. Paṭ. 1–7. Do., No. 73.
G. Text and Comm. Paṭ. 1–21. Do., No. 187.

J. N. REUTER.

HELSINGFORS, *November*, 1904.

॥ श्रीगणेशाय नमः ॥ ॥ श्रीरामचन्द्राय नमः ॥[1]

ओमिति ब्रह्मपरमं प्रपद्ये पुरुषोत्तमं ।
छन्दोगसूत्रं व्याचष्टे धन्वी गूढार्थमञ्जसा[2] ॥

अथ भगवान्सूत्रकारः प्रथमं तावत्परिभाषां करोति ॥

अथातो विध्यव्यपदेशे सर्वक्रत्वधिकारः ॥ १ ॥

अथात इति पदद्वयं वाक्योपक्रमे लोकवेदयोर्दृष्टं । यथा वाक्यसमाप्ताविति शब्दः । तद्यथा । "अथातोऽनन्ता[3] द्वादशाहाः" इति प्रतिदिशन्ति । "अथातः सामान्तानां"[4] । "अथातः संहितोपनिषदः"[5] इत्यादि[6] । आनन्तर्यहेत्वर्थता तु वाक्यस्य परिभाषापरत्वान्न संभवति ॥ विधानं[7] विधिः ॥ विशेषकथनं व्यपदेशः । तदभावोऽव्यपदेशः । तदयमर्थः । विधौ विशेषाकथने[8] सर्वक्रतूनां तत्राधिकार इति । वक्ष्यति । "ऋत्विगार्षेयोऽनूचानः"[a] इत्यादि तत्[9] सर्वक्रतुसाधारणमिति ॥ केचित्तत्राहुः । अनारभ्याधीतानां[10] "मह्यन्मे वोचः"[b] इत्यादि यजुषां तिसृभ्यो हिङ्करोतीत्यादि[c] विष्टुतीनां सुब्रह्मण्यायाः प्रायश्चित्तानां च सर्वक्रत्वर्थताऽनेन सूत्रेणोच्यत इति ॥ तदयुक्तं । यद्युपदेशादेव सर्वक्रत्वर्थत्वमुच्यते[11] ' तर्हि न्यायविरुद्धं प्रकृतौ वा द्विरुक्तत्वादिति[12] हि[13] न्यायविदः[13] । किं च । उपदेशादेव[13] सर्वार्थत्वे सति ' ऊहो न स्यात् ' अतिदेशपूर्वकत्वादूहस्य[14] । ततः को दोषः । "यजमानशब्दं सर्वत्र यथार्थं कुर्युः"[d] इत्याद्यूहव्यवहारो न स्यात् । तस्मादुपदेशतः[15]

[1] Thus D; TD has only the adoration of Gaṇeça, while C has श्रीगणेशाय नमः । श्रीसरस्वत्यै (!) नमः । The Grantha MSS. om. the adoration. [2] गूटर्थं° G. [3] G om. [4] सामन्तानां G. [5] संहिताया उपनिषद D, G. [6] उपनिषदित्यादि G. [7] D om. [8] विशेषक° G. [9] तु D. [10] °धिकानां D. [11] °क्रत्वर्थमु° G. [12] द्विरुचत्वा° G. [13] C om.; in D there is a lacune marked with some horizontal lines, the words हि — उपदेशादेव missing. [14] °पूषणत्वादू° G. [15] C reads here: कुर्युरिति । तस्मादुप°; D has a lacune: कुर्यु · · · · तस्मादुप°.

[a] 1, 1, 7. [b] 1, 1, 10. [c] PV. Br. 2, 1, 1, etc. [d] 3, 2, 8.

सर्वार्थत्वमित्युक्तं । अथोच्यते । प्रकृतावुपदेशाद्भवति विकृतावतिदेशादित्येवं[1] सर्वार्थत्वमिति । तर्हि यजुर्विष्टुतिसुब्रह्मण्याप्रायश्चित्तानां सर्वक्रत्वर्थत्वं[2] न वक्तव्यं । अन्येषाम् "उपास्मै गायता नरः"[a] इत्यादि स्तोत्रीयाणां रौरवयौधाजयादि[3] साम्नां च तेनैव न्यायेन सर्वार्थत्वात् । तस्मात्सूत्रकारः[4] सुव्यवहाराय[5] परिभाषां करोतीति मन्तव्यमिति ॥

मन्त्रविधिश्चादिग्रहणेन ॥ २ ॥

चकारः परिभाषासमुच्चयार्थः ॥ आदिग्रहणेन कृत्स्नस्य मन्त्रस्य विधिः । न[6] पुनरुपात्तमात्रस्येत्येतच्च बोद्धव्यमिति[7] ॥

यद्येवं मन्त्रावसानं वक्तव्यं । अत आह ॥

उत्तरादिः[8] पूर्वान्तलक्षणम्[9] ॥ ३ ॥

उत्तरमन्त्रस्यादिग्रहणं पूर्वमन्त्रस्यावसानलक्षणं[10] वेदितव्यमिति ॥

एकश्रुतिविधानान्मन्त्रान्[11] कर्माणि[12] चोद्गातैव कुर्यादनादेशे ॥ ४ ॥

"महन्मे वोचः" इत्यादिमन्त्रान् कर्माणि च सामवेदोक्तान्युद्गातैवानादेशे कुर्यात् ॥ एकश्रुतिविधानादिति[13] । एकवचननिर्देशे[14] विधाने सतीत्यर्थः ॥ केचित्तु 'एकश्रुतिविधानान्मन्त्रानिति सूत्रं विभक्तमन्त्राणामैकश्रुत्यं[15] विधत्त इत्याहुः । एकश्रुतिविधानानेकश्रुतिप्रयोगान्मन्त्रान् कुर्यादिति[b] ॥ तदयुक्तं । जपादिष्विति[16] प्रसङ्गेन सूत्रस्यापूर्णत्वात् । "यज्ञकर्मण्यजपन्यूङ्खसामसु"[c] इति पाणिनिस्मृत्या[17] पूर्वोक्तया[18] सिद्धत्वाच्चेति ॥

यावद्यजुरनादिष्टान्तान्मन्त्रान् ॥ ५ ॥

उत्तरादिः पूर्वान्तलक्षणमित्युक्तं । येषु[19] तल्लक्षणं न संभवति[20] । उत्तरमन्त्राभावात्

[1] विकृताविति वेदशास्त्रादित्येवं G. [2] G reads: °श्चित्तानां विशेषतः तं तं न व°; D has a lacune: सुब्रह्मण्या . . . . वक्तव्यं । [3] °यौधज° C. [4] C om. सूत्रकारः; D has तस्मा . . . . करोतीति म°. [5] C om. [6] G om. [7] बोधितव्यं D. [8] उत्तरादि TG. [9] लक्षणमित्यादि D. [10] °वसानस्य ल° D; °लक्षणां G. [11] विधाना म° TG. [12] कर्मणि Tg. [13] विधानात् । D. [14] °निर्देशेन C. [15] विभक्तं मन्त्रा° C. [16] व्यापादिष्विति G. [17] °श्रुत्या D. [18] पूर्वोक्ता । D. [19] एषु G. [20] G om. सं.

[a] Cp. 21, 1, 33 sqq. [b] Thus Rudraskanda in his Comm. (Audgātrasārasaṃgraha) on this Sūtra.

[c] Pāṇ. 1, 2, 34.

केवलमुत्तरेण ब्राह्मणेन सह प्रश्लेषपठितत्वात्[1]।ताननादिष्टान्तान्मन्त्रान्यावद्यजुः[2] प्रतीयात्। यावदेकार्थप्रतिपादकं पदजातं तावत्परिमाणान् प्रतीयादित्यर्थः॥ किमुदाहरणं। औदुम्बर्युच्छ्रयणे सूत्रं। "अध्वर्युणा सहोच्छ्रयेद्दक्षिणोत्तरोत्तानाभ्यां पाणिभ्यां द्युतानस्त्वेति"[a]। अत्र "दृंह पृथिवीं तामन्वरभत"[b] इति मन्त्रान्तः। ब्राह्मणं च प्रश्लेषपठितं। तत्र ब्राह्मणेनैकवाक्यतायोगात् "दृंह पृथिवीम्" इति मन्त्रान्त इति। यथा "काम्याऽसीत्यनुमन्त्र्य दक्षिणे वाऽस्याः[3] कर्णे[4] जपित्वा"[c] इति चोदाहरणमिति॥

ऋचश्चादिग्रहणेन॥ ६॥

अनादिष्टान्तास्वृक्षु यद्यपि क्वचिन्मध्ये[5] वाक्यसमाप्तिः स्यात्[6] तथा[7]ऽप्यादिग्रहणेन कृत्स्ना एवर्चः[8] प्रतीयात्। यथा "शं नो देवीरित्यप उपस्पृश्य"[d] इत्यादौ। अत्र "शं नो देवीरभिष्टये" इति प्रतिपादकमवान्तरवाक्यसमाप्तिर्भवति। तत्र प्रथमपादमात्रस्य ग्रहणं प्राप्तमनेन सूत्रेणापोद्यत इति। एवं परिभाषा कृता॥ अथेदानीमृत्विग्लक्षणमाह॥

ऋत्विगार्षेयो[9]ऽनूचानः साधुचरणो वाग्म्यन्यूनाङ्गो[10]ऽनतिरिक्ताङ्गो द्वयसतश्चानतिकृष्णो[11]ऽनतिश्वेतः॥ ७॥

ऋषिर्बहुश्रुतः। "एष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान्" इति तैत्तिरीयब्राह्मणं[12][e]। तेन ऋषेर्बहुश्रुतस्यापत्यमार्षेयः॥ अनूचानः कल्पसूत्राध्यायीति बोधायनः[13]॥ साधुचरणः साधुवृत्तः॥ वाग्मी[14] प्रशस्तवाक्॥ अन्यूनाङ्गः चतुरङ्गुलादिप्रतिषेधः॥ अनतिरिक्ताङ्ग इति षडङ्गुलादिप्रतिषेधः॥ द्वयसतश्चेति[15]। द्वयसं परिमाणं। "प्रमाणे द्वयसच्" इति[16] पाणिनिस्मृतेः[f]। द्वयसत इति पञ्चम्यास्तसिल्प्रत्ययः[g]। तेनायमर्थः। पुरुषलक्षणं शास्त्रसिद्धं। यदङ्गप्रत्यङ्गपरिमाणं ततोऽप्यन्यूनाङ्गोऽनतिरिक्ताङ्ग इति। ननु च। "प्रत्ययः परस्य" इति पाणिनिस्मृतेः[17][h] केवलस्य द्वयसच्प्रत्ययस्य[18] प्रयोगो नोपपद्यते। नैवं। परस्येति

[1] °पतत्वात् G. [2] °व्यजुश्च G. [3] स्युः। G. [4] C inserts here गोनामानि.
[5] G puts क्वचित् twice. [6] स्यां C. [7] तदा G. [8] कृत्स्न एकर्चं G. [9] त्वंगायो TG.
[10] वाङ्म्य° TD; वागमयनीनांगो TG. [11] द्विसत° R. [12] तैत्तरी° C. [13] बौधायनः C.
[14] D corr. to वाङ्मी. [15] तद्द्वयस° G. [16] द्वयसमिति G. [17] °सूत्रं D. [18] द्वयसच° D.

[a] 2, 3, 3. [b] PV. Br. 6, 4, 2. 3. [c] 26, 2, 8. [d] 13, 3, 12. [e] Taitt. Saṁh. 6, 6, 1, 4.
[f] Pāṇ. 5, 2, 37. [g] Cp. Pāṇ. 5, 3, 7. [h] Pāṇ. 3, 1, 1. 2.

सूत्रमधिकृत्य महावार्त्तिककारेणोक्तं[1]। इयसजादीनां[2] केवलप्रत्ययप्रयोगस्य[3] दृष्टत्वात्[a]। तद्वदेवान्येषामपि प्रत्ययानां केवलप्रयोगप्रसङ्गे प्रयोगनियमार्थं परश्चेति सूत्रमिति। तेन इयसजादीनां केवलप्रयोगः। कण्ठेनैव[4] शब्दविद्भिः साधुत्वेनोक्त इति न कश्चिद्दोष इति॥ केचित्तु ' अइयषत इति नञ्प्रश्लेषेण पदविच्छेदं[5] कृत्वा षण्ढनिषेधो[6] ऽयमित्याहुः। तदयुक्तं। इयषत इति षण्ढे[7] प्रयोगाभावात्[8]। अन्यूनाङ्ग इत्यनेनैव षण्ढनिवृत्तिसिद्धेः[9]। चकारोऽपि तत्पचे निरर्थक इति॥

याज्यश्च प्रथमैस्त्रिभिर्गुणैर्व्याख्यातः[10] ॥ ८ ॥

प्रथमैरार्षेयादिभिस्त्रिभिर्गुणैर्युक्त[11] एव याज्यः स्यात्। नान्यः। तावन्मात्रमेव च तस्यापेचितं[12]। न वाग्मित्वादिकमिति[13]॥

सोमप्रवाकमकरिष्यन् "नमः[14] सोमाय राज्ञे"[15] इत्युक्त्वा प्रत्याचक्षीत ॥ ९ ॥

असौ सोमेन यजते स त्वामार्त्विज्यमभ्यर्थयत इति यो वक्ति ' स सोमप्रवाकः। तेनैवमुक्तो यद्यार्त्विज्यमकरिष्यन् स्यात् ' तदा सोमं नमस्कृत्य सोमप्रवाकं प्रत्याचचीत। नास्ति मे श्रद्धा। अन्यो वरणीय इति। प्रत्याख्यानदोषशान्त्यर्थो नमस्कारः। श्रूयते हि प्रत्याख्याने दोषः। "यशसा वा एषोऽभ्येति य आर्त्विज्येन ' तं यः प्रतिरुन्धेत् ' यशः स प्रतिरुन्धेत्"[b] इति॥

"महन्मे[16] ऽवोचः"[c] इति करिष्यन् प्रतिमन्त्रयेत ॥ १० ॥

आर्त्विज्यं करिष्यन् "महन्मे वोचः" इति सोमप्रवाकमभिमन्त्रयेतेति॥

तन्न जह्यादप्रोक्ते[17] ऽपि करिष्यामीति विदित्वा ॥ ११ ॥

सोमप्रवाकेणाप्रोक्तेऽपि सोमे करिष्याम्यार्त्विज्यमिति निश्चित्य "महन्मेऽवोचः" इति

[1] महापाश्चिकका° G. [2] इयसजानां G. [3] G om. प्रत्यय. [4] कर्णेनैव G; कंडेणैनैव D. [5] पदच्छेदं G. [6] षंड° C, D; एष स निषेधो (!) G. [7] षंडे D. [8] प्रत्ययप्रयोगा° D. [9] °सिद्धेस C. [10] °र्गणैर्वाक्योस् TG. [11] D om. त्रिभिः. [12] चा तस्या° D; afterwards corr. to वचनस्या°. [13] वाग्मीत्यादिकमवति G. [14] प्रवाकः क° TG. [15] राज्ञा Tg. [16] महन्मै TG. [17] न तज्जुह्यात् प्रोक्ते TG; तं न ज° G.

[a] Cp. Pat. Bh. 6 to Pāṇ. 3, 1, 2. [b] Ait. Br. 6, 34, 4. [c] PY. Br. 1, 1, 1.

मन्त्रं न जह्यात्। ब्रूयादेवेत्यर्थः ॥ ननु च। सोमं वक्तुमागतः सोमप्रवाकः कथमनुक्त्वा तिष्ठेत्। उच्यते। पूर्वमेवोद्गात्रा ज्ञातमिति[1] कृत्वा स्मरणाय केवलं तिष्ठेदपीति न दोषः ॥ ननु च। सोमप्रवाकेणानुक्ते सोमे मन्त्रत्याग एव युक्तः[2]। "महन्मेऽवोचः" इति मन्त्रार्थाभावात्। नैवं। सोमप्रवाकस्यागमनादेव सोमः प्रोक्तो भवतीति[3]। "महन्मेऽवोचः" इत्युपपन्नमेव मन्त्रलिङ्गमिति मन्यते[4] ॥

आवसथं सोमप्रवाकाय लवणमन्नं दध्याहारयेत्[5] ॥ १२ ॥

यत्रातिथीन्वासयति स आवसथः। तं प्रति सोमप्रवाकाय लवणसंसृष्टमन्नं[6] दधियुक्तमाहारयेदिति ॥

प्रहिणुयात्[7] प्रस्तोतृसुब्रह्मण्यौ[8] पुरस्तात्कर्मभ्यः ॥ १३ ॥

औदुम्बरीसंमानादेः स्वकर्मणः[9] पुरस्ताद्यानि यानि[10] कर्माण्याह्वानादीनि[11]। तदर्थं प्रस्तोतृसुब्रह्मण्यौ यजमानाय प्रहिणुयादिति ॥

अथोद्गातुर्देवयजनप्रतिगमनकालं[12] विधास्यन्देवयजनलक्षणमाह[13] ॥

प्रागुदक्प्रवणं देवयजनं लोमशं[14] समम् ॥ १४ ॥

उत्तरपूर्वो देशः प्रवणो निम्नो यस्य। तत्प्रागुदक्प्रवणं ॥ लोमशं बहुलौषधियुक्तं। अनूषरमित्यर्थः ॥ ननु च। अध्वर्युप्रत्ययं देवयजनं। किमत्र विधीयते। उच्यते ब्राह्मणे[15] तावदध्वर्युप्रत्ययमपि देवयजनं प्रसङ्गाद्विहितं। तत्र[16] दुर्ज्ञानमिति व्याख्यानाय सूत्रकारः प्रवृत्त इति न दोष इति ॥

[1] ज्ञातमिति C. [2] युक्तं G. [3] निवर्त्ततीति D. [4] C om. [5] °हरयेत् TG.
[6] °संसृष्ट° G. [7] प्रहिणुयादिति। G. [8] °सुब्रह्मण्या TG. [9] स्वाकर्मणः D; सर्वकर्मणः G.
[10] C om. [11] कर्माणिसुब्रह्मण्याह्वानादीनि C. [12] C om. प्रति. [13] °लक्षण° C.
[14] लोमशमवृत्तं R 1, TD, and, *secunda manu*, D. Since neither Dhanviṇ nor Rudraskanda, in his Audgātrasārasaṁgraha, explain अवृत्तं, and as Dhanvin's Comm. to S. 1, 1, 21 does not mention the reverse of अवृत्त, this word is, probably, here inserted in congruity with the parallel S. in Lāṭy. (1, 1, 14). [15] ब्राह्मणं G. [16] तच्च C.

पुरस्ताच्चास्यापः स्युः ॥ १५ ॥

अस्य देवयजनस्य पुरस्तादापश्च भवेयुः[1]। नदी वा तटाको[2] वा ॥ तच्च प्रमाणमात्रं ॥

"त्रिषुक्रियम्" इति[3] ह्याह[4] ॥ १६ ॥

"यस्य[5] पुरस्तात् त्रीणि ज्योतींषि दृश्येरन्। अग्निराप आदित्यः। तत्त्रिशुक्रियं देवयजनम्"[a] इति ब्राह्मणं[6]। तच्चापामेव विधायकं। अग्न्यादित्ययोर्विधिमन्तरेणापि सिद्धेः। अग्निराहवनीय आदित्यश्च द्वावपि नित्यमेव देवयजनस्य पुरस्तात् स्थितावेव। तेन[7] प्राप्ताप्राप्तविवेकेनापामेवायं विधिरिति सूत्रकारेण व्याख्यातमित्यनुसंधेयमिति ॥

तदभावे महावृक्ष उदपानो महापथो[8] वा ॥ १७ ॥

अपामभावे पुरस्तान्महावृक्षो[9] न्यग्रोधादिर्भवेत्[10]। तथा च श्रुतिः। "पुरस्ताच्चित्रं देवयजनम्"[a] इति। चित्रः। चित्रियो वनस्पतिरुक्तः ॥ उदपानः कूपः ॥ महापथः प्रसिद्ध इति ॥

न चास्य स्थलतरमदूरे[11] स्यात् ॥ १८ ॥

अस्य देवयजनस्य समीपे स्थलतरमत्युन्नतप्रदेशो न स्यात्। किं तु। देवयजनमेव समीपप्रदेशादुन्नतं[12] स्यादित्यर्थः। तथा च श्रुतिः। "यदुन्नतं भूम्या अनूषरम्"[a] इति ॥

देवयजनमात्रं च पुरस्तात् ॥ १९ ॥

अदूरे न स्यादित्यनुवर्तते। अस्य देवयजनस्य पुरस्ताददूरे समीपे शम्यानिपातादर्वाग्देवयजनाय[13] पर्याप्तो योग्यः प्रदेशो न भवेदित्यर्थः। तथा च श्रुतिः। "तस्य न पुरस्ताद्देवयजनमात्रमतिशिष्याद्यावच्छम्याप्रासः"[a] इति ॥

[1] G reads: अस्य देवयजनस्य समीपे स्थलतरमत्युन्नतं भवेयुः।; Cp. Comm. to S. 18.
[2] तडागो C. [3] त्रिश्शु° TG; त्रिशुक्रियमितीति C. [4] ह्याह G; ह्याहा Tg. [5] यत्र D, G.
[6] तद्देवयजनं वं त्रिशुक्रियमिति ब्रा° G; तद्देवयजन (!) तत्त्रिशुक्रियं देवय° C. [7] न G.
[8] °पन्थो G. [9] °वृक्षं G, C. [10] °धादिभिर्भवेत् D. [11] °दूदेर G. [12] देवयजनप्रदेशादुन्नतं C. [13] निपातनादर्वाग्दे° G.

[a] ṢV. Br. 2, 10.

विपर्यस्याभिचरणीयेषु ॥ २० ॥

अभिचारार्थेषु क्रतुषु[1] यथोक्तं देवयजनलक्षणं विपर्यस्य कुर्यादिति । किं सर्वमेव विपर्यस्येत् । नेत्याह ॥

स्थलादन्यद्देवयनमात्राच्च[2] ॥ २१ ॥

"न चास्य स्थलतरम्" इति सूत्रद्वयेन यल्लक्षणद्वयमुक्तं । ततोऽन्यत्सर्वं देवयजनलक्षणं विपर्यस्येत्[3] । तत्तु लक्षणद्वयं[4] सर्वं समानमेवेति । तेन दक्षिणप्रत्यक्प्रवणमूषरं[5] विषमं च पुरस्ताज्जलशून्यत्वाभिचरणीयेषु[6] देवयजनमिति ॥

स्वयं व्रजेत् क्रय उपवसथ्ये[7] वा ॥ २२ ॥

सोमक्रयदिवसे सुत्यायाः पूर्वदिवसे वा स्वयमेव देवयजनं गच्छेत् । न पुरुषान्तरं प्रहिणुयादित्यर्थः ॥ अत्र "यदुद्गातौदुम्बरीं प्रथमेन कर्मणाऽन्वारभते"[8a] इति श्रुतेरौपवसथ्ये एव गमनं । ततः पूर्वकर्माभावादिति गम्यते । "तानूनप्त्रमवमृशन्तो जपेयुः"[b] इति विधानात्तानूनप्त्रावमर्शनार्थं[9] सोमक्रयदिवसे गमनमिति गम्यते । तेन विकल्पः । औपवसथ्यगमनपक्षे[10] तानूनप्त्रावमर्शनादीनां निवृत्तिः ॥

उदङ्ङेव तु गृहेभ्यः प्रथमं "देवो देवमेतु"[c] इति ॥ २३ ॥

स्वगृहेभ्यो निर्गच्छन्नुद्गाता प्रथममुदङ्ङेव गच्छेत् । यद्यपि स्वगृहस्य दक्षिणतो देवयजनं स्यात् । तथाऽपि कतिपयानि पदान्यदृष्टार्थमुदङ्मुखो[11] गच्छेदित्यर्थः[12] ॥

दूरं व्रजित्वा[13] "विहाय दौष्कृत्यम्"[14d] इति ॥ २४ ॥

यदि दूरमध्वानं व्रजेत् । तदानीं प्रयतदेशाभिक्रमाद्यवर्जनीयं[15] स्यात् । ततो यत्किं-

[1] अभिचारार्थक्रतुषु G. [2] स्थालद° Tg. [3] विपर्यस्य कुर्यात् G. [4] इति तल्लक्ष° G. [5] दक्षिणाप्र° D. [6] °शून्यस्याभि° G. [7] औपव° G, TG. [8] °भ्यत MSS. [9] °नार्था G. [10] °थ्यागमन° G. [11] G om. पदानि. [12] C reads: °दङ्मुख एव गत्वा प [· · · ·] नाभिमुखो भवेदिति । [13] प्रव्रजित्वा Tg. [14] दुष्कृत्यं Tg. [15] °देशाद्यभिक्रमणादवर्जं° G.

[a] PV. Br. 6, 4, 1. [b] 14, 2, 3. [c] PV. Br. 1, 1, 2. [d] PV. Br. 1, 1, 3.

चिद्दुष्कृतमवश्यं भवेत्। तच्छान्तये[1] "विहाय दौष्कृत्यम्" इति जपेत्। केचिद्दूरमध्वानमर्धाधिकं[2] गत्वा मन्त्रं जपेन्नित्य इत्याहुरिति[a] ॥

"बह्वानामा[3]ऽसि"[b] इति पन्थानमापद्योत्तरं[4] वेद्यन्तमाक्रम्य दक्षिणामीक्षमाणः "पितरो भूः"[c] इति ॥ २५ ॥

"बह्वानामा[5]ऽसि" इति[6] देवयजनस्यासाधारणं पन्थानमासाद्य[7]। उत्तरं महावेदिपार्श्वमाक्रम्य तत्रैव स्थित्वा दक्षिणं वेद्यन्तमीक्षमाणः[8] "पितरो भूः" इत्युपतिष्ठेतेति[9] ॥

यजुरन्तरये[10]ऽन्वाहारं धानंजय्यः ॥ २६ ॥

सर्वत्र यजुषो मन्त्रस्य प्रमादादन्तरये[11] भ्रेषे[12] सति यदा पश्चात् स्मरति। तदा तस्य पुनःप्रयोगं कुर्यान्मन्त्रोच्चारणजन्यादृष्टसिद्ध्यर्थमिति[13] धानंजय्यः ॥

उपेक्षणं शाण्डिल्यः[14] ॥ २७ ॥

उपेक्षणमेव कार्यं न पुनःप्रयोगः। मन्त्रस्यानुष्ठेयार्थप्रकाशनार्थत्वात्[15]। कृते कर्मणि तत्प्रकाशनस्यानपेक्षितत्वादिति शाण्डिल्यः। करणमन्त्रविषयमेतत् सूत्रद्वयं। ये पुनरनुष्ठिते कर्मणि फलप्रार्थनारूपाः "स्तुतस्य स्तुतमसि" इत्यादयो[d] मन्त्राः। तेषां पुनःप्रयोगो भवत्येवेत्याहुरिति ॥

प्रथमः खण्डः ॥ १ ॥

[1] C reads: तदानीमप्रत्ययतदेश [· · · ·] वर्जनीयं स्यात्ततो यत्किंचिद्दुष्कृतमवश्[यंभ]वेत्। तच्छांतये; the text in C is somewhat effaced. D and G have a different reading, both omitting स्यात् ततो यत् and अवश्यं भवेत्. [2] °ध्वानमध्वाधिकं D. [3] पह्वानामा G. [4] पन्थनमा° Tg. [5] पह्वानामा G. [6] बह्वानामेति D. [7] °मापद्य D. [8] G om. वेद्यन्तं. [9] उपतिष्ठतेति G. [10] °रन्तरे Tg; °रन्तराये TG; °रत्यये G. [11] °न्तराये G. [12] भ्रेषे D. [13] °च्चारणाज° D; °च्चरणज° C. [14] सांडिल्यः TD. [15] °ष्ठेयार्थं प्रका° D.

[a] Thus Rudraskanda. [b] PV. Br. 1, 1, 4. [c] PV. Br. 1, 1, 5. [d] Cf. 5, 2, 19.

अर्हयिष्यन्त[1] आहरन्ति विष्टरौ पाद्यमर्घ्यमाचमनीयं[2] मधुपर्कमिति[3] ॥ १ ॥

अर्हणा पूजा। उद्गातुरागतस्य पूजां करिष्यन्तो यजमानपुरुषा विष्टरद्वयं पाद्यादिकं चान्वाहरेयुरिति[4] ॥

तेषामेकैकशस्त्रिर्वचनम्[5] ॥ २ ॥

तेषां विष्टरादीनामाहृतानां प्रत्येकं त्रिस्त्रिर्वचनमावेदनाय[6] कार्यं यजमानेन। विष्टरो[7] विष्टरो[7] विष्टराविति[8]। एवं पाद्यादेरपीति ॥

गौश्च[9] ॥ ३ ॥

मधुपर्काङ्गभूताया गोरपि त्रिर्वचनं कार्यं, गौर्गौर्गौरिति[10]। अत एव विधेर्गौरप्याहरणीया मधुपर्कार्थेति गम्यते। तदाहरणं च मधुपर्कोत्तरकालमेव। न विष्टराद्याहरणसमकाले[11], तैः सह पाठाभावात्, गौश्चेति[12] पृथक्सूत्रकारणाच्चेति[13] मन्तव्यमिति ॥

विष्टरयोरेकमध्यास्ते धौतौ पादावितरस्मिन् ॥ ४ ॥

विष्टरयोः पीठयोरेकस्मिन्नुद्गातास्ते[14]। इतरस्मिन् पीठे स्वस्य पादौ यजमानेन धौतौ[15] प्रक्षालितौ निदध्यात्। अत्र धौतौ पादाविति पाद्यविनियोग[16] उक्तः। अर्घ्यस्य विनियोगाभावेऽप्याहरणविधानादेव[17] विनियोगः कल्प्यः[18]। स चाञ्जलावेकदेशमानयेदिति[19][a] शास्त्रान्तरानुसारेण द्रष्टव्य इति[20] ॥

पृथक् सावित्रीपादैर्मधुपर्कस्य पिबेत् ॥ ५ ॥

निवेदितस्य मधुपर्कस्यैकदेशं सावित्र्यास्त्रिभिः पादैः पृथगेव प्रतिपादं पिबेदिति ॥

[1] अर्हइष्यन्त Tg; °ष्यत D. [2] °चपनीय TG; °चनीयं G. [3] मधुपर्क्क इति G, Tg. [4] चाहरेयुरिति G. [5] तोषामोकैकग्रस्त्रिव° Tg; °स्त्रिव° TG. [6] G has त्रिः once only. [7] C om. [8] विष्टरा इविति C. [9] गौश्च D, R. [10] C has गौः twice only. [11] °हरणस्य समकालं G. [12] गौश्चेति C, D. [13] °करणा° C, G. [14] पिठयो° C. [15] धौत्वा D; यजमानधौतौ C. [16] पाद्यनियोग G. [17] प्याहरणीयवि° G. [18] कल्प: D. [19] °वेकस्मिन्देशमा° G. [20] द्रष्टव्यमिति G.

[a] Cp. Āp. Gṛ. 13, 8; Āśv. Gṛ. 1, 24, 13.

"इदमन्नमयं रस इमा गावः सह श्रिया" इति तु[1] पुरस्तादेकैकस्य[2] ॥ ६ ॥

एकैकस्य सावित्रीपादस्य पुरस्तादिदमन्नमयमिति मन्त्रं मधुपर्काभिमन्त्रणं[3] जपेत् । तुशब्दो विशेषद्योतनार्थः । कथं । वक्ष्यमाणाः प्रतिपादमुपरिष्टान्मन्त्राः पृथगेव स्युः । अयं त्वभिमन्त्रणमर्वसाधारण[4] इति ॥

"वाग्बहु बहु मे भूयात्" इति प्रथमस्योपरिष्टात् ॥ ७ ॥

प्रथमस्य सावित्रीपादस्योपरिष्टाद्वाग्बहु बहु मे भूयादिति मन्त्रं प्रक्षिपेदिति ॥

"प्राणो वै वाचो भूयान्बहुर्मे[5] भूयो भूयात्" इति द्वितीयस्य ॥ ८ ॥

द्वितीयस्य[6] सावित्रीपादस्योपरिष्टात् प्राण इत्यादिमन्त्रं प्रक्षिपेदिति ॥

"मनो वाव सर्वं सर्वं मे भूयात्" इति तृतीयस्य ॥ ९ ॥

तृतीयस्य सावित्रीपादस्योपरिष्टान्मनो वावेति[7] मन्त्रं प्रक्षिपेदिति ॥ तदेव त्रयः पानमन्त्राः ॥

प्रतिमन्त्रणमन्ते स्वाहाकारः कार्य इत्याह ॥

सर्वे स्वाहाकारान्ताः[8] ॥ १० ॥

अयं मन्त्रः प्रथमो मन्त्रः । "इदमन्नमयं रस इमा गावः सह श्रिया । तत्सवितुर्वरेण्यं वाग्बहु बहु मे भूयात्स्वाहा" इति । एवमुत्तरावपि मन्त्रौ द्रष्टव्यौ । प्रतिमन्त्रं भक्षणं । अन्त आचमनं कार्यं । तदाहरणविधानात्[9] ॥ अत्र गृह्योक्तो[10] मधुपर्कप्रकारो नादरणीयः । सूत्रकारेण क्रत्वङ्गतया पृथग्विधानात् । केचित्तु गृह्योक्तमप्यत्राविरुद्धमुपसंहरन्ति । अत्र देवयजनमागतस्योद्गातुर्मधुपर्कविधानात् । यजमानस्य गृहे मधुपर्कदानं पश्चाद्देवयजनगमनमिति वदन्तो निरस्ता इति ॥

अथ यदि मधुपर्को न स्यात् । तत्स्थाने मधुमन्थो देयः । तस्य भक्षणमन्त्रमाह ॥

[1] Tg om. [2] G puts पुरस्तात् twice. [3] मन्त्रं G. [4] चाभिम° D. [5] भूयाद्ब° TD; भूयात् ब° D, Tg, G; भूया ब° G. [6] G om. द्विती. [7] वाव सर्वमिति G. [8] °रान्त Tg. [9] °हरणं विधा° D. [10] स्वगृह्यो° G.

"रसो ऽसि वानस्पत्यो[1] रसं मयि[2] धेहि" इति[3] मधुमन्थस्य पिबेदिति गौतमः[4] ॥ ११ ॥

मधुना लोडिताः[5] सक्तवो मधुमन्थः । तस्य मधुपर्कस्थानापन्नत्वान्मधुपर्क इत्यावेदने प्राप्ते विशेषमाह ॥

वानस्पत्य इति प्रवचनम् ॥ १२ ॥

वानस्पत्यो वानस्पत्यो वानस्पत्य इति वचनं[6] कार्यमिति[a] ॥

तथा दधिमन्थोदमन्थयोः[7] ॥ १३ ॥

दधिमिश्राः[8] सक्तवो दधिमन्थः । उदकेन[9] मिश्रिता[9] उदमन्थः । उभयोरपि मधुपर्कस्थानापन्नयोस्तथैव रसो ऽसि वानस्पत्य इति भक्षणं कार्यं ॥ तत्र विशेषमाह ॥

पयस्यो ऽपयस्य[10] इति[11] तु[11] रसादेशः[11] ॥ १४ ॥

वानस्पत्य इति पदस्थाने पयस्यो ऽपयस्य इति पदद्वयं क्रमेण प्रक्षिप्य तेन रसादेशः कार्यः । "रसो ऽसि पयस्यो रसं मयि धेहि" इति दधिमन्थभक्षणं । रसो ऽस्यपयस्य इत्युदमन्थभक्षणमिति ॥

एते वेव[12] प्रवचने कालिन्दः सारस्वत[13] इति वा ॥ १५ ॥

दधिमन्थोदमन्थयोः पयस्यो ऽपयस्य इत्येते प्रवचने कालिन्दः सारस्वत इति वेति ॥

शेषं ब्राह्मणाय दद्यात् ॥ १६ ॥

भक्षितशिष्टं मधुपर्कं ब्राह्मणाय दद्यादिति ॥

तदभावे[14] ऽद्भिः संप्रोक्ष्याब्राह्मणाय ॥ १७ ॥

ब्राह्मणाभावे शेषमद्भिः प्रोक्ष्य क्षत्रियादिभ्यो दद्यादिति ॥

[1] ०स्पत्यो सि Tg. [2] मै Tg (corr. from मे). [3] धेहि Tg. [4] गतमः TG; गोतमः D.
[5] लोहिताः D, G. [6] प्रवचनं G. [7] ०मन्थोतमन्थयोः Tg; मन्थोदधिमन्थयोरिति G.
[8] ०मिश्रता G. [9] उदकमिश्राः C. [10] पस्य Tg. [11] इतीच रसादेवि TG. [12] चैव G.
[13] सारास्वत Tg. [14] तदवे TG.

[a] Cp. above, 1, 2, 2 and 3.

"कुरुत" इति गवि[1] प्रोक्तायां ब्रूयात् ॥ १८ ॥

मधुपर्काङ्गभूतायां गवि प्रोक्तायां कुरुतेति प्रेष्येत् । संज्ञपनादिश्रपणान्तव्यापार-करणमभिप्रेतमिति[2] ॥

उत्सृक्ष्यन् "ओं कृतो धर्मस्तृणान्यत्तु[3] पिबतूदकमुत्सृजत" इति ब्रूयात् ॥ १९ ॥

अथ यदि गामहिंसन्नुत्सृजेत् । तदानीमों कृतो धर्म इति मन्त्रमुक्तोत्सृजेदिति[4] ॥

सर्वेषां यज्ञोपवीतोदकाचमने[5] नित्ये[6] ॥ २० ॥

सर्वेषामुद्गातृप्रभृतीनां चतुर्णामप्यार्त्विज्योपक्रमवेलायां यज्ञोपवीतमाचमनं च नित्य-मेव कार्यमिति ॥

कर्मोपयतामव्यवायो[7] ऽव्यावृत्तिश्च यज्ञाङ्गैः ॥ २१ ॥

कर्म कुर्वतां यज्ञाङ्गैः सह व्यवायः[8] केनचिन्न[9] कार्यः । व्यावृत्तिर्यज्ञाङ्गानां पृष्ठतः-करणं । तच्च न कार्यमिति ॥

प्राङ्मुखकरणं चानादेशे[10] ॥ २२ ॥

अनादेशे सर्वैरपि प्राङ्मुखैरेव कर्म[11] कर्तव्यमिति ॥

अथ सुब्रह्मण्यस्य कृत्यं वक्तुमारभते ॥

क्रीते[12] राजनि सुब्रह्मण्य[13] उत्तरेण सोमवहनं[14] गत्वा ऽन्तरेणेषे[15] शमीशाखां पलाशशाखां वा सपलाशां पाणौ कृत्वा ऽवतिष्ठेत[16] ॥ २३ ॥

क्रीते सोमे सोमवहनं शकटं प्रागीषमवस्थितमुत्तरेण गत्वा द्वयोरीषयोर्मध्ये[17] शाखां

[1] G om. ग.   [2] °श्रपणांत्ते D; °श्रपणान्तो G; व्यापारः D, G.   [3] °स्त्रिणान्नत्तु Tg.
[4] °दिति ब्रूयात् G.   [5] °तेद्काचमने Tg; °तोदकाचने D.   [6] नित्यो Tg.   [7] कर्मोपायताम° C, G; कर्मोपेतानामव्यवाजो TG.   [8] व्यावाय: G.   [9] चित्त C.   [10] °देशेत् TG.   [11] G om.
[12] क्रियते Tg; क्रीत TG.   [13] °ण्यस्य G.   [14] °वसनं D.   [15] °णेष TG.   [16] °तिष्ठेत् R.
[17] प्रागीषयोर्मध्ये G.

गृहीत्वाऽवतिष्ठेत्[1]। अत्र सामार्थ्यादुत्तरामीषामुत्क्रम्य प्रविश्य तिष्ठेदिति गम्यते। अन्यथोत्तरेण गत्वा मध्ये तिष्ठेदिति वचनाशक्तेः[2]। किं च। "तामेवैषामनूत्क्रम्य" इति[3][a] वक्ष्यति ततोऽप्यवगम्यते। उत्तरामीषामुत्क्रम्य प्रविशेदिति॥

अध्वर्युसंप्रैषं[4] सर्वत्राकाङ्क्षेत्सुब्रह्मण्यायाम्॥ २४॥

सर्वत्र सुब्रह्मण्याह्वाने ऽध्वर्युणा प्रैषमाकाङ्क्षेत्। तत्प्रेषित[5] एवाह्वयेत्। नान्यथेत्यर्थः। तेनातिथ्येष्टिसमाप्तावध्वर्युसंप्रैषाभावे[6] ऽस्माभिरुक्ता[b] ऽपि सुब्रह्मण्या न कार्या। तथा च जैमिनिरपि तत्र सुब्रह्मण्यां[7] न विधत्ते। अध्वर्युप्रैषस्य[8] तत्र वैकल्पिकत्वादिति[9]॥

रश्मी[10] धारयञ्छाखया प्रेष्येद्गावौ[11]॥ २५॥

अनडुहोर्बन्धनार्थे रज्जू सव्येन हस्तेन धारयन् पूर्वगृहीतया[12] शाखया[12] तावनड्वाहौ प्रेष्येत्। शाखया स्पृष्ट्वा गमयेत्। शाखया संस्पृशेदित्येव जैमिनिरिति॥

दक्षिणं पूर्वम्॥ २६॥

दक्षिणमनड्वाहं प्रथमं प्रेष्येदिति॥

"सुब्रह्मण्योम्" इति त्रिराह्वयेत् प्राचि[13] वर्तमाने मध्यमया वाचा॥ २७॥

सोमवहने शकटे प्राचि[14] प्राङ्मुखे वर्तमाने सति मध्यमस्वरेण सुब्रह्मण्योमित्येतावन्मात्रं त्रिराह्वयेत्॥ अत्र[15] केचित् प्रणवेषु विराममिच्छन्ति[c]। उत्तरत्र सुब्रह्मण्याह्वाने "पूर्वयोः प्रणवान्तयोर्विरमेत्"[d] इति[16] दर्शनात्। केचित्तु तत्रैव विधानादत्र नेच्छन्तीति॥

षट्कृत्वः प्रतीचि[17]॥ २८॥

प्रतीचि[18] प्रत्यङ्मुखे शकटे आवर्तमाने तेनैव स्वरेण षट्कृत्व आह्वयेदिति[19]॥

[1] °त्वा तिष्ठेत् G. [2] °नात् शक्तेः G. [3] °वैषाम° G. [4] °संप्रैषं Tg; राद्धयुस्संप्रैषं TG. [5] G om. तत्. [6] °संप्रैषा° G. [7] °ण्या G. [8] °प्रेषितस्य G. [9] वैकल्पित° D. [10] रश्मी D. [11] गावा TG. [12] °गृहीतशाखया G. [13] प्राची all MSS. except C and R. [14] G om.; प्राची D. [15] G om. [16] प्रणवयोर्वि° C. [17] प्रतीची TD, Tg. [18] प्रतीची D. [19] आह्वये° G.

[a] 1, 2, 29. [b] 1, 3, 2. [c] Thus Rudrask. [d] 1, 3, 6.

पूर्वेण पत्नीशालां विमुक्ते छदिषि[1] शाखामवगुह्य[2] तामेवेषामनूत्क्रम्याव्यवयन्नग्नीषोमौ[3] यथार्थं स्यात् ॥ २९ ॥

पूर्वेण प्राग्वंशं गत्वा द्वयोरनडुहोरन्यतरस्मिन् विमुक्ते सति शकटस्य च्छदिषि[4] शाखामवगुह्य[5] तामेवेषामनूत्क्रामेत्[6]। यामीषां पूर्वमुत्क्रम्य मध्ये[7] प्रविष्ट उत्क्रम्य चाग्नीषोमयोर्व्यवधानमकुर्वन्यथार्थं सुब्रह्मण्यः स्यात्। यथाप्रयोजनं गच्छेद्वा तिष्ठेद्वेत्यर्थः। अग्नीषोमावित्याहवनीयाग्निं[8] क्रीतं[9] च सोममाहेति[10] ॥

द्वितीयः खण्डः ॥ २ ॥

अथैतद्राजवाहनं[11] सुब्रह्मण्याय दद्याद्दक्षिणावत्सु[12] कर्मसंयोगात् ॥ १ ॥

अथ राजवाहनं[13] शकटमनडुद्भ्यां सहैव सुब्रह्मण्याय दद्यात्। अनो युक्तं सुब्रह्मण्यायेति श्रुतेः। दक्षिणायुक्तेषु क्रतुषु सत्त्वव्यतिरिक्तेष्वित्यर्थः। अनडुत्प्रेषणेन कर्मणा सुब्रह्मण्यस्य संयोगात्। तत्कर्मान्वयादित्यर्थः। कर्मसंयोगादिति[14] हेतुकथनमन्यत्रापि तत्तत्कर्मान्वितस्य प्रस्तोत्रादेः कुशास्तरणवस्त्रादिदानार्थमिति ॥

आतिथ्यायां[15] संस्थितायां दक्षिणस्य द्वारबाहोः पुरस्तात्तिष्ठन्नन्तर्वेदिदेशेऽन्वारब्धे यजमाने पत्न्यां च "सुब्रह्मण्योम्" इति त्रिरुक्त्वा निगदं ब्रूयात् ॥ २ ॥

प्राग्वंशस्य यत्पुरस्ताद्द्वारं[16] तस्य दक्षिणस्थूणायाः पुरस्तात्संचरदेशमतिक्रम्यान्तर्वेदि तिष्ठन्[17] पत्नीयजमानयोरन्वारब्धयोः सुब्रह्मण्योमिति त्रिरुक्त्वा निगदं ब्रूयादिति[18] ॥

[1] छदिषु G. [2] °गूह्य G. [3] तामेवैषाम° G; °मनुत्क्रम्या° TD, Tg; °व्यवयन्निग्नी° Tg; °व्ययंनग्नी° G. [4] छदिषु G. [5] °गूह्य G. [6] तामेवैषा° G. [7] मध्यमे G. [8] °त्याहवनीयं G. [9] °त्याहवनीयाग्निक्रतं D. [10] सोममाह्वयेति G. [11] °वहनं C, G, TG. [12] °णावत्सु Tg. [13] °वहन G. [14] °संवेगादिति G. [15] आदित्यायां Tg. [16] पुरस्ताद्यद्द्वारं C. [17] तिष्ठेत्। G. [18] G adds: तमेव निगदं दर्शयति।

"इन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य[1] मेने गौरावस्कन्दिन्न-हल्यायै[2] जार[3] कौशिकब्राह्मण[3] गौतमब्रुवाण"[a] इति[4] ॥ ३ ॥

इतिशब्दः सूत्रपठितस्वरप्रदर्शनार्थः । इत्यनेन स्वरेण[5] ब्रूयादित्यर्थः । न पुनर्निगदसमाप्त्यर्थः । एतावदह्ने सुत्यामित्यादेरपि[6] निगदत्वात् ॥

एतावदहे सुत्यामिति यावदहे स्यात् ॥ ४ ॥

एतावदह्ने सुत्यामिति शाखान्तरीयो[7] मन्त्रपाठः । इत्यह्ने[8] सुत्यामित्यस्माकं मन्त्रपाठः[b] । उभयोरेक एवार्थः । सूत्रार्थस्तु यावन्त्यहानीति[9] यावदहमिति[10] समाहारे द्विगुसमासः । यावदह्ने यावत्स्वहःस्वतीतेषु[11] सुत्या स्यात् । तावन्त्यहान्येतावदह इति संख्यया[12] निर्दिशेत्[13] । एतावच्छब्दः संख्योपलक्षणार्थः । यथा त्र्यह्ने[14] सुत्यां द्वादशाह्ने[15] सुत्यामित्यादि । द्वादशाह्नेऽतिक्रान्ते सुत्यामागच्छेत्यर्थः । ननु च । एतावदह्नेऽतिक्रान्त इति न श्रूयते । तेन सुत्यादिवसमप्यन्तर्भाव्यसंख्यानिर्देशः[16] कार्यः । चतुरह्ने सुत्यां त्रयोदशाह्ने सुत्यामिति । नैतदेवं । यद्येवमभविष्यत्[17] । तदानीमेतावतिथे[18] सुत्यामिति यावतिथे[19] स्यादिति पूरणप्रत्ययेन[20] निर्देशोऽभविष्यत् । न चैवं । किं च तापश्चिते[21] सत्त्रे संवत्सरोपसत्के कथं परिमाणनिर्देश इत्यपेक्षायां प्रकृतौ द्वादशाह्ने दृष्टं प्रकारं दर्शयति सूत्रकारः । "द्वादशाह्ने सुत्येति विदित्वा परिमाणज्ञानं धानंजय्यः"[c] इति । तत्र यदि प्रकृतौ सुत्यादिवसमन्तर्भाव्यपरिमाणनिर्देशः स्यात् । तदा त्रयोदशाह्ने सुत्येति विदित्वेति सूत्रप्रणयनं स्यात् । न चैवमस्ति । तस्मादेतावदह्नेऽतिक्रान्त इत्येव[22] मन्त्रार्थ[22] इति ॥

अद्येति समानाहनि ॥ ५ ॥

सुत्यया समानेऽहन्यद्य सुत्यामित्यादिशेत् । सुत्यायाः पूर्वदिवसे तु[23] श्वःसुत्यामि-

[1] वृषाण° TG, Tg. [2] °स्कन्दन्न° TG. [3] जारक्कशिक° TG; जारा कौ° Tg. [4] TD and R2 om. इति. [5] स्वरूपेण G. [6] सुत्यादेरपि D. [7] °न्तर्यो G. [8] एतावदहैः G. [9] यावन्त्यहानि यावदहानि G. [10] On the margin in G. [11] G ins. तु. [12] संख्यायां G; संख्याद D. [13] निर्देशे C. [14] त्रिहे G. [15] द्वादशे G. [16] G om. अपि. [17] यद्येवं भ° G. [18] °मेतावदहे ये G; °तिमे D. [19] °तिमे D. [20] °प्रत्ययो G. [21] किं चापश्चिते G. [22] इत्येवार्थ G; इत्येवमत्रर्थ D. [23] G om.

[a] Cp. S'Br. 3, 3, 4, 17 sqq.; ṢV. Br. 1, 1, 10-23; TĀ. 1, 12, 3. 4; Jaim. Br. 2, 79.
[b] ṢV. Br. 1, 1, 25. [c] 1, 4, 28.

त्यादेशः कार्यः । "तस्यान्ते श्वःसुत्या गौतमस्य"[a] इति सिद्धवदनुवादात्[1] । स्पष्टं चाह[2] जैमिनिः । "श्वःसुत्यामित्यौपवसथ्येऽहनि निर्दिशेत्"[b] इति ॥

पूर्वयोः प्रणवान्तयोर्विरमेत्[3] ॥ ६ ॥

सुब्रह्मण्योमिति पूर्वयोः प्रणवान्तयोर्विरम्य विरम्याह्वयेदिति ॥

मेने ब्रुवाणेति च ॥ ७ ॥

वृषणश्वस्य मेने गौतमब्रुवाणेति च द्वयोरपि विरमेदिति ॥

आग्नेय्यां षणे[4] जारेति[5] च ॥ ८ ॥

अग्निष्टुत्स्वाग्नेयीं सुब्रह्मण्यां वक्ष्यति[c] । तत्र जातवेदो विचर्षण इत्यत्र विरमेत् । उषसो[6] जारेति च विरमेदिति[d] ॥

पृथग्यजतिशब्देषु च ॥ ९ ॥

वक्ष्यमाणायां सनामग्राहसुब्रह्मण्यायां[7e] यजतिशब्देषु पृथक् पृथग्विरमेदिति ॥ अथ निगदशेषं दर्शयति ॥

"देवा ब्रह्माण[8] आगच्छतागच्छतागच्छत"[f] इति गौतमः ॥ १० ॥

एतावदहे सुत्यामित्यस्यानन्तरं देवा ब्रह्माण[9] इति निगदशेषं ब्रूयात् । नान्यत् किंचिदिति गौतम इति ॥

"आगच्छ" इति[10] पूर्वं देवाह्वानाद्धानंजय्यः[11] ॥ ११ ॥

देवा ब्रह्माण इत्यस्मात् पूर्वमागच्छेति ब्रूयादिति धानंजय्य[12] इति[12] ॥

"आगच्छ मघवन्" इत्येके ॥ १२ ॥

देवाह्वानात् पूर्वमागच्छ मघवन्निति पदद्वयं प्रयोज्यमित्येके । तथैव वयमधीमह[13] इति[g] ॥

[1] सिद्धमवद° G. [2] त्वाह D. [3] प्राणवन्त° TG. [4] षणेति D. [5] जठरेति G.
[6] इषसो D. [7] °ग्राहा° G; °ग्राहक° C. [8] ब्रह्मण TG; ब्राह्मण G. [9] ब्रह्मण D; ब्राह्मण G.
[10] आगच्छतेति Tg; आगच्छती TG. [11] देवाह्वानं धा° Tg; देवानां धा° TG. [12] °जयः । C.
[13] यमधी° D.

[a] 1, 4, 17. [b] Cp. Sāy. on ṢV. Br. 1, 1, 25. [c] 1, 4, 5. [d] 1, 4, 7. [e] 1, 3, 18 sqq.
[f] Cf. Jaim. Br. 2, 80. [g] ṢV. Br. 1, 1, 25.

एवं त्रिराहूय पत्नीयजमानावुपहवमिच्छमानावुपहूय[1] यथार्थं स्यात् ॥ १३ ॥

एवं सुब्रह्मण्योमित्येतदारभ्य[2] त्रिराहूय पत्नीयजमानयोरनुज्ञामिच्छतोरनुज्ञां[3] कृत्वा यथार्थं स्यादिति ॥ अनुज्ञाप्रकरणमाह[4] ॥

"उपहूतः" इत्युपहवः ॥ १४ ॥

उपहूत[5] इति शब्देन उपहवोऽनुज्ञानं कार्यमित्यर्थः । उपहूतेति स्त्रीलिङ्गेन पत्न्या अनुज्ञानं कार्यमिति । अत्र केचिदाहुः । आतिथ्यासमाप्तौ[6] सुब्रह्मण्याह्वानविधानबला-दध्वर्युसंप्रैषाभावेऽपि सुब्रह्मण्याह्वानं कार्यमिति । तदयुक्तं । अध्वर्युसंप्रैषोऽत्र वैकल्पिकः[7] । तत्र यदा संप्रैषः ' तदानीमाह्वानप्रकारविधानार्थमेतत्सूत्रं । न पुनः प्रैषाभावे[8]ऽप्याह्वा-नार्थमिति पूर्वमेव दर्शितमिति[a] ॥

एवं सर्वेषूपसदन्तेषु ॥ १५ ॥

सर्वेषूपसदन्तेषु[9] याः सुब्रह्मण्या अध्वर्युभिश्चोदिताः ' ता[10] एवमाह्वयेत् ॥

याश्चोर्ध्वमुपसद्भ्यः ॥ १६ ॥

ऊर्ध्वमुपसद्भ्यो[11] याः सुब्रह्मण्या अध्वर्युचोदिताः ' तास्वप्येवमेवाह्वानं कार्यमिति सूत्र-द्वयमपि धर्ममात्रविधिरेवेति । एवमेवोत्तरासु सर्वास्विति वक्तव्ये याश्चोर्ध्वमुपसद्भ्य[12] इति पृथग्योगकरणं वक्ष्यमाणविशेषस्य तत्संबन्धार्थं ॥

उत्करे[13] तु तत्र तिष्ठन् ॥ १७ ॥

ऊर्ध्वमुपसद्भ्यो याश्च[14] सुब्रह्मण्याः ' तासूत्करदेशे तिष्ठन्नाह्वयेत् । नान्तर्वेदिदेश इत्यर्थः ॥

[1] TD corr. to पत्नि°. [2] °त्येकदा° D. [3] °ज्ञामिच्छन्तोरनुज्ञां G. [4] °ज्ञानप्र° G.
[5] उपहूत G. [6] अति° D. [7] चैकल्पिकः C. [8] प्रैषा° D. [9] G om. [10] G om.
[11] उपसद्भ्य ऊर्ध्वं C. [12] G om. उपसद्भ्यः. [13] उत्कारे TG. [14] G om. च.

[a] 1, 2, 24.

प्राक्[1] सुत्यादेशान्नामग्राहो ऽग्नीषोमीयवपायां हुतायां परिहितासु वसतीवरीषु प्रातरनुवाकोपक्रमणवेलायाम् "असौ यजते"[2] इति[3] ॥ १८ ॥

नामग्राहस्[3] कार्यः । अग्नीषोमीयवपायामित्यादिस्थानत्रयोपादानं[4] परिसंख्यार्थं । एतेष्वेव नामग्राहो[5] । नान्यत्रेति । तेन हविर्धानप्रवर्तनाग्नीषोमप्रणयणयोः सुब्रह्मण्याह्वानपक्षे[a] नामग्राहो न भवति । असाविति नामधेयोपलक्षणं । यथा "वासुदेवशर्मा[6] यजते" इति ॥ अथ सत्त्रेषु नामग्राहे[7] विशेषमाह[7] ॥

प्रत्येकं[8] गृह्णीयाद्यजमाननामधेयानि यानि स्युः ॥ १९ ॥

सत्त्रेषु यावन्ति यजमानानां नामधेयानि । तानि प्रत्येकं[9] पृथगेव गृह्णीयात् । न समासनिर्देशः कार्यः । तेन "नारायणो यजते वासुदेवो यजते" इति पृथक् पृथगेव ग्रहणमिति । अन्ये तु सत्त्रप्रसङ्गाभावात् सूत्रमन्यथा व्याचक्षते । कथं । यजमानस्य त्रीणि नामधेयानि । अभिवादनीयं व्यावहारिकं नक्षत्रनामेति च । तानि प्रत्येकं सर्वाण्यपि गृह्णीयात्[b] । यथा दर्शपूर्णमासयोः सूक्तवाकनिगदे आशास्ते ऽयं यजमानो ऽसावित्यत्र[c] यजमानस्य द्वयोर्नामधेययोर्ग्रहणं । आश्वलायनो ऽप्यभिधत्ते । "असावसावित्यस्यादिश्य नामनी"[d] इति । तद्वदिति । तदेतद्वृद्धैर्विमृश्यमिति[10] ॥

अमुष्य पुत्रः पौत्रो नप्तेति[11] पूर्वेषाम् ॥ २० ॥

यजत इत्यनुवर्तते । स च पुत्रपौत्रनप्तृशब्दैः[12] प्रत्येकं संबन्धनीयः । "पृथग्यजतिशब्देषु" इति विरामविधानसूत्रे[e] बहुवचनादिति[13] । यजमानस्य पूर्वेषां पितृपितामहप्रपितामहानामपि[14] नामानि गृह्णीयात् । "यज्ञस्वामिनः पुत्रो यजते वासुदेवस्य पौत्रो यजते नारायणस्य नप्ता यजते" इति । अमुष्येति पुंलिङ्गमविवक्षितं । जनकत्वमात्रमेव विवक्षितं । तेन स्त्रीणामपि नामग्रहणं । "सत्यभामायाः[15] पुत्रः" इत्यादि । कुत एतत् । यजमानसुकृते[16] बन्धूनां भागित्वार्थो नामग्राहः । बन्धुत्वं च स्त्रीणामप्यविशिष्टमिति ॥

[1] G ins. च. [2] यजति Tg. [3] °ग्राहस्य G; ग्राहश्च (!) D. [4] G om. आदि. [5] °ग्रहो D. [6] यज्ञशर्मा G. [7] °ग्राहविशे° C. [8] Tg ins. नाम. [9] C ins. पृथक्. [10] वृद्धैर्वि° D. [11] नप्त्रेति TG. [12] G om. नप्तृ. [13] बहुवचनदर्शनादिति G. [14] पुत्रपिता° G. [15] सत्यकामायाः D. [16] यजमानस्य सु° C.

[a] 1, 3, 30. [b] Cf. Agnisvāmin on Lāṭy. 1, 3, 18. [c] Cf. S'āṅkh. S'r. 1, 14, 16. 17. [d] Āsv. S'r. 1, 9, 5. [e] 1, 3, 9.

अथावरेषां[1] यथाज्येष्ठं स्त्रीपुंसानां[2] ये जीवेयुः ॥ २१ ॥

अवरेषां[3] त्रयाणां पुत्रपौत्रनप्तॄणां स्त्रीपुंसरूपाणां जीवतां यथाज्येष्ठं नामानि गृह्णीयात्। "अमुष्य पिता यजते[4] पितामहो यजते प्रपितामहो यजते" इति। यथाज्येष्ठमिति वचनात् पुत्रवर्गं समाप्य पौत्रवर्गे[5] नामग्रहणं। पुत्रवर्गेऽपि यदि दुहिता ज्येष्ठा ' तस्याः[6] प्रथमं ग्रहणमिति स्त्रीपुंसानामिति वचनात्। षण्ढस्य[7] न ग्रहणं। पतितस्यापि न[8] ग्रहणं[8]। यजमानस्य सुकृते तस्य[9] भागित्वाभावादिति ॥

"जनिष्यमाणानाम्" इत्यन्तत[10] उक्त्वा[11] सुत्यादेशप्रभृति[12] समापयेत् ॥ २२ ॥

"जनिष्यमाणानां पिता पितामहः प्रपितामहो यजते" इति पाठाभावेऽपि सामर्थ्याद्गम्यते। तथैव जैमिनिना स्पष्टमेव पठितं। जनिष्यमाणानां पिता पितामहः प्रपितामह[13] इत्युत्तममाहरेति[13]। तत्र जनिष्यमाणानामिति वर्गत्रयस्यापि[14] तन्त्रेण निर्देशः पृथगनुपादानात्[15]। एवमुक्त्वा तदनन्तरं "श्वः सुत्यामागच्छ" इति निगदशेषं समापयेदिति ॥ अथ नामग्रहणवाक्येषु स्वरं विधत्ते ॥

अर्थनिर्वचनमुच्चान्तम्[16] ॥ २३ ॥

अर्थमात्रस्य[17] वाचकमर्थनिर्वचनं प्रथमान्तं पदमित्यर्थः। प्रातिपदिकार्थमात्रे[18] हि[18] प्रथमा[a] ' नाधिकं कर्मत्वादिकमभिधत्त[19] इति। तेनायमर्थः। प्रथमान्तं पदमन्तोदात्तमिति। तत्र यजमाननामधेयं[20] पुत्रः पौत्रो नप्ता पिता पितामहः प्रपितामह इति[21] सप्त पदान्यन्तोदात्तानि स्युरिति ॥

[1] °परेषां D (?) and the Grantha MSS. [2] D corr. to °पुंसां; C. has पुंसानां. [3] अपरेषां D, G. [4] For यजते C has इत्युपलक्षणं. [5] °वर्गो G; °वर्गेण C. [6] तस्य G. [7] षंडस्य, the MSS. [8] नामग्रहणं G. [9] तस्या D. [10] जनिष्यमाणामि° G; जनिष्यमाणा इत्य° R 2. [11] D reads orig. °मित्यंत उक्त्वा, and corr. उ to मु; C has °मित्यंतमुक्त्वा, but inserts, *sec. manu*, त before मु°; TD has °मित्यंतत्क्वा. [12] सुत्यादेशे G (om. प्रभृति). [13] प्रपितामहेत्यु° C.; °त्तमाहेति G. [14] वर्गद्वयस्यापि G. [15] पृथगुपादा° G. [16] अनिर्वच° TG. [17] अथ मा° G. [18] प्रतिपादिकार्थमात्रेति D. [19] नाधिकरणकर्म° G.; कर्मत्वादभिधत्त D. [20] यजमानो ना° G. [21] G om.

[a] Cp. Pāṇ. 2, 3, 46.

वैभक्ते च स्यादौ वैभक्तश्चैव ॥ २४ ॥

अत्र पूर्वसूत्रादुच्चपदं[1] समस्तमपि सामर्थ्यात् संबध्यते[2]। स्य इति षष्ठ्येकवचनादेशो[3] गृह्यते। आदिशब्देन तदागमो याडादिः[4][a]। षष्ठ्येकवचनविभक्तिसंबन्धिनि[5] स्यादौ परतः पूर्वमक्षरमुच्चं[6] भवेत्। वैभक्तस्य स्यादिरप्युच्चो भवेत्[7]। यथा वासुदेवस्य पुत्रः सत्याभामायाः पुत्र इति षष्ठ्यन्तस्य च पदस्यान्त्यमक्षरं तत्पूर्वं[8] चोदात्तमित्युक्तं भवति। तथा च महाभाष्यकारः। "अमुष्येत्यन्त[9] उदात्तः[9] स्यान्तस्योपोत्तमं[10] च"[b] इति ॥

उच्चाच्च नीचे नीचम्[11] ॥ २५ ॥

पूर्वसूत्रद्वयविहितादुच्चादुत्तरं[12] यन्नीचं[13]। तदपि नीचे[14] परतः उच्चं भवेत्। यथा पितामहप्रपितामहपदयोराद्यो[15] वर्णः। नीचे परत इति वचनात्। पितृपुत्रपौत्रनप्तृपदानामादिरुदात्तो न भवति। उदात्तपरत्वात्तस्येति ॥

जनिष्यमाणानामिति मध्ये द्वे ॥ २६ ॥

जनिष्यमाणानामित्यस्य पदस्य मध्ये द्वे अक्षरे तृतीयचतुर्थे उदात्ते भवतः। शिष्टमनुदात्तमिति ॥

यजेश्चादिः ॥ २७ ॥

यजत इत्यस्यादिरुच्चो[16] भवेत् ॥ अत्र सर्वत्रोच्चपदमनुवर्तते। एवमुच्चस्य[17] नीचापेक्षत्वादुच्चं। शिष्टं सर्वमनुदात्तमिति मन्तव्यं। अत्र सुब्रह्मण्योमिति पदमन्तोदात्तं। "सुब्रह्मण्यायामोंकार उदात्तः"[c] इति महाभाष्यकारवचनात्। इन्द्रागच्छेति निगदसूत्रप-

[1] ०दुच्चपरं G. [2] संबन्ध्यते G, C. [3] षष्ठ्येक० C, D. [4] याटादिः (?) D; याडादिः C; वा सादिः G. [5] षष्ठ्येक० C, D; ०संबन्धीनि G. [6] ०मुक्तं च G. [7] भवति G. [8] ०र्वे G. [9] ०त्यन्तोदात्तः G. [10] स्यात्त० the MSS. [11] उच्चनीचे नीचं TD; उच्चाच्च नीच नीचा TG. [12] ०द्वयहितादु० G. [13] यं नीचं MSS. [14] नीचै C. [15] पादयो० G. [16] इत्यादिरु० G. [17] एव। उच्चस्य D.

[a] Cp. Pāṇ. 7, 3, 113. [b] Pat. Bh. 7, 8 to Pāṇ. 1, 2, 37. [c] L. cit., Bh. 1.

ठितस्वरः । अत्रापि महाभाष्यं[1] "आकार आख्याते तदादिस्व[2] वाक्यादौ[2] च[3] द्वे द्वे मघवन्वर्जमसावित्यन्तः"[4a] इति[5] । इत्यद्द्वे सुत्यामिति पदद्वयमन्तोदात्तमिति व्याकरणसिद्धमिति ॥

दक्षिणासु चोदितोऽनुव्रजन्दक्षिणाः सनामग्राहामाह्वयेत्[6] ॥ २८ ॥

दक्षिणासु नीयमानासु दक्षिणा अनुव्रजन् नामग्राहयुक्तां[7] सुब्रह्मण्यामाह्वयेत् । अध्वर्युणा प्रेषितश्चोदित इति वचनं स्पष्टार्थं[8] । "अध्वर्युसंप्रैषं[9] सर्वत्राकाङ्क्षेत्" इति पूर्वमेवोक्तत्वादिति[b] ॥

प्रणवनामानि वा[10] ॥ २९ ॥

यदा सुब्रह्मण्योमिति त्रिः प्रणवमुक्त्वा[11]ऽसौ यजत इत्यादि नामग्रहणं च कुर्यात् । इन्द्रागच्छेति निगदं न ब्रूयादिति ॥

हविर्धानप्रवर्तनाग्नीषोमप्रणयनयोश्च[12] सुब्रह्मण्येत्येके ॥ ३० ॥

स्पष्टं ॥

अनाह्वानमाचार्याः[13] प्रातरनुवाकान्ता सुब्रह्मण्येति ॥ ३१ ॥

दक्षिणायने सुब्रह्मण्याया अनाह्वानमेवेत्याचार्याः । कुतः । यस्मात् प्रातरनुवाकान्तैव सुब्रह्मण्या सुत्यायामागमनार्थत्वादाह्वानस्यागतेषु देवेषु पुनराह्वानं निरवकाशमिति । इतिशब्दो हेत्वर्थ इति ॥

तृतीयः खण्डः ॥ ३ ॥

[1] °भाष्ये C. [2] तदादिववा° D. [3] G om. [4] मघवन्ववर्ज° C. [5] G om.
[6] °ग्राहमा° TD, D; °ग्रहामा° G. [7] °ग्रहयु° G. [8] विस्पष्टार्थं G. [9] G om. सं.
[10] चेति C. [11] प्रणवान्तमुक्त्वा C. [12] प्रणयनस्य यो TG; प्रणयनोस्य G. [13] अनद्वान° R.

[a] L. cit., Bh. 2. 3. 4. 6. [b] 1, 2, 24.

अथ विकृतिषु सुब्रह्मण्यायां विशेषविधानमुपक्रमते[1] ॥

साद्यःक्रेष्वग्नीषोमीयायामिष्टौ[2] वपाकालाज्यभागयोर्हुतयोः संस्थितायां वेत्येके ॥ १ ॥

साद्यःक्रा नामैकाहाः[3] । तेष्वग्नीषोमीयपशोः स्थाने ऽग्नीषोमीयेष्टिर्विहिता शाखान्तरे । तत्र स्थानापन्नत्वादग्नीषोमीयवपाकाला सुब्रह्मण्या प्राप्ता । कस्मिन्नवसरे कर्तव्येति न[4] ज्ञायते । तत्रेदमुच्यते । आज्यभागयोर्हुतयोर्वपाकाला सुब्रह्मण्या कार्या । अग्नीषोमीयपशावाज्यभागानन्तरं वपाहोमस्य दर्शनात् । अत्र वपाहोमाभावे ऽपि तत्कालस्य[5] ग्रहणं युक्तं । यद्वा समाप्तायामिष्टौ कार्येत्येके ॥ अथ स्वमतमाह ॥

लुप्ता[6] त्वधिकरणापायात् ॥ २ ॥

अधिकरणं स्याननिमित्तं[7] । तदभावादिष्टौ लुप्तैव सुब्रह्मण्या । वपाहोमो हि प्रकृतौ निमित्तं । तदत्र[8] नास्तीत्यक्रियैवेति ॥

अग्निष्टुत्स्वाग्नेयो[9] निगदः ॥ ३ ॥

अग्निष्टुतो नामैकाहाः । तेष्वग्निदेवत्यो[10] निगदः स्यादिति ॥

तत्र गौतमीयम् ॥ ४ ॥

तत्र गौतयोर्यं मतं[11] वक्ष्यत[11] इति शेषः ॥

"अग्न आगच्छ[12] रोहिताभ्यां बृहद्भानो धूमकेतो जातवेदो[13] विचर्षण[14][a] आङ्गिरस ब्राह्मणाङ्गिरसब्रुवाण"[b] इति[15] प्राक् सुत्यादेशात् ॥ ५ ॥

एतावदहे सुत्यामित्यस्य पुरस्तादिन्द्रागच्छेति निगदमपोह्य[16][c] । अग्न आगच्छेत्येवं पठितो निगदः स्यादिति ॥

[1] विशेषं विधातुमु° G.; विशेषं विधानमु° D. [2] साद्यक्रिष्व° TG. [3] °मैकाभाः G. [4] त G. [5] G ins. संभवात्. [6] लुप्त G. [7] स्थानं नि° D. [8] तत्र G. [9] °षुत्स्वा° TG; °मेय्यो C. [10] °दैवत्यो G. [11] मतमनुवक्ष्यत G. [12] आगच्छा G. [13] जाता° Tg. [14] विषचर्षण D; विचचण TG. [15] °रसप्रभृतिब्रु° TG. [16] निगतम° G.

[a] Cp. 1, 3, 8. [b] Cp. Anupada 8, 3. [c] 1, 3, 3. 4.

देवानां स्थाने ऽग्नयः ॥ ६ ॥

"देवा[1] ब्रह्माणः"[1a] इत्यत्र देवानां स्थाने ऽग्नयः स्युः। "अग्नयो ब्रह्माण[2] आगच्छत" इति ॥

अथ[3] धानंजय्यो[3] "ऽग्न आगच्छ रोहितव आगच्छ भरद्वाजस्याज[4] सहसः[4] सूनो वारावस्कन्दिन्नुषसो[5] जार" इति[6b] ॥ ७ ॥

धानंजय्यस्तु "जातवेदो विचर्षण" इत्येवमन्तस्य स्थाने "अग्न आगच्छ रोहितव आगच्छ" इत्येवं[7] पठितं निगदमाहेति ॥

आङ्गिरसप्रभृति समानम् ॥ ८ ॥

"आङ्गिरस ब्राह्मणाङ्गिरस ब्रुवाण" इत्यादिकमुभयोरप्याचार्ययोः समानमिति। तत्र मघवन्निति[8] पदमुभयोरपि मतेनास्त्येव। तन्मते प्रकृतावप्यभावात् यत्पुनः "आगच्छ मघवन्नित्येके"[c] इति प्रकृतौ तृतीयं मतं दर्शितं। तदप्यग्निष्टुत्सु न भवति। आग्नेयत्वान्निगदस्येति[9] मन्तव्यं। ऊहेनाप्यग्न[10] इति न प्रयोज्यं। देवानां स्थाने ऽग्नय इतिवत् सूत्रकारेणानुक्तत्वादिति ॥

इन्द्रं "शक्र" ति ब्रूयात् "विश्वे" इति देवाननिरुक्तेषु ॥ ९ ॥

उपहव्यप्रभृतयः केचिदेकाहा अनिरुक्ता भवन्ति। अनिरुक्तलक्षणं च वक्ष्यति[11]। "उपहव्ये देवतानामधेयानि परोक्षं ब्रूयुः"[d] इत्यादि[12] तेष्विन्द्रपदमपोह्य शक्रपदं प्रयुञ्जीत। देवा इति पदमपोह्य विश्व इति ब्रूयात्। "शक्रागच्छ विश्वे ब्रह्माण आगच्छत" इति[13] ॥

[1] दैवा ब्राह्मणा G. [2] ब्राह्मण G. [3] ऽधानंजय्य TG. [4] °स्यजसहास् TG; °स्यासहसस् G; °स्याजहासः C. [5] पारा° TG; वाराह° G; °नुससो TG; °षासो C. [6] Tg om. इति; in this Sūtra a large portion, as also of the Comm., is left out in D, and partly restored, by another hand, in the margin. [7] C om. धानंजय्यस्तु — आगच्छत, and begins इत्येवं, etc. [8] °वानिति D. [9] आनोय° C. [10] °ग्नय G. [11] G. om. [12] G. ins. ना. [13] ब्राह्मणागच्छतेति G.

[a] 1, 3, 10. [b] Cp. 1, 3, 8. [c] 1, 3, 12. [d] 24, 1, 1.

अनिरुक्तप्रातःसवनयोश्च[1] ॥ १० ॥

प्रातःसवनमात्रमनिरुक्तं यस्य सो ऽनिरुक्तप्रातःसवनो वाजपेयः प्रजापतेरपूर्वस्यै-काहः[2]। द्वयोरपि तथेन्द्रं शक्रेति ब्रूयाद्विश्व इति देवानिति। ननु च। पूर्वेणैव सिद्धमेतत्। नैवं। उत्तरयोः सवनयोर्द्वयोरपि निरुक्तत्वात्। भूयसा[3] न्यायेन[3] निरुक्तधर्मः स्यात्। तन्निवृत्त्यर्थमिदं सूत्रं। भूयस्त्वान्मुख्यत्वं प्रबलवदिति[4] सूत्रकारमतमिति ॥

अभिषेचनीयदशपेयावन्तरेण[5] सदा[6] नामग्राहः[6] ॥ ११ ॥

राजसूये अभिषेचनीयदशपेययोः सुत्ययोरन्तराले दशाहानि भवन्ति। "तद्दीक्षित एव दशाहे ततो दशपेयेन यजेत"[a] इति सूत्रकारवचनात् तद्दीक्षित[7] इत्यस्यायमर्थः[7]। अभिषेचनीयदीक्षया[8] दीक्षित[9] एव[9] पुनर्दीक्षामकृत्वा[10] ततो दशाहे दशपेयेन यजेतेति तेन दशाहे दीक्षा न सन्ति न चोपसदः केवलं संसृपेष्टिभिस्चरन्त्यध्वर्यवः[11]। तत्रेष्ट्यन्तेषु सनामग्राहं सुब्रह्मण्याह्वानमप्राप्तमिदं सूत्रं विधत्ते। नामग्राहमात्रं वेति ॥

अहर्गणेष्वहराद्यन्तयोराह्वयेत्[12] ॥ १२ ॥

अहर्गणेषु सत्त्राहीनेषु[13] अहराद्यन्तयोराह्वयेत्। अहरादिः प्रातरनुवाकोपक्रम-कालः[14]। वसतीवरीपरिहरणकालो वा। अहरन्तं स्वयमेव वक्ष्यति। "अप्सुषोमान्तमहः सत्त्रेषु दधिभक्षान्तमहीनेषु"[b] इति[15]। तत्राहरन्तेष्वध्वर्युसंप्रैषाभावदप्राप्तं[16] विधीयते। अहरादिग्रहणं[17] दृष्टान्तार्थं[18]। यथा प्रातरनुवाकोपक्रमे[19] देवतागमनार्थमाह्वानं। एवमहरन्तेष्वप्यवश्यं कार्यं[20]। अध्वर्युसंप्रैषाभावे ऽपि मैत्रावरुणस्यातिप्रैषमन्त्रेण[21c] प्रेषित-त्वादिति भावः ॥ ननु संस्थिते किमर्थमाह्वानं। अत आह ॥

[1] आनिरुक्तं प्रा° TG; °प्रातःपचन° C. [2] °स्यैकं। हि G. [3] °साभ्यासेन G; °सामान्यायेन C. [4] G om. प्र; प्रबलमिति C. [5] °षेचनिवद्° TG. [6] सनामग्राहो TG, Tg, G. [7] तद्दीक्षत स्यादित्ययमर्थः G. [8] °दीक्षाया G. [9] G. om. [10] न पुनर्दीक्षां कृत्वा G. [11] संसृपेक्षिभि° D; संसृप्तेष्टिभि° G. [12] °ह्योराद्यन्त° TG. [13] सत्त्राभिन्नेषु° G. [14] °कालाः C. [15] °भिक्षांत° D. [16] तत्राहरन्ते ऽध्वर्यु° G. [17] °ग्रहणे D. [18] °र्थः D. [19] °पक्रम G. [20] कार्यः D. [21] °स्यातिप्रै° D; °स्यतिप्रै° C; स्यादिति हि प्रै° G.

[a] 25, 2, 1. [b] 6, 4, 13. 14. [c] Cf. 15, 3, 22.

उत्तरार्थाहरन्तिकी[1] ॥ १३ ॥

अहरन्ते भवा[2] आहरन्तिकीति[3]। सा सुब्रह्मण्योत्तरदिवसार्था ऽवश्यं[4] कार्या। उत्तरार्थेति वचनादन्येष्वहःसु[5] न भवन्ति[6]। तत उत्तराभावादिति। अत्र केचिदहरन्तादूर्ध्वमुत्तरदिवसार्थं[7] वसतीवरीपरिहरणकाले ऽपि सुब्रह्मण्याह्वानमिच्छन्ति। तत् सूत्रकारस्यानभिमतं। अहराद्यन्तयोरिति द्वयोरेव कीर्तनात्। तेनोत्तरोत्तरसुत्यानां द्वे द्वे एव सुब्रह्मण्ये असाधारणभूते[8] अहरुपक्रमे पूर्वाहरन्ते वेति मन्तव्यं। तथा च सूत्रकारो दर्शयति। "ऊर्ध्वमतिरात्रादाग्नेय्येका द्वितीये पञ्चदशरात्रे द्वे वा"[a] इति। अन्यथा द्वे वा तिस्रो वेत्यवक्ष्यदिति[9] ॥

अग्नीषोमीयप्रभृत्यहीनेषु सर्वाः सनामग्राहाः[10] ॥ १४ ॥

अहीनेष्वग्नीषोमीयवपाप्रभृति[11] उत्तराः सर्वाः सुब्रह्मण्याः सनामग्राहाः[12] स्युः। ननु। अतिदेशसिद्धमेतत्[13]। नैवं। आहरन्तिकीष्वप्राप्तेस्तदर्थं[14] सर्वा इति विधानमिति ॥

दीक्षानुपूर्वेण[15] दीक्षितानां सत्रेषु नामग्राहः ॥ १५ ॥

सत्रेषु यजमानानां दीक्षाक्रमेण नामग्राह इति ॥

ऊर्ध्वमतिरात्रादग्रहणं[16] ॥ १६ ॥

सत्रेष्वित्यनुवर्तते। सत्रेषु प्रायणीयातिरात्रस्य[17] प्रातरनुवाकपर्यन्तमेव नामग्रहणं। तत ऊर्ध्वमग्रहणमिति। अत्राहरन्तेष्वविधानादेवाग्रहणस्य सिद्धत्वादहरादौ निषेधो[18] ऽयमिति ॥

तस्यान्ते श्वःसुत्या गौतमस्य ॥ १७ ॥

पूर्वेद्युरुपक्रान्तो ऽतिरात्रो द्वितीये ऽहनि प्रातःकाले समाप्यते। तस्यान्ते या सुब्रह्मण्या द्वितीयदिवसार्था। तत्र "श्वः सुत्यामागच्छ" इति निर्देशः कार्य इति गौतमः। ननु[19] च।

[1] Tg om. की; TG reads उत्तरार्थाहर्; °हरन्तीक ति G; °हिरंतिकी[ति] C. [2] भावा G. [3] °न्तिकिं G. [4] वश्य G; the avagraha missing in all MSS. [5] °हन्तेष्व° G, C. [6] भवति G, C. [7] °र्ध्व उत्तरदिवसार्थव° G. [8] °धारणं भू° C. [9] वेत्युपचिदिति G. [10] °ग्रहाः G. [11] °मीयवद्यप्र° C. [12] °ग्रहा G. [13] अदितदेश° C; G ins. here ते. [14] °प्राप्ते त° C. [15] °पूर्व्येण TG, G. [16] रात्रात् ग्र° G. [17] °याचिरा° D. [18] °धौ C. [19] तदनु G.

[a] 1, 4, 26.

तदानीमेव[1] द्वितीयसुत्यारम्भादेव "अद्य सुत्याम्" इति[2] वक्तव्यं। नैतदेवं। अहर्गणमधिकृत्योत्तरोत्तरदिवसार्थे[3] मैत्रावरुणस्यातिप्रैषमन्त्रे[4a] सर्वेषामह्नामविशेषेण श्वः सुत्यामित्येव पाठात्। न हि द्वितीयस्याह्नोऽद्य सुत्यामिति विशेषतः पाठो[5]ऽस्ति। तेन पश्चाह्नाविल्वसामान्यात्[6] श्वःसुत्यामिति कथंचिदिति[7] निर्देशः[8] कार्यः। तुल्यन्यायतया सुब्रह्मण्यायामपि तद्वन्निर्देश इति॥

नार्मेधान्त[9] एके ॥ १८ ॥

एके पुनरतिरात्रस्य नार्मेधसामसमाप्तौ उक्थ्यपर्यवसाने आहरन्तिकीं[10] सुब्रह्मण्यामपकृष्य[11] कुर्यादित्याहुः। उत्तरेष्वहःसु तथाकरणात्[12]। तथा सति श्वःसुत्यामिति[13] निर्देशः समञ्जस[14] इति[14] भाव[15] इति॥

अद्यसुत्या शाण्डिल्यस्य ॥ १९ ॥

तस्यान्त इत्यनुवर्तते। अतिरात्रस्यान्ते "अद्य सुत्याम्" इति निर्दिशेदिति शाण्डिल्यः। तदानीमेव द्वितीयसुत्यारम्भाद्यः पुनरतिप्रैषमन्त्रे[16] श्वःसुत्येति पाठः। स तु[17] सर्वासामुत्तरसुत्यानां श्वः श्व एवारम्भात् तदभिप्रायः। न तु[18] द्वितीयदिवसाभिप्रायः। तत्राद्यसुत्येत्यूह[19] एव कार्य इति शाण्डिल्यो मन्यत इति॥

अनाह्वानं[20] धानंजय्यः ॥ २० ॥

तस्यान्ते[21] अनाह्वानमेवेति धानंजय्यः[22]। कुतः। सर्वथाऽनुपपत्तेः। अतिप्रैषे[23] तावत् श्वःसुत्यामिति पाठात्। अद्य सुत्यामित्यनुपपन्नं तदानीमेवारम्भात् श्वःसुत्यामिति चानुपपन्नं। तेनानाह्वानमेव युक्तमिति॥

[1] तदनुमेवं G. [2] G om. एव. [3] अर्हगण° C. [4] °स्येति प्रै° G. [5] पाठे C.
[6] °ह्नाविल्य° C. [7] C om. इति. [8] निर्देशे C. [9] ना सर्वधान्त G.
[10] अह ° C; आरतिकीं D. [11] °ण्यामाकृष्य G. [12] °कारणात् G. [13] D om. श्वः.
[14] °ञ्जसमिति G. [15] D corr. to भव. [16] °मंत्रैः G. [17] D om. स तु; C reads पाठः स्तु.
[18] न नु C. [19] °द्या° G. [20] R ins. वा. [21] G ins. मेवः. [22] G ins. कथं चित्.
[23] अप्रैषे G.

[a] Cf. 15, 3, 22.

तिसृषु चोत्तमासु नामग्राहः ॥ २१ ॥

चकारो धानंजय्यानुकर्षणार्थः । ऊर्ध्वमतिरात्रात्[1] सत्त्रेषु न नामग्राह[2] इत्युक्तं[a] । धानंजय्यस्तु तस्यान्ते तिसृषु सुब्रह्मण्यासु नामग्राहस्य कार्य इत्याह । तस्य निदानं मृग्यमिति ॥

उत्तमयोरिति[3] गौतमः ॥ २२ ॥

स्पष्टमिति ॥

तथा सत्यग्नीषोमीयवपायामग्रहणं धानंजय्यः ॥ २३ ॥

तथा सतीति यदि सत्त्रसमाप्तौ[4] द्वयोरेव सुब्रह्मण्ययोर्नामग्राहः । तथा सति पुरस्तादपि द्वयोरेव नामग्राहः । नाग्नीषोमीयवपायामित्यर्थः[5] । यथा प्रायणं तथैवोदयनं युक्तमभिमतमिति ॥

अनाह्वानं वा ॥ २४ ॥

स्पष्टमिति ॥

सर्वत्र सत्त्रेष्वग्रहणं शाण्डिल्यः ॥ २५ ॥

सत्त्रेष्वग्नीषोमीयप्रभृत्या समाप्तेर्न क्वचिदपि[6] नामग्रहणमिति शाण्डिल्य इति ॥

ऊर्ध्वमतिरात्रादाग्नेय्येका[7] द्वितीये पञ्चदशरात्रे द्वे वा ॥ २६ ॥

द्वितीयस्य पञ्चदशरात्रस्य द्वितीयमहरग्निष्टुद्भवति "अग्निष्टुत्स्वाग्नेयो[8] निगदः"[b] इति वचनादाग्नेयी[9] सुब्रह्मण्या कार्या । अग्निष्टुद्व्यतिरिक्तेष्वहःसु प्रकृतिवदैन्द्री सुब्रह्मण्येत्यसंदिग्धं । या पुनरुपसद्दिवसेषु[10] सर्वसुत्यासाधारणी सुब्रह्मण्या सा किमाग्नेयी स्यादैन्द्री[11]

[1] °रात्रान् D, C. [2] °ग्राहकं C. [3] °रयो° TG; TD corr. र to म. [4] पुत्रस° G.
[5] G om. न. [6] क्वचिदिति G. [7] °य्येका TG, G. [8] °ष्टुत् षा° C; °ष्टुत् सा° D, G.
[9] °यीति G. [10] °रुपवस° G. [11] °दैन्द्रं G.

[a] 1, 4, 16. [b] 1, 4, 3.

वेति संशयः। तत्रेदमुच्यते। ऊर्ध्वमतिरात्रादग्निष्टुत एव असाधारणी केवलमेका[1] सुब्रह्मण्याग्नेयी स्याद्ध्[2] वेति[2] परिसंख्यानमेतत्। तेनोपसत्कालीनाः[3] सर्वा ऐन्द्र्य[4] एव[5] स्युः। ऐन्द्राणामङ्गानां भूयस्त्वान्मुख्यत्वाच्चेत्यभिप्रायः। अतिरात्रे[6] धानंजय्यमतेनाह्वानाभावादेकाग्नेयीत्युक्तं। गौतमादिमतेनाह्वानाद्ध् वेत्युक्तमिति[7] ॥

सर्वाः प्राक् त्रिकद्रुकेभ्यस्तृतीये ॥ २७ ॥

तृतीये पञ्चदशरात्रे प्रथममहरग्निष्टुत्। तदनन्तरं ज्योतिर्गौरायुरिति त्रीण्यहानि[8] त्रिकद्रुक इति[9] संज्ञकानि[10] भवन्ति। तत्र त्रिकद्रुकेभ्यः प्राक् सर्वाः सुब्रह्मण्या उपसत्कालीना अप्याग्नेय्य एव[11] स्युरग्निष्टुतो[12] मुख्यत्वादिति[12] भावः। भूयस्त्वान्मुख्यत्वं प्रबलमिति सूत्रकारस्य पक्षः[a]। जैमिनिश्चाह। मुख्यं वा पूर्वचोदनाल्लोकवदिति। आग्नेयीति पदं[13] बहुवचनेन विपरिणम्यानुषञ्जनीयं[14] ॥

कौण्डपायिनतापश्चितयोर्द्वादशाहे[15] सुत्येति विदित्वा परिमाणाह्वानं धानंजय्यः सुत्यामागच्छेतीतराः[16] ॥ २८ ॥

कुण्डपायिनामयने[17] द्वादशभिरुपसद्भिश्चरित्वा[18] तदनन्तरं हविर्यज्ञैः षण्मासानतीत्य सुत्या भवति। तथा तापश्चिते सत्त्रे संवत्सरमुपसदो[19] भवन्ति। तदनन्तरं सुत्या। उभयोरपि सत्त्रयोः प्रथमामुपसदमारभ्य सुत्यायाः प्रागेतावदह्ने सुत्यामिति परिमाणाह्वानं[20] कार्यं। प्रकृतिवदिति प्राप्त इदमुच्यते। द्वादशाहे[21]ऽतिक्रान्ते सुत्या भविष्यतीति ज्ञात्वा परिमाणाह्वानं कार्यं। ततः पूर्वमितराः सुब्रह्मण्याः केवलं सुत्यामागच्छेत्याह्वयेत्। प्रकृतौ द्वादशाहे तथैव परिमाणनिर्देशादिति धानंजय्याभिप्रायः। प्रथमामुपसदमारभ्यैव परिमाणाह्वानमिति सूत्रकारस्य मतं। कुतः। मूलप्रकृतौ ज्योतिष्टोमे तथैव विधानात्। तत्र यथा त्र्यहे सुत्यामिति दृष्टमपि[22] परिमाणाह्वानमार्थिकत्वात् तापश्चितादौ न भवतीति ॥

[1] केवला G. [2] °द्वेति G. [3] G ins. तु. [4] ऐन्द्री G. [5] एवा G. [6] °रात्रान्ते G. [7] °द्वेत्यु° G. [8] G adds ति. [9] C om. [10] संजानि G. [11] एवा G. [12] °ष्टुतोर्मुख° G. [13] प्रतिपदं G. [14] विपरीतंम्या° C. [15] °पायीन° D (thus also corr. in TD); °पायन° Tg. [16] °च्छेतर[इति] G. [17] कौ° C. [18] °द्भिरित्वा G. [19] सतनिमुप° G. [20] परिमाणं G. [21] द्वादशे G. [22] दष्टंमिति म C.

[a] Cf. 1, 4, 10 Comm.

ऊर्ध्वं चातिरात्रात्[1] प्रथमस्य सारस्वतस्य प्राक् श्वःसुत्यायाः ॥ २९ ॥

सुत्यामागच्छेत्यनुवर्तते। प्रथमस्य सारस्वतस्य पर्वणि पर्वणि सुत्या[2] ' तदन्तरालदिवसेष्विष्ठ्ययनमिति[2] स्थितिः । तत्रापि प्रथमसुत्याया ऊर्ध्वमिष्ठ्ययनदिवसेष्वन्त्यवर्जं[3] सुत्यामागच्छेत्येव[4] निर्दिशेत्। न परिमाणाह्वानं कुर्यादित्यर्थः। सुत्यायाः पूर्वदिवसे तु श्वःसुत्यामिति निर्दिशेत् ' प्राक् श्वःसुत्याया इति वचनात् ॥ ननु च । इष्ठ्ययनदिवसेषु सुब्रह्मण्याह्वानं नास्त्येव[5] ' अविहितत्वात् । असति चाह्वाने कथं तत् प्रकारकथनं । अत आह ॥

कौण्डपायिनसारस्वतयोरिष्ठ्ययनेषु[6] सुत्यावच्छाण्डिल्यः ॥ ३० ॥

इष्ठ्ययनदिवसेष्वपि सुत्यादिवसवदाद्यन्तयोः सुब्रह्मण्याह्वानं कुर्यात् । एतावान्विशेषः। सुत्यादिवसेष्वाद्यन्तयोराह्वानं[7] तत्तत्सुत्यार्थं इष्ठ्ययनदिवसेष्वागामि सुत्यार्थमिति शाण्डिल्यग्रहणं पूजार्थमिति ॥

तथा ऽग्निहोत्रमासे[8] तथा ऽग्निहोत्रमासे[9] ॥ ३१ ॥

कुण्डपायिनामयने[10] अग्निहोत्रमासेऽपि तथैवाद्यन्तयोराह्वानमिति ॥

चतुर्थः खण्डः ॥ ४ ॥

प्रथमः पटलः ॥ १ ॥

॥ इति काश्यपगोत्रेण धन्विना प्रीतये हरेः ॥ छन्दोगसूत्रे[11] दीपो[11]ऽयं प्रथमे[12] पटले[12] कृतः[13] ॥

[1] G om. च; चाभिरा° C. [2] सुत्यादन्तरा° D; सुत्यान्तरा° C. [3] D om. यन; °वर्ज्यं G. [4] °गच्छेत् एव G. [5] °स्त्वेव C. [6] °पायन° Tg; °पायनतापश्चितयो° G; so originally also TD, but corr. to °सारस्वत°. [7] °द्विपसेयाद्य° G. [8] °मास्ते TG. [9] °होत्रे। TG. [10] यथा कुंपायि° C. [11] °सूत्रदीपो D. [12] °मः °लः G, [13] G om.

एवं सुब्रह्मण्यस्य कृत्यमुक्त्वा प्रस्तोतुर्वक्तुमारभते[1] ॥

सर्वत्रानादेशे परिसामानि प्रस्तोता गायेत् स्वाध्यायवत्[2] स्वासु ॥ १ ॥

यानि बहिःस्तोत्रमङ्गतया प्रयुज्यन्ते। तानि परिसामानि[3] । तान्यनादेशे स्वकीयासृचु यथाऽध्ययनं प्रस्तोतैव गायेत् । योनिरुत्तरादय[4] च स्वकीयाः । ततो[5]ऽन्याः[5] परकीयाः[6] । यथा रथन्तरस्य "अभि त्वा शूर नोनुमः"[a] इति स्वकीयाः । "कया नश्चित्र[7] आभुवत्"[b] इति परकीयाः । वामदेव्यस्य हि ताः स्वभूताः । तत्र रथन्तरं दक्षिणे पक्षे गायेदित्युक्ते[c] कयानश्चित्र आभुवदित्येतास्वपि रथन्तरस्य दर्शनात् । तास्वपि गानं प्रसज्येत । तन्निवृत्त्यर्थं स्वास्विति वचनं ॥ आद्यन्तस्तुब्धेषु "पदाय पदाय स्तोभेत्"[d] इति सामान्यवचनात्[8] प्रतिपादं[9] स्तोभानुषङ्गः प्राप्तः । तन्निवृत्त्यर्थं[10] स्वाध्यायवदिति वचनं । यथाऽध्ययनमित्यर्थः ॥ सर्वत्रेति वचनमध्वर्युसंप्रैषाभावेऽपि गानार्थं । अन्यथा सुब्रह्मण्यस्यैव[11] निवृत्तिः स्यात् । तथा सामान्यप्रैषे[12]ऽपि[13] प्रस्तोतुरेव गानार्थं[14] । अन्यथा स्वयमातृणायां साम[15] गायेति सामान्यप्रैषे[16] उद्गातुरेव गानं स्यात् । "उद्गातैव कुर्यादनादेशे"[e] इति वचनात् । अनादेश इति वचनमग्न्याधेये ब्रह्मा[17] गायेदित्यादेशे सतीति[18]। तन्निवृत्त्यर्थं अनादेश[19] इति[19] वचनं[19] । अत्र[20] जैमिनिनोक्तं । अथ परिगाणानि न गेयानि । न ह्यध्वर्युः संप्रेष्यति । यद्यध्वर्युः संप्रेष्यति। गेयानीति । तथा पदाय पदाय स्तोभाननुसंहरेदित्याचार्यसमयः । यथाऽधीतान्येव[21] गेयानीत्यनुब्राह्मणेन[22] इति ॥

[1] ०रभंते C. [2] स्वाद्यायवत् TD. [3] परिसमानि G. [4] स्वाध्याराद्द० C. [5] G om. [6] G om.; परिकीयाः D (and, orig., C). [7] नचि० D. [8] स्वस्वतिव० C. [9] प्रतिपदं G. [10] तंनिवृत्यर्थं G. [11] ०ण्यस्योप G. [12] ०प्रैषेण C; सामानि प्रैषे G. [13] C om. [14] गानात् G. [15] समा G. [16] ०प्रैषेण C. [17] ब्रह्म G. [18] सति D. [19] D om. these three words; G om. वचनं. [20] G om. अत्र. [21] C om. एव. [22] ब्राह्मणत C.

[a] SV. II, 1, 1, 11, 1. [b] SV. II, 1, 1, 12, 1. [c] 2, 1, 15. [d] 2, 2, 2. [e] 1, 1, 4.

तृचापत्तीनि[1] तृचेषु चिरितराणि[2] ॥ २ ॥

यानि तृचमापन्नानि तृचस्थानि[3] रथन्तरादीनि परिसामानि । तानि तिसृष्वप्यृचु[4] गायेत् । इतराण्येकर्चापत्तीनि ऋग्गृहीतानि[5] च प्रजापतेर्हृदयादीनि तानि त्रिस्त्रिर्गायेदिति ॥ अथ प्रवर्ग्यसामसु विशेषमाह ॥

शार्ङ्गारूढवदाङ्गिरसे[6] वा चिरभ्यस्येदन्तरा पराचा[7] ॥ ३ ॥

"अञ्जन्ति घर्मं तत्र शार्ङ्गम्"* इत्यादिना प्रवर्ग्यसामानि वक्ष्यति । तत्र प्रथमं साम शार्ङ्गसंज्ञकं । आरूढवदाङ्गिरसमुत्तमं साम । एते एव द्वे सामनी प्रवर्ग्यप्रचारे[8] त्रिरभ्यस्येत् । तयोरन्तरा यत्सामजातं । तेन पराचा सकृदुक्तेनैव[9] गायेत् । नाभ्यस्येत् । पराचेति तृतीयैकवचनं । वाशब्दोऽवधारणार्थः । न पुनर्विकल्पार्थ इति ॥ अन्तरा नाभ्यस्येदित्यत्र हेतुमाह ॥

तथा च होता ॥ ४ ॥

प्रवर्ग्यप्रचारे होताऽपि तथैव घर्ममभिष्टौति । प्रथमोत्तमे ऋचौ त्रिरुक्त्वा मध्यपतिताः सर्वाः सकृदेव होता ब्रूयात्[10] । तद्वत् प्रस्तोताऽपि मध्यपतितेन सामजातेन[11] पराचैव गायेदिति ॥ हेत्वन्तरं चाह ॥

लिङ्गोपपत्तिश्चैवम्[12] ॥ ५ ॥

एवं पराचा गाने क्रियमाणे सति प्रवर्ग्यसाम्नामनुष्ठेयार्थप्रकाशनरूपलिङ्गोपपत्तिः । अभ्यासे तु[13] क्रियमाणे कालविलम्बादुत्तरोत्तरानुष्ठेयस्य[14] मन्त्रात्[15] प्रकाशनं न स्यादिति ॥

अन्तरेण चात्वालोत्करौ[16] संचरः[17] सर्वत्रानादेशे ॥ ६ ॥

चात्वालोत्करावध्वर्युप्रसिद्धौ । तयोर्मध्यदेशेन संचरः सर्वदेति[18] ॥

[1] तृचापत्ति G. [2] तृणितराणि Tg. [3] ०स्थानानि G. [4] तिसृषु ऋत्स्वपि C; D cancels अपि. [5] ऋग्विहितानि C; सकृद्गृहीतानि G. [6] शाङ्गा० TG; शार्गा० R. [7] पराचा TD; पराच Tg. [8] प्रवर्ग्ये प्रचरेत् G. [9] G om. एव. [10] ब्रूते C. [11] सामाजातेन D. [12] लिङ्गोपतिश्चैवमिति C. [13] G om. [14] कालविलंब उ० G. [15] मंत्रान् C. [16] ०त्कारौ TG. [17] संचारः TG. [18] सर्वत्रानादेशे इति C.

* 2, 2, 25.

तदाम्नानं[1] तीर्थम् ॥ ७ ॥

चात्वालोत्करयोर्यन्मध्यं[2] तदाम्नानसंज्ञकं तीर्थं। संचरमार्गः[3] संज्ञाकरणं व्यवहारार्थं। "यो भूयो जिगमिषेत्[4] । आम्नानेन स गच्छेत्"[a] इति ॥

अग्नौ चीयमाने पश्चिमेन पुच्छं गत्वा दक्षिणेऽपिकक्षे[5] तिष्ठेद्यत्र[6] वोपदध्युः ॥ ८ ॥

परिसामगानार्थं प्रस्तोतेति शेषः । यत्राध्वर्यव इष्टकोपधानं कुर्युः । तत्र वा तिष्ठेदपिकचे[7] वेति विकल्पः ॥ अथ कोऽयमपिकचो नाम तमाह ॥

पश्चिमेन पक्षावपिकक्षौ[8] ॥ ९ ॥

अग्निपचयोः पश्चिमौ[9] देशावपिकचौ[9] पश्चिमेनेत्येनप्प्रत्ययान्तो[10]ऽयं । न तृतीयेति[b] ॥

पूर्वेणोपपक्षौ[11] ॥ १० ॥

पचावित्यनुवर्तते । पचयोः[12] पुरा[13] द्वौ[13] देशौ । तावुपपक्षाविति[14] ॥

पुष्करपलाश उपधीयमाने हिरण्मये पुरुषे स्वयमातृणासु[15] च शर्करासु व्याहृतिसामानि गापयेद्यजमानं "सत्यं पुरुषो भूर्भुवः स्वः" इत्येतासु[16] पृथक् ॥ ११ ॥

प्रथममध्यमोत्तमासु चितिषु तिसृषु[17] स्वयमातृणाः शर्कराः । पुष्करपर्णादिषु[18] पञ्चस्विष्टकासूपधीयमानासु सत्यं पुरुषो भूर्भुवः स्वरित्येतासु पञ्चसु व्याहृतिसामानि[19] क्रमेण यजमानं पृथक्[20] प्रस्तोता गापयेदिति[21] ॥

[1] तदाम्नानं TG. [2] ०न्मध्यमं G. [3] संचरार्थः C. [4] जिगिमि० G. [5] पिपचे (?) D; पिवचे (or पिपचे ?) TG. [6] ०द्यथ G. [7] D corr. to ०पचे. [8] ०पिकचावपि G. [9] पश्चिमदेशाव० G. [10] ०नपप्र० D; ०नाच् प्र० G. [11] ०णोपपक्षयौ Tg, R; ०णोपपक्षयाविति C; ०णोपपक्षवयावि G. [12] पचेयो D. [13] पुरस्ताद्वौ G. [14] तावुपपक्षवयाविति G (as in Sūtra); तावुपलयाविति C. [15] स्वयमासुणासु Tg. [16] सुवरि० all Grantha MSS; ०रित्येतत्सु TG. [17] C om. [18] G inserts च. [19] व्याहृतिषु सा० D. [20] G ins. यजमानं once more. [21] In C the Comm. breaks off after ०धीयमाना (०सु सत्यं etc. being left out).

[a] 5, 2, 24. [b] Cp. Pāṇ. 5, 3, 35.

तेषां स्थाने स्वयं चिन्वान[1] ऋतनिधनमाज्यदोहं[2] पुरुषव्रतमेकानुगानं रथंतरं वामदेव्यं बृहदिति ॥ १२ ॥

स्वयं चिन्वान इति सप्तमी। अध्वर्युर्यजमानो वा स्वयं चिनुयादिति। यजमानस्य चयनं विकल्पेन विहितं। यजमाने स्वयं चिन्वाने सति तेषां व्याहृतिसाम्नां स्थाने आज्यदोहादीनि पञ्च सामानि[3] यजमानमेव गापयेत्। ऋतनिधनमित्याज्यदोहविशेषणं। एकानुगानमिति पुरुषव्रतविशेषणं। केचित्तु स्वयं चिन्वान इति प्रथमान्तं प्रस्तोतुर्विशेषणमित्याहुः[a]। तदयुक्तं। प्रस्तोतुश्चयनविध्यभावादिति ॥

रथंतरप्रभृतीनि विकल्पन्ते[4] लोकसामभिरावृत्तैः ॥ १३ ॥

रथंतरं वामदेव्यं बृहदिति त्रीणि सामानि विकल्पन्ते लोकसामभिः प्रतिलोमैरित्यर्थः। आर्षेयब्राह्मणे "त्रीणि लोकानां व्रतानि। दिवो ऽन्तरिक्षस्य पृथिव्या इति"[b] लोकसामानि दर्शितानि। "मन्ये वां द्यावापृथिवी सुभोजसौ"[c] इत्यस्यामृचि प्रथमं लोकसाम वाग्वाग्वागीयं[5]। "कया नश्चित्र[6] आभुवत्"[d] इति[7] द्वितीयं[8]। पुनश्च। "मन्ये वाम्" इत्येतस्यामेवर्चि "प्रतिष्ठा ऽसि प्रतिष्ठा" इति स्तोभोपक्रमं[9] तृतीयं लोकसाम। तत्र प्रतिलोमैरिति वचनात् तृतीयरथन्तरयोर्विकल्पः। द्वितीयवामदेव्ययोर्विकल्पः। प्रथमबृहतोर्विकल्पः ॥

संचितमग्निं[10] दक्षिणेन[11] गत्वा "अग्न आयूंषि"[e] इति प्रत्यङ्मुखस्तिष्ठञ्छिरसि[12] गायत्रं गायेन्निरुक्तम् ॥ १४ ॥

अग्निचयनं समाप्य[13] यदा मण्डूकविकर्षणान्तं कर्माध्वर्युणा कृतं। तदग्निः[14] संचित इत्युच्यते। संचितमग्निं दक्षिणेन गत्वा ऽग्निशिरःसमीपे[15] तिष्ठन् गायेत्। न धिष्ण्यमासा-

[1] चिन्वन Tg. [2] ऋतुनि° TD. [3] In C the Sūtra and Comm. up to here is left out; the Sūtra is added, *sec. manu*, in the margin. [4] विकल्पते TD, D. [5] वाक् वाक् वा गीयं D, C; वाक् वा गीकैयां। G. [6] नंचित्र D. [7] D om. ति. [8] C adds लोकसाम. [9] °पकर्म्म G. [10] सहित° (?) TG. [11] दक्षिणे C. [12] प्रत्यम्मु° Tg. [13] समीप्य C. [14] यदाग्निस् G. [15] ग्नेः शि° G.

[a] Thus Rudraskanda. [b] Ārṣ. Br. ii, 20, 7-8. [c] SV. I, 7 (Ār. S.), 4, 8. [d] SV. I 2, 2, 3, 5. II, 1, 1, 12, 1. [e] SV. II, 6, 3, 10, 3. 7, 1, 12, 1.

दयेदिति[1] श्रुतेः। "अनिरुक्तं गेयम्" इति ब्राह्मणेन[a] गायत्रस्य सामान्येनानिरुक्तगानविधानात्तन्निवृत्त्यर्थं[2] निरुक्तमित्युक्तं। अनिरुक्तगानं[3] नाम केवलं प्रणवेनैव[4] गानमिति[5] सूत्रकारो गायत्रपटले[b] वक्ष्यति। निरुक्तगानं[6] तु[6] प्रत्यक्षमृगक्षरेणैव गानमिति ॥

प्रत्याव्रज्य[7] रथंतरं दक्षिणे पक्ष उदङ्मुखः पश्चाद्वा प्राङ्मुखः ॥ १५ ॥

प्रत्याव्रज्य रथंतरं दक्षिणे पक्षे दक्षिणत उदङ्मुखस्तिष्ठन्[8] गायेदिति ॥

पश्चिमेन[9] पुच्छं गत्वा बृहदुत्तरे पक्षे दक्षिणामुखः पश्चाद्वा प्राङ्मुखः ॥ १६ ॥

स्पष्टं ॥

प्रत्याव्रज्य यज्ञायज्ञीयं पुच्छे[10] संवत्सरश्चेद्दीक्षाः[10] सौत्यो वा[11] ॥ १७ ॥

बृहद्गानानन्तरं प्रत्याव्रज्य पुच्छस्य पश्चात्तिष्ठन् यज्ञायज्ञीयं गायेत्। यदि क्रतोः कृत्स्नः[12] संवत्सरो दीक्षाकालः स्यात्। सुत्याकालो वा यथा[13] गवामयनं[13] तापश्चितादेरिति ॥

ऋतुष्ठायज्ञायज्ञीयमन्यत्र[14] ॥ १८ ॥

संवत्सरदीक्षासुत्याद्गवामयनादेरन्यत्र ज्योतिष्टोमादावृतुष्ठायज्ञायज्ञीयं[15] पुच्छे गायेदिति ॥

वामदेव्यं दक्षिणेऽपिकक्षे ॥ १९ ॥

प्रजापतेर्हृदयमुत्तरे[16] ॥ २० ॥

द्वयमपि[17] स्पष्टमिति ॥

[1] धिष्यमा° C. [2] °विधानातनिवृ° D. [3] अनिरुक्तं G. [4] G om. एव. [5] गामनमिति D. [6] °गानस्तु D. [7] प्रत्याव्यज्य TD. [8] °स्तेष्ट C. [9] पश्चिमे D. [10] पुच्छेत्संवत्स° TD, Tg; °श्चेद्दिक्षः TD. [11] TG om. वा. [12] कृत्स्नं G. [13] यथार्त्यवामयन G. [14] चतुष्ठा° TG. [15] °दाप्रतिष्ठाय° G. [16] °पतेर्ध्यदमु° TG; उतरत Tg. [17] द्वयमिति G.

[a] PV. Br. 7, 9, 17. [b] Paṭ. 21.

एतानि[1] गौतम उत्तरेणाग्निं गत्वा ॥ २१ ॥

एतानि सामानि उत्तरेणाग्निं गत्वा प्रारभेतेति[2] गौतमः। दक्षिणेनाग्निं गत्वेति[a] स्वमतं पूर्वमुक्तमिति ॥ अथ मतान्तरमाह ॥

एतान्येव प्रदक्षिणं प्रत्यन्ताद्धानंजय्यः ॥ २२ ॥

एतान्येव गायत्रादीनि[3] शिरःप्रभृति यावदुत्तरं पक्षं प्रदक्षिणं गायेत्[4]। न पुनः पुनः प्रत्यावृज्य गायेदित्यर्थः ॥

यज्ञायज्ञीयं पुच्छे ॥ २३ ॥

सर्वेष्वपि क्रतुषु यज्ञायज्ञीयमेव पुच्छे[5]। न पुनर्ऋतुष्ठायज्ञायज्ञीयमिति ॥

प्रजापतेर्हृदयस्थाने च वामदेव्यम् ॥ २४ ॥

प्रजापतेर्हृदयस्थाने[6] च[6] वामदेव्यमेव[6] गायेत्। चकारात् स्वस्थानेऽपि। एतदन्तं धानंजय्यमतमिति ॥ मतान्तरमाह ॥

दक्षिणेनाग्निं गत्वा गौतमीये व्यत्ययं ये पक्षयोः शाण्डिल्यः ॥ २५ ॥

शाण्डिल्यस्तु गौतममत[b] एव स्थित्वा ये[7] पक्षयोः[8] सामनी। तयोर्व्यत्ययमाह। गमनं च दक्षिणेनाग्निमित्याहेति ॥

शिरसि च गीत्वोत्तरे पक्षे ॥ २६ ॥

शिरसि च[9] गीत्वा तदनन्तरमेवोत्तरे पक्षे रथंतरं गायेदिति ॥

यथागीतमितराणि ॥ २७ ॥

इतराणि बृहत्प्रभृतीनि सामानि गौतममते यथागीतं तथा गायेदिति ॥

[1] TG ins. सामानि. [2] प्रारभतेति C. [3] गायत्र्यादीनि G; गायत्रीदीनि आ समाप्तेः C. [4] गायेति C. [5] G om. [6] G om. [7] C om. [8] यक्षयों C. [9] G om.

[a] 2, 1, 14. [b] 2, 1, 21.

उत्तरे चोपप्लवे[1] स्वं[1] हृदयदेशमालभ्य[1] प्रजापतेर्हृदयम् ॥ २८ ॥

स्वमात्मीयं हृदयदेशमालभ्योपप्लवे[2] प्रत्यङ्मुखस्तिष्ठन् प्रजापतेर्हृदयं गायेत् । चकारात् स्वस्थानेऽप्युत्तरेऽपिकक्षे[3] गायेत्[4] । एतदन्तं[4] शाण्डिल्यमतमिति ॥ अथ सर्वमतसाधारणमाह ॥

अध्वर्युपथे श्यैतम् ॥ २९ ॥

आक्रमणेष्टकासमीपमध्वर्युपथः[5] । तत्र स्थित्वा सर्वान्ते[6] श्यैतं गायेदिति ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ५ ॥

अथ प्रवर्ग्योद्वासनमधिकृत्याह ॥

प्रवर्ग्यवत्युत्तरेण सम्राडासन्दीं गत्वा पश्चात्तिष्ठन्नध्वर्युप्रेषितस्त्वग्नायिरिति[7] गायेत्[8] ॥ १ ॥

प्रवर्ग्यवति क्रतौ[9] प्रवर्ग्योद्वासनकाले सम्राडासन्दीमुत्तरेण गत्वा तस्याः पश्चात्तिष्ठन्नध्वर्युप्रेषितस्त्वग्नायिरिति[10] गायेत् । प्रवर्ग्यसामान्यनुक्त्वैव[11] तदुद्वासनसाम्नां प्रथमं[12] विधानं[12] प्रवर्ग्यसाम्नामनित्यताज्ञापनार्थं। तथा च वक्ष्यति। "न वा कुर्यात्"[a] इति। प्रवर्ग्यवतीति विशेषणं। प्रथमयज्ञे प्रवर्ग्यनिषेधात्[13] । प्रवर्ग्योद्वासनविषयमेतद्विधानमिति[14] वक्ष्यमाणसूत्रपर्यालोचनयाऽवगन्तव्यं[15] । ननु । एवं प्रवर्ग्यवतीति व्यर्थविशेषणं। सत्यं[16] ।

[1] °प्लवेत्स्वं हृ° TD; °प्लवे सं हृ° TG; °प्लये स्वं हृ° D; °प्लये स्वहृ° Tg; °प्लवये स्वं हृ° G; °ब्लये स्वं R; °ठलये स्वं हृदयमालभ्य C (om. देशं). [2] °प्लये D; °भ्य उत्तर उपप्लये G (not, as elsewhere, °प्लवये). [3] D corr. to °पक्षे. [4] गायेद्यतदन्तं G. [5] अक्रमणे° C; क्रमणे° D; °पथं D, C. [6] सर्पान्ते G; समीपे C. [7] अध्वर्युः प्रेषितस्त्वमा इरिति G; °स्त्वग्ना इरिति Tg; °स्यन्ता इरिति TG; °स्त्वग्नायोरिति D. [8] भावेत् TG. [9] क्रत्वा G. [10] अध्वर्युः प्रेषितः। त्वग्ना इरिति G; °त्स्यमायोरिति D. [11] °नूक्त्वैव C. [12] प्रथमविधानं G. [13] C leaves out a passage: साम्नां प्रथमं— प्रवर्ग्य (thus: तद्रुद्वासन निषेधात्). [14] °द्वाशन° C. [15] °गतस्य C. [16] D om.; C ins. स्यु.

[a] 2, 2, 18.

विस्पष्टार्थं[1] केचित्तु "प्रवर्ग्योद्वासन उत्तरेण" इत्येव पठन्ति ॥ अत्र प्रवर्ग्योद्वासने "प्रस्तोतः[2] साम[2] गाय"[a] इति[2] त्रिः प्रैषो[3] भवति । प्रतिप्रैषं सकृत्सकृत्सामगानं[4] निर्वचनस्य समुदायसिद्धत्वादित्येके । प्रतिप्रैषं त्रिर्गानमित्यन्य इति ॥

पदाय पदाय स्तोभेत् ॥ २ ॥

"अग्निं होतारं मन्ये दास्वन्तम्"[b] इत्यस्यामृचि प्रतिपादं त्यमायिरिति[5] स्तोभमाहरेदिति[6] ॥

निधनायैव स्तौभीं वाचं[7] विसृजेत् ॥ ३ ॥

त्यम्नायिरिति[8] स्तोभान्तगतां[9] वाचं वा शब्दमित्यर्थः । तां निधनायैव ब्रूयात् । न प्रतिपादमित्यर्थः ॥

उपग्रहप्रभृतीनि स्वरयन्त[10] उपेयुर्ये घर्मे[11] उपयुक्ताः[11] स्युः ॥ ४ ॥

ये घर्मे प्रवर्ग्यप्रचारे उपयुक्ताः समन्विताः । ते सर्वे उपग्रहप्रभृतीनि[12] निधनानि[13] स्वरयन्तो ब्रूयुः । उपग्रहशब्देन निधनात्पूर्वपठित एकार उच्यते । उप[14] समीपे गृह्यते[15] पठ्यते[16] इत्युपग्रह इति । स्वरयन्त इति वचनं प्रथमद्वितीयार्थं । तृतीयस्याध्ययनसिद्धत्वात् ॥

पत्नी च ॥ ५ ॥

उपग्रहप्रभृतीनि[17] निधनान्युपेयादिति शेषः । पत्न्या अपि प्रवर्ग्यसमन्वयादेव सिद्धे पुनर्वचनं[18] यजमानस्य निधनवचनादेव तस्याः कृतकार्यत्वाशङ्कानिवृत्त्यर्थमिति[19] ॥

एवं मध्ये ॥ ६ ॥

मार्गस्य मध्ये[20]ऽप्येवमेव[20] प्रस्तोता गायेत् । सर्वे च निधनं ब्रूयुरिति[21] ॥

प्राप्य चाहवनीयायतनम् ॥ ७ ॥

आहवनीयायतनमुत्तरवेदिं प्राप्य चैवमेव गायेत् । निधनं च सर्वे ब्रूयुः । आहवनीयायतनमिति घर्मोद्वासनदेशोपलक्षणं । तेन नद्यादीपादौ घर्मोद्वासनेऽप्येवमेव कुर्युरिति ॥

[1] स्पष्टार्थं D. [2] प्रस्तोतुस्साम गायति G. [3] प्रैषो G. [4] G has only सकृत् गानं. [5] त्यमायीरिति D; त्यमा ईरिति G. [6] स्तोममा° D. [7] वाचे C. [8] °यी° D; त्यमा इति G. [9] स्तोभगतां G. [10] स्वरवन्त TG. [11] घर्मोपयुक्ता G, TG; कर्मोपयुक्ता Tg. [12] उपगूह° C. [13] निधानीनि C. [14] D, C om. [15] गृह्येते G. [16] पठ्येते G. [17] °प्रभृति G. [18] G ins. ब्रूयुः, but leaves out rest of the Comm. [19] कृतकार्यत्वात् श° C. [20] मध्येवमेव C. [21] The Comm. on S. 6 is missing in G.

[a] Āp. S'r. 15, 13, 9. [b] SV. I, 5, 2, 3. 9. II, 9, 1, 18, 1.

परिषिच्यमानेऽप[1] उपस्पृश्य वार्षाहरम् ॥ ८ ॥

अध्वर्युणा प्रेषितः[2] परिषिच्यमाने घर्मेऽप[3] उपस्पृश्य वार्षाहरं साम गायेदिति ॥

इष्टाहोत्रीयं परिषिक्ते ॥ ९ ॥

परिषिक्ते घर्मे इष्टाहोत्रीयं साम गायेदिति[4] ॥

तस्य सर्वे निधनमुपेयुः[5] ॥ १० ॥

तस्येष्टाहोत्रीयस्य साम्नो निधनं घर्मोपयुक्ताः सर्वे ब्रूयुरिति[5] ॥

द्वीपं[6] चेद्घर्मपात्राणि[6] हरेयुः[7] संततान्येव[7] गायेन्नाकाङ्क्षेत्परिषेचनम्[8] ॥ ११ ॥

यदि नदीद्वीपे घर्मपात्राण्यध्वर्यवो हरेयुः । तदानीं तं[9] द्वीपं प्राप्य पूर्वोक्तानि त्यमग्ने यिरित्यादीनि[10] त्रीण्यपि सामानि संततान्यविच्छेदेनैव गायेत्[11] । न[12] परिषेचनमाध्वर्यवं[13] प्रतीक्षेतेति ॥

श्यैतं[14] प्रत्याव्रजन् ॥ १२ ॥

इष्टाहोत्रीयगाने कृते प्राग्वंशं प्रत्याव्रजन् प्रस्तोता श्यैतं गायेदिति ॥

तृचे[15] वैकस्यां वा यजमानो निधनमनूपेयात्[16] ॥ १३ ॥

एकस्यामृचि तृचे वा श्यैतनिधनं यजमानोऽपि ब्रूयादिति ॥

पूर्वया द्वारा प्रपद्योत्तरेणाग्नीन्[17] गत्वा पश्चाद्गार्हपत्यस्य तिष्ठन्महावीरायतनं[18] प्रेक्षमाणो वामदेव्यं गायेदिति धानंजय्यः ॥ १४ ॥

महावीरायतनमिति[19] पूर्वं प्रवर्ग्यप्रचारे यन्महावीरस्यायतनमिति ॥

[1] G om. प. [2] G om.; in D added in the margin. [3] पद् G. [4] G om. इति. [5] This S., with Comm., is missing in G. [6] द्वीपतश्चेत् घ° Tg; द्वीपं चे° in D corr. fr. द्वीपश्चे°; द्वीपश्चेत् घर्माचात्राणि TG; G om. [7] G om. [8] °न्नका° TG; गायेत् आ° Tg. [9] G om. [10] त्यमाद्दरि° D. [11] Of the Comm. to this S., the largest portion, up to गायेत् incl., is missing in C; last portion of the Sūtra is in the margin. [12] G om. [13] °मध्वर्यवं G. [14] श्यैतं TG. [15] सतृचे TG. [16] निधनमनुपेयात् TD, D; निधनमुपेयात् Tg; निधनमनुयेयात् TG (!). [17] °ग्निं Tg. [18] °न्महाविरा° Tg. [19] यन्महा° G; °रायतंमिति D.

श्यैतान्तानीति[1] शाण्डिल्यः ॥ १५ ॥

त्यग्नायिःप्रभृतीनि[2] श्यैतान्तानि[3] चत्वार्यैव[4] घर्मोद्वासने गायेत् । न वामदेव्यमावश्यकमित्यर्थः । तथा च जैमिनिः श्यैतान्तान्येवोक्त्वा वामदेव्यं नोक्तवान्[5] । अत्र कश्चिद्वामदेव्यं नित्यमिति मत्वा व्याचष्टे श्यैतान्तान्येव तिष्ठन् गायेत् । वामदेव्यं त्वासीन[a] एवेति । तत्सूत्रानुगुणं न भवतीति ॥

गणः सामान्युत्तराणि[6] ॥ १६ ॥

उत्तराणि यानि सामानि[7] वक्ष्यामः । तानि सर्वाण्येको गणः । तस्य सह प्रवृत्तिः[8] सह वा निवृत्तिरित्यर्थः । तेषां स्वे[9] स्वे विषये विकल्पं वक्ष्यति । तत्र यदेकं[10] कर्तुमिष्यते । तदाऽन्यदपि कर्तव्यं । न पुनरेकस्य करणमन्यस्याकरणमिति वैषम्यं कार्यमित्यनेन सूत्रेणोक्तमिति ॥ अथ तेषां विकल्पमाह ॥

आभिरूप्यात् कर्तव्यानीत्येके[11] ॥ १७ ॥

तेषां साम्नां तत्र तत्र कर्मण्याभिरूप्यात्[12] क्रियमाणकर्माभिवादित्वात् कर्तव्यानीत्येक इति[13] । तथा च जैमिनिः । सर्वेष्टिपशुसोमेषु यथालिङ्गं यथादैवतं[14] च सामानि गायेदिति ॥

न वा कुर्यात् ॥ १८ ॥

न हि वचनाभावे लिङ्गमात्राद्गानं युक्तमिति भावः ॥

स्वे[15] वा यज्ञे कुर्यादित्येके ॥ १९ ॥

स्वकीये यज्ञे सत्त्वेष्ववश्यं कुर्यादित्येक इति ॥

याथाकामी[16] वा ॥ २० ॥

स्वकीयेऽपि यज्ञे यथाकाम्यं वा स्यात् । कुर्याद्वा न वेत्यर्थः ॥

[1] श्येता° Tg. [2] त्यग्नाद्:प्र° G. [3] °न्तान्येव D, C. [4] °र्येवं D. [5] नोक्तत्वात् G.
[6] समान्यु° C. [7] समानि C. [8] सह वा प्र° C. [9] स्व D; स्वे C. [10] यद्यदेकं G.
[11] कर्तव्यमित्येके G. [12] कर्माभिरूप्यात् G. [13] C om. this Comm. up to °त्येक इति.
[14] यथा वै देवतं D. [15] स्वो Tg. [16] यथा° TG, TD, C; यथाकाम्यं G.

[a] Rudraskanda.

दीक्षणीयायां[1] तार्क्ष्यसामनी[2] गायेत् "त्यमू षु"[a] इत्येते ॥ २१ ॥

दीक्षणीयायामिष्टौ प्रधानयागकाले गायेत् । अङ्गानां प्रधानयागकालत्वात्[3] स्पष्ट-मन्त्राह[4] जैमिनिः । यानि पशौ शिष्टानि सामानि । वपान्ते तानि गायेत् । प्रधानकाल[5] उपसत्सु[6] चेष्टिषु चेति । तथा प्रागावृत्तस्तिष्ठन्नुपविष्टो वा मध्यमया वाचा[7] गायेदिति ॥

प्रायणीयायां प्रवद्भार्गवम् ॥ २२ ॥

स्पष्टमिति ॥

उदयनीयायामुद्वत्[8] ॥ २३ ॥

भार्गवमित्यनुवर्तते इति ॥

आतिथ्यायां गायत्रीसामौशनम् ॥ २४ ॥

औशनस्य[9] विशेषणं गायत्रीसामेति गायत्र्यामृचि गीयमानमित्यर्थः ॥ अथ प्रवर्ग्य-सामान्याह ॥

अञ्जन्ति[10] घर्मं[11] तत्र शार्ङ्गम्[12] ॥ २५ ॥

प्रवर्ग्यप्रचारे घर्मं महावीरमध्वर्यवोऽञ्जन्ति । तदा शार्ङ्गं गायेत् । अत्र जैमिनिः प्रवर्ग्यसामान्यधिकृत्याह । अन्तरेण वेद्युत्करौ प्रपद्यापरेण होतारं परीत्य दक्षिणतो घर्ममभिमुख[13] उपविश्य[13] गायेदिति ॥

रजतजातरूपे उपदधति[14] तच्छुक्रचन्द्रे[15] ॥ २६ ॥

रजतं च जातरूपं च द्वे रुक्मे[16] क्रमेणोपदधत्यध्वर्यवः । तदानीं शुक्रचन्द्रसामनी[17] गायेदित्यर्थः ॥

[1] दीक्षिणी॰ Tg; दीक्षिणि॰ G. [2] ॰सामानि TG; ॰सामानी C. [3] G om. याग. [4] स्पष्टमंत्राह C; स्पष्टं त्वाह G. [5] प्रधानयागकाल C. [6] उपत्सु C. [7] G om. [8] Tg adds भार्गवं. [9] उशनस्य C. [10] अंजति TD. [11] -धर्मं C. [12] शार्गं Tg, R. [13] ॰भिमुखोपवि॰ G. [14] ॰धाति R 1; उपधति C. [15] तत् शुक॰ D. [16] रु only C. [17] शुकचंद्र॰ D.

[a] SV. I, 4, 1, 5, 1.

अभीन्धते[1] तद्धर्मस्य[2] तन्वौ[2] ॥ २७ ॥

घर्ममित्यनुवर्तते। घर्ममभीन्धते[1]ऽध्वर्यवः[a] तदानीं घर्मस्य तन्वौ गायेत्। अत्र केचिद्घर्मतन्वौ गीत्वा तदनन्तरं महावैश्वानरव्रतादीनि[3] कानिचित्सामानि घर्माभिरूपत्वाद्गेयान्याहुः। तच्चिन्त्यं सूत्रकारेणानुक्तत्वादिति॥

रुचितं प्राहुस्तद्धर्मस्य वा रोचनमिन्द्रस्य वा ॥ २८ ॥

घर्ममित्यनुवर्तते। रुचितं[4] घर्मं[4] प्राहुरध्वर्यवो "रुचितो घर्मः"[a] इति। तदानीं घर्मरोचनमिन्द्ररोचनं वा गायेदिति॥

धेनुमुपसृजन्ति[5] तद्धेनु[6] ॥ २९ ॥

धेनुं वत्सेन योजयन्त्यध्वर्यवः[a] तदानीं धेनुसाम गायेत्॥ तत्र स्वाध्यायवद्गाने प्राप्ते विशेषमाह॥

तस्य देवतासु सोपायं[7] स्तोभमाहरेदनुपायं पादायाभ्यस्येदुत्तमं पादं पञ्चनिधनवदिति गौतमः ॥ ३० ॥

"स्वादिष्ठया" इत्यस्यामृचि[b] प्रतिपादं पुरस्तादेकैका देवताम्नाता। "भुवदिडा जनदिडा वृधदिडा" इति[8]। तृतीयपादस्योपरिष्टाच्चैका देवता[9] "करदिडा" इति[10]। तदनन्तरं सोपायस्तोभः तदन्ते देवताभूतं निधनं। सामोपक्रमे[11] च निरुपायस्तोभः[10]। एवं स्थितमिदमाह[12]। तस्य धेनुसाम्नो देवतासूच्यमानासु सोपायं स्तोभं प्रत्येकं प्रत्येकं पुरस्तादाहरेत्। उपायरहितं स्तोभं पदाय[13] पदाय[13] पुरस्तादाहरेत्। तथा "स्वादिष्ठया" इत्यस्या उत्तमं पादं "करदिडा" इति चतुर्थदेवतानन्तरमावृत्याभ्यसेत्। अस्य तृतीयस्यापि[14] दृष्टान्तः। पञ्चनिधनवदिति। यथा "कया नश्चित्र आभुवत्" इति। पञ्चनिधने वामदेव्ये

[1] अभिधन्ते D (corr. *sec. manu* to अभीधन्ते). [2] तत् घर्मतन्वौ Tg. [3] महावैश्वानरप्रभृतादीनि D; °नरप्रभृत्यादीनि C. [4] क्वचित् प्र घर्मं C. [5] °सृन्ति Tg. [6] °नुः Tg; °नुम् R. [7] TD om. anusvāra. [8] In C the beg. of this Comm. is wanting up to here. [9] देवत्यं D. [10] For करदिडेति—स्तोभः, C has कराद। निकपाय स्तोभ। [11] सामोपक्रमोपक्रमे G. [12] स्थितमाह G; स्थित इदमाह D. [13] पादाय पादाय C; D corr. पा to प. [14] चित यस्यापि D, C.

[a] S'.Br. 14, 1, 3, 33; S'āṅkh. S'r. 5, 9, 25 (29); Āp. S'r 15, 8, 13. [b] SV. I, 5, 2, 4, 2; II, 1, 1, 15, 1.

निधनभूतासु देवतासु प्रत्येकं सोपायस्तोभ आम्नातः प्रतिपादं निरुपायस्तोभः। उत्तमस्य पादस्यतुर्थनिधनानन्तरमभ्यस्येत्तद्वदिति[1]। अत्र तथाऽध्ययनाभावेऽपि पञ्चनिधनवामदेव्याध्ययनं निदर्शनार्थमिति गौतमाभिप्रायः। अत्रोपायशब्देन स्तोभान्तरगतो वा शब्दोऽभिधीयते। तस्य सर्वेषु सामसु निधनोपायत्वात्। निधनलक्षणत्वादित्यर्थः। तथा च वक्ष्यति। "तान्यन्तःसाम निधनानि[2] वाक्[2] चेत् स्तोभान्तोऽनन्तरः"[a] इत्यादीनि[3]॥ मतान्तरमाह॥

समस्येत् पद्देवते[4] इति[4] शाण्डिल्यः॥ ३१॥

पादं च देवतां च[5] समस्येत्। न तयोः पृथक् पृथक् स्तोभमाहरेदिति[6] शाण्डिल्यः। तस्याप्युत्तमपादस्याभ्यासः[7] संमत एव निषेधाभावात्। तन्मते पञ्चकृत्वः स्तोभाहरणं। तत्र यथाऽध्ययनं सामान्ते सोपायस्तोभः तत्पूर्वं[8] देवता चतुष्टये निरुपायस्तोभ इति॥ मतान्तरमाह॥

नोत्तमं पादं पुनरभ्यस्येदिति वार्षगण्यः॥ ३२॥

उत्तमपादाभ्यासे[9] प्रमाणाभावान्नाभ्यासः[10] कार्यः। पञ्चनिधने तु वामदेव्येऽध्ययनसिद्धोऽभ्यास इति वैषम्यं। तन्मतेऽपि पद्देवतयोः[11] समासे नैव स्तोभाहरणं। पञ्चकृत्व इति समानं। ननु च। तत्पक्षे केवलचतुर्थदेवतायाः[12] स्तोभाहरणं[13] न प्राप्नोति। ततः पूर्वं समस्तयोरेव पद्देवतयोः स्तोभाहरणात्॥ अत आह॥

शेषं यथा मरुतां भूतौ[14] तथा समापयेत्[15]॥ ३३॥

यथा "अन्तश्चरति रोचना"[b] इति मरुतां भूतौ सामनि पद्देवतयोः[16] समासे नैव पूर्वं स्तोभमाहृत्य पश्चात् केवलदेवताया[17] अपि स्तोभाहरणमाम्नातं। तद्वदत्रापि चतुर्थदेवताप्रभृति[18] शेषं समापयेत् केवलदेवताया अपि स्तोभमाहृत्यैव[19] समापयेदित्यर्थः॥

[1] °भ्यस्यते तद्वदिति G. [2] निधानवाक् C. [3] इत्यादीति D. [4] पद्देवते इति R; पद्देवतेति Tg. [5] C has पादत्वं देवतांना च. [6] स्तोभं नाह° C. [7] °पदस्या° G. [8] ततःपू° G. [9] °भ्यासे G. [10] °भावानाभ्यासः D. [11] बहुदेवतयोस् G. [12] तं चतुर्थदे° D. [13] स्तोभहरणं G. [14] भूमौ R 1. [15] This Sūtra is wanting in TG. [16] °दैव° G. [17] °देवता G. [18] °देवताप्रति C. [19] °हृत्य एवं G.

[a] 20, 4, 32. 33. [b] SV. II, 6, 1, 11, 2.

पय आहरन्ति[1] तत्पयः[2] ॥ ३४ ॥

पय आहरन्त्यध्वर्यवः । तदानीं पयःसंज्ञकं साम गायेदिति ॥

आसिञ्चन्ति[3] तत्सिन्धुषाम "आ त्वा विशन्तु"[a 4] इति[4] ॥ ३५ ॥

महावीरे पय आसिञ्चन्ति[5] । तदानीं सिन्धुषाम[6] गायेदिति[6] ॥

शफाभ्यां परिगृह्णन्ति तद्वसिष्ठस्य शफौ ॥ ३६ ॥

यदा शफाभ्यां महावीरं[7] परिगृह्णन्त्यध्वर्यवः[7] । तदानीं वसिष्ठस्य शफौ ॥

ह्रियमाणे[8] व्रतपक्षौ ॥ ३७ ॥

अध्वर्युभिर्महावीरे ह्रियमाण इति ॥

हुते ऽश्विनोर्व्रते ऽहोरात्रयोर्वा ॥ ३८ ॥

हुते घर्मे अश्विनोर्व्रते अहोरात्रयोर्व्रते वा गायेदिति ॥

रौहिणाभ्यां पुरोडाशाभ्यां चरन्ति तद्राजनरौहिणके ॥ ३९ ॥

स्पष्टमिति ॥

परिघर्म्यं सम्राडासन्द्यां[9] समारोपयन्ति[10] तदारूढवदाङ्गिरसम्[11] "इत[11] एते"[11 b] इति स्वर्निधनम्[12] ॥ ४० ॥

परिघर्म्यं प्रवर्ग्योपकरणं महावीरादिकमध्वर्यवः सादयन्ति । तदानीमारूढवदाङ्गिरसं[13] गायेत् । तस्य साम्न ऊपेति[14] निधनं । तदपोह्य तत्स्थाने स्वरिति निधनं च कुर्यात् । स्वर्निधनमिति[15] बहुव्रीहिः । "आरोहान्" इति पदान्वयादारूढमित्युक्तमिति[16] ॥

अग्निं प्रणयन्ति तच्चाग्नेर्व्रतम् ॥ ४१ ॥

औपवसथ्ये[17] ऽहन्युत्तरवेद्यामग्निं प्रणयन्त्यध्वर्यवः । तदानीमग्नेर्व्रतमनुव्रजन्नेव गायेत् । होतुरनुव्रजनदर्शनादिति[18] ॥

[1] आहरति C. [2] Of this Sūtra only the word पय is left in TG. [3] आसिंचति D. [4] विशन्त्विन्दव इति Tg. [5] आसिंचति D, C. [6] सिंधुषामेति । D, C. [7] परिगृह्णन्ति अध्वर्यः (!) महावीरं G. [8] ह्रीय॰ TD, Tg, G. [9] ॰सद्यां TD, D. [10] ॰रोपयति TG. [11] ॰ङ्गिरसेते TG. [12] स्वं निधनं TG; स्वर्णिधनं C. [13] G ins. साम. [14] उपेति C; एवेति D. [15] स्वं निधन॰ G. [16] ॰रूढवदित्यु॰ D. [17] ॰वसथे G. [18] ॰व्रजन् दर्श॰ C; ॰व्रजन्न दर्श॰ D.

[a] SV. I, 3, 1, 1, 4; II, 8, 2, 2, 1. [b] SV. I, 1, 2, 5, 2.

अग्नीषोमौ[1] तत्रोभयोर्व्रते ॥ ४२ ॥

प्रणयन्तीत्यनुवर्तते । अग्नीषोमौ[1] प्रणयन्त्यध्वर्यवः ' तदानीमुभयोरग्नेः[2] सोमस्य[2] च व्रते गायेदिति ॥

सुत्यायां यज्ञसारथि प्राक् प्रातरनुवाकोपाकरणादाग्नीध्रीये ऽहरहः ॥ ४३ ॥

सुत्यादिवसे प्रातरनुवाकोपाकरणात् पूर्वमाग्नीध्रमण्डप[3] उपविश्य[3] यज्ञसारथि गायेत् । एवमहरहरहीनेष्विति ॥

सत्त्रे[4] सत्त्रस्यर्द्धि[5] ॥ ४४ ॥

सत्त्रेषु यज्ञसारथिस्थाने सत्त्रस्यर्द्धि[6] गायेदिति ॥

उक्षा चेदनूबन्ध्य[7] औक्ष्णोरन्ध्रे[8] ॥ ४५ ॥

अवभृथोत्तरकालमनूबन्ध्यः[9] पशुरस्ति । स[10] चेदुक्षा[10] स्यात् ' तदानीमौक्ष्णोरन्ध्रे साम्नो वपान्ते गायेत् । यानि पशौ शिष्टानि ' तानि वपान्ते[11] गायेदिति जैमिनिवचनात्[a] । अत्र केचिदाग्नीध्रीये[12] गानं कार्यमित्याहुः । अन्ये तु विशेषवचनादङ्गानां[13] प्रधानदेशत्वादाहवनीयसमीपे[13] गानमित्याहुरिति ॥

ऋषभ आर्षभम् ॥ ४६ ॥

अनूबन्ध्य[14] इति विपरिणतमनुवर्तते । ऋषभ[15] अनूबन्ध्ये[16] सत्यार्षभं साम गायेदिति ॥

उन्नते नैककुभम् ॥ ४७ ॥

उन्नत उच्छ्रितपृष्ठो गौरिति ॥

वशायां वाशम्[17] ॥ ४८ ॥

वशा बन्ध्येति[18] ॥

[1] अग्निषो॰ C. [2] ॰भयोरस्त्वान्नूमे स्य G. [3] ॰पे उप॰ D; ॰पमुप॰ G. [4] सत्रेषु TG, Tg. [5] ॰स्यधिरिति C. [6] ॰स्यर्धी D. [7] चेदनूबद्ध्य TG; ॰नुवध्य TD. [8] रध्रे TD; रन्ध्रं Tg; रंध्रमिति C. [9] अवभृतथोत्त॰ D; ॰नुब॰ D, G. [10] स ये उचा C. [11] षपांते C. [12] ॰ध्री । ध्रं पि C. [13] विशेषावचनात् (!) अंगानामप्रधानदेशत्वाच्च आह॰ G. [14] अनु॰ D, G. [15] C reads अनूबंधविपरिनतमिति ध्य । [16] अनु॰ D, C, G. [17] वाशि TG. [18] वन्ध्येति G.

[a] Cp. 2, 2, 21 Comm.

अज[1] आजिगम् ॥ ४९ ॥

मेष और्णायवम्[2] ॥ ५० ॥

स्पष्टे इति ॥

पयस्यायां स्वरं[3] पयोनिधनम् ॥ ५१ ॥

यद्यनूबन्ध्यास्थाने[4] पयस्यामामिचां कुर्युः । तदा पयोनिधनं स्वरसंज्ञकं[5] साम[6] गायेदिति[6] ॥

उदवसानीयायामुद्वंशीयम्[7] ॥ ५२ ॥

स्पष्टमिति ॥

उपक्रम्य समापयेदाक्रतोरपवर्गात्[8] ॥ ५३ ॥

यदि[9] दीक्षणीयायां[9] तार्क्ष्यसामोपक्रान्तं स्यात् । तदा तत्प्रभृतीन्युद्वंशीयान्तानि[10] सर्वाणि सामानि समापयेत् । किंचित् कृत्वा किंचिन्न[11] त्यजेदित्यर्थः[11] । "गणः सामान्युत्तराणि"[a] इति यत्पूर्वमुक्तं तस्यैतन्निगमनं विस्पष्टार्थः ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ ६ ॥

[1] कश्चि TG. [2] और्णायु° G. [3] स्वारं Tg, G, C; स्वायं TG. [4] °नुब° G. [5] °सज्ञिकं G. [6] समागा° G. [7] °सानीयामु° C; °मुद्घिंयं TG. [8] °क्रतोपव° G; समापयोगतोरपवत् TG. [9] यद्दीचिणी° G. [10] °भृतीनुद्वं° C. [11] किंचिन्नित्यजे° G; किचितत्यजे° D.

[a] 2, 2, 16.

अथोद्गातुः कृत्यं वक्तुमारभते ॥

औदुम्बरीमुच्छ्रयिष्यन्[1] पूर्वेण देवयजनं गच्छेद्दक्षिणतश्चेदस्यावसथः[2] स्यात् ॥ १ ॥

औदुम्बरी सदसो[3] मध्यमस्थूणा[3] । तामुच्छ्रयिष्यन्नुद्गाता देवयजनस्य पूर्वप्रदेशेन गच्छेत् । यदि देवयजनस्य दक्षिणत[4] उद्गातुरावसथो गृहं स्यादिति ॥

उत्तरेण यद्यन्यतः[5] ॥ २ ॥

यद्यन्यतो[6] गृहं स्यात् । तदा देवयजनस्योत्तरपार्श्वेन[7] गच्छेत् । उभयथाप्याम्नातेन[8] तीर्थेनैव देवयजनस्य प्रवेश इति ॥

पूर्वौ सदसो[9] द्वार्यौ[10] श्वभ्रावन्तरेण प्रपद्यायेणौदुम्बरीं गत्वोदङ्मुखस्तिष्ठन्नध्वर्युणा सहोच्छ्रयेद्दक्षिणोत्तरोत्तानाभ्यां पाणिभ्यां "द्युतानस्त्वा"[11][a] इति[11] ॥ ३ ॥

सदसः पूर्वे[12] द्वारे[12] स्थूणानिखननार्थमवटद्वयमस्ति ॥ तौ श्वभ्रावन्तरेण प्रविश्य प्रागग्रामौदुम्बरीमध्वर्युणा पूर्वमेव निहितामग्रेण गत्वोदङ्मुखस्तिष्ठन्नध्वर्युणा[13] सहोच्छ्रयेद्दक्षिणोत्तराभ्यामुत्तानाभ्यां च पाणिभ्यां[14] "द्युतानस्त्वा" इति ब्राह्मणपठितेन[15] मन्त्रेण । "पृथिवीम्" इत्यन्तेनेति ॥

"आयोः"[b][16] इति[16] श्वभ्रे ऽवदध्यात्[17] ॥ ४ ॥

"आयोष्ट्वा" इत्यादिना "समुद्रस्य हृदये" इत्यन्तेन ब्राह्मणपठितेन मन्त्रेण

[1] Tg ins. उद्गाता. [2] ॰द्दक्षिणश्चे॰ TG; ॰द्दक्षिणतेश्चे D. [3] सदसोर्म॰ G. [4] दक्षिणं D, C.
[5] यदन्यतः TG. [6] यद्यन्यतो C. [7] ॰यजनस्यौत्त॰ G. [8] ॰प्याम्नातेन G; प्याम्यान C; illegible in D. [9] सदसौ TG, Tg. [10] द्वार्यौ Tg; द्वार्या TG. [11] द्वितानस्त्वेति Tg.
[12] पूर्वद्वारे G. [13] गत्योद॰ C; गत्वौद॰ G. [14] G ins. च. [15] G om. पठितेन. [16] आयोती TG.
[17] This S. is missing in R 2, and in R 1 added *sec. manu* in margin.

[a] PV. Br. 6, 4, 2. [b] PV. Br. 6, 4, 3.

अभेऽवदध्यात्[1] अत्र ब्राह्मणं। "तामन्वारभत[2] आयोद्वा" इति। तस्यायमर्थः। अन्वारभ्य[3] मादयेदित्यर्थः। कुतः। "मादयामि"[4] इति मन्त्रलिङ्गात्। सूत्रानुरोधाच्चेति॥

अवधाय जपेत् "नमः समुद्राय नमः समुद्रस्य चक्षसे"[a]। "मा मा यूनर्वा[5] हासीत्"[b]। "ऊर्गस्यूर्जोदा[6] ऊर्जं मे[7] देह्यूर्जं मे[7] धेह्यन्नं मे[7] देह्यन्नं मे[7] धेहि"[c] इति ॥ ५ ॥

ननु च[8] ब्राह्मणपठित एव मन्त्रः किमर्थं पठ्यते। उच्यते। ब्राह्मणे[9] मन्त्रैकदेशानां पृथक् पृथग्विनियोगः प्रतिभाति। तन्निवृत्त्यर्थं[10] कात्स्न्येन[11] पठितत्वाज्जपे[12] विनियुङ्क्ते[13] इति॥

तां[14] न[11] विसृजेदा ऽवच्छादनात् ॥ ६ ॥

तामौदुम्बरीं न विसृजेच्छदिरध्यूहनात्[15d] पूर्वमित्यर्थः॥

अध्वर्युणा ऽभिहुतायां जुहुयात् तस्यैवावृता[16] ऽन्तरेण विशाखे ॥ ७ ॥

अध्वर्युणा ऽभिहुतायामौदुम्बर्यां होमे[17] कृत इत्यर्थः। तस्यैवाध्वर्योरावृता प्रकारेण हिरण्यनिधानादिनौदुम्बर्या[18] विशाखयोर्मध्ये स्रुवेण जुहुयादिति॥

"घृतेन द्यावापृथिवी आप्रीणाथां[19] स्वाहा" इति पूर्वां "प्रजापतये स्वाहा" इत्युत्तराम् ॥ ८ ॥

आहुतिमिति शेषः॥

अन्यतरां वा[20] स्वाहाकारद्वितीयाम्[21] ॥ ९ ॥

पूर्वयोर्मन्त्रयोरन्यतरेणैकामाहुतिं केवलं स्वाहाकारेण द्वितीयामाहुतिमिति पक्षान्तरमिति॥

[1] पदध्यात् D; the beginning of the Comm., आयो°—वदध्यात्, is missing in G. [2] तमन्वा° G. [3] अन्वारभ्यस्यासन् G. [4] सादययामीति C. [5] यूनिर्वा G; युनिर्वा Tg. [6] ऊर्गास्यू° D; उगसूर्ज्जोदा TG. [7] मै Tg (cp. *v. l.* 1, 2, 11). [8] G om. [9] °णा G. [10] G om. [11] कार्स्येन D, C. [12] पठितत्वा जपे D, C. [13] °युक्त D, C. [14] तान्नि C. [15] °ध्यूहात् D; °ध्यूह्नात् C. [16] तस्यैववृता Tg. [17] होम C. [18] °धानादिदौ° D. [19] °थाः TD. [20] व Tg; TG om. [21] °कारां द्वि° TG.

[a] PV. Br. 6, 4, 7. [b] PV. Br. 6, 4, 8. [c] PV. Br. 6, 4, 11. [d] Cp. 2, 3, 17.

यथा भूमिमाज्यं प्राप्स्यतीति[1] ॥ १० ॥

उभयोरपि पचयोर्यथा भूमिमौदुम्बरीमूलमाज्यं प्राप्स्यतीति[2]। तथा प्रभूतमवस्रावयेत्। इतीत्यनेन प्रकारेणेत्यर्थः ॥

आज्यं होमचोदनास्वनादेशे[3] ॥ ११ ॥

स्पष्टमिति ॥

अधस्ताद्विशाखस्य[4] परिगृह्य जपेत्[5] "दिवि[5] देवान्[6] दृंह मयि प्रजाम्" इति ॥ १२ ॥

स्पष्टमिति[7] ॥

"अन्तरिक्षे वयांसि दृंह मयि[8] पशून्"[8] इति[8] मध्ये ॥ १३ ॥

औदुम्बरीमध्यं परिगृह्येत्यर्थः ॥

"पृथिव्यामध्योषधीर्दृंह[9] मयि सजातान्" इति मूले ॥ १४ ॥

मूलं परिगृह्येत्यर्थ ॥

ऊर्ध्वं होमाद्याजमानं[10] धानंजय्यः ॥ १५ ॥

होमादूर्ध्वं[11] यत्कर्म मन्त्रजपात्मकं। तद्यजमानेनैव कर्तव्यं। मयि प्रजां[12] पशून् सजातानिति[13] दृंहेति[14] प्रत्यगाशिष्वादिति[15] ॥

स्वयमिति गौतमशाण्डिल्यौ[16]। यां वैकांचिदृत्विगाशिषमाशास्ते[17] यजमानस्यैव[18] सेति[19] ॥ १६ ॥

स्वयमेवोद्गात्रा मन्त्राजपः कार्य इति मतान्तरं। ऋत्विग्भिः कृतमपि फलाशासनं यजमानगतमेवाशास्यते। न स्वार्थमिति हेतोरिति ॥

[1] TG and Tg om. इति. [2] प्राप्स्यति D. [3] °चोदनादनादेशे Tg. [4] °स्या Tg.
[5] जपोद्दिवि TG. [6] देवा TG, Tg. [7] स्पष्टामिमीति C. [8] मपि रमनिति Tg.
[9] °षधीं दृंह TG; °षधीन्दृंह G; °ध्योषधीर्दृंह C. [10] होमचोदनाया° Tg. [11] °दुर्ध्वं C.
[12] D, G om. [13] D, G om. [14] C. om. [15] प्रगोश्नीष्वा° G; °शीष्वा° C, D.
[16] °ल्यो Tg; °ल्या TG. [17] °गामाशि° TG. [18] याजस्यैव Tg. [19] TG om.

अवच्छाद्यमानायां[1] "दिव्यं छद्मासि[2] संतनि नाम विश्वजनस्य च्छाया नमस्ते ऽस्तु मा मा हिंसीः" इति[3] ॥ १७ ॥

अध्वर्युणाऽवच्छाद्यमानायामौदुम्बर्यां जपेदित्यर्थ[4] इति[4] ॥

दक्षिणेन श्वभ्रान्गत्वा ऽपरौ[5] द्वार्यावन्तरेण[6] प्रपद्येतत[7] कुर्यादिति शाण्डिल्यः ॥ १८ ॥

सदसि यावन्तः श्वभ्राः स्थूणानिखननार्थाः । तान् सर्वान्[8] दक्षिणेन गत्वाऽपरौ द्वार्यावन्तरेण[9] प्रपद्येतदुच्छ्रयणादिकं[10] कुर्यादिति शाण्डिल्य इति[11] ॥

उत्तरेणेति धानंजय्यः ॥ १९ ॥

तानेव श्वभ्रानुत्तरेणेत्यर्थः ॥

गौतमीयमितरत् ॥ २० ॥

इतरमतं गौतमीयं यत्पूर्वमुक्तं । "पूर्वौ सदसो द्वार्यौ" इत्यादि[a] ॥

यथेतं[12] निष्क्रामेत् ॥ २१ ॥

यथा[13] येन प्रकारेण सदसि प्रविष्टः । तेनैव प्रकारेण निष्क्रामेदिति ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ७ ॥

[1] आच्छाद्यमा अवच्छामानायां C. [2] छमासि TG. [3] Tg adds मूलादारभ्य ससृज्यात्. [4] जपेदिति G. [5] परया TG. [6] द्वार्यौ श्वभ्राव° D, TD. [7] प्रपद्येतत् TG. [8] The words सदसि - सर्वान् are taken from G (which has यावन्तं for °न्तः; °खननार्थः for °र्थाः); the Comm. begins in C दक्षिणेन श्वभ्रान्गत्वा, etc. [9] द्वार्यौवन्तरेण C; द्वार्यौ श्वभ्राव° G. [10] प्रपद्येतत् G. [11] In D the Comm. is missing, but in the Sūtra there is प्रपद्येतदुच्छ्रयणादिकं (as in Comm.), afterwards corr. to प्रपद्येतत्. [12] यथैतं TG, Tg, G. [13] सर्वथा G.

[a] 2, 3, 3.

यूपमुच्छ्रीयमाणमनुमन्त्रयेरन्[1] "नृमण ऊर्ध्वभरसं[2] त्वा"[a] इति ॥ १ ॥

यूपोच्छ्रयणकाले ऽध्वर्युणा यूपमुच्छ्रीयमाणमुद्गातारो ऽनुमन्त्रयेरन् । "युगपत्कर्मसु सर्वेषु"[b] इति वक्ष्यमाणसूत्रात्त्रय[3] एवोद्गातारः । चत्वारो ऽपीति केचित् । अस्मिन् स्थाने युगपत्कर्मस्विति सूत्राकरणात् "नृमण[4] ऊर्ध्वभरसं त्वा" इति पदत्रयोपादानमुत्तरसूत्रे तत्परामर्शार्थमिति ॥

एतान्येवोहस्थानानि यावन्तः स्युः ॥ २ ॥

एतान्येव त्रीणि पदानि कदाचिदूहस्थानानि भवन्ति । यत्र यावन्तो यूपाः स्युः तत्र तावत्सु यूपेषु । तद्यथा । यूपैकादशिन्यां[5] "नृमणस[6] ऊर्ध्वभरसो[7] वः" इति । तत्र कालभेदेन यूपानामुच्छ्रयणात् प्रकृतिवदविकारेण प्रयोगे प्राप्ते वचनमेतत् प्रथमयूपोच्छ्रयणकाल एवोत्तरानभिप्रेत्य मन्त्रोहः कार्य इति । नृमण[8] इति[8] समासो ऽयं सकारान्तः संबुद्ध्यन्तः[9] । यथा "समुद्रे त्वा नृमणा[10] अप्स्वन्तः"[c] इति । नृषु[11] प्राणिषु मनो यस्य रक्षिष्याम्येतानिति । स नृमणाः । विष्णुः[12] । विष्णुत्वेन च यूपः स्तूयते । "उरु विष्णो विक्रमस्व"[d] इत्यादिभिः । तेनायं मन्त्रार्थः । हे नृमणः[13] त्वामूर्ध्वभरसं ऊर्ध्वं धार्यमाणमहमपि "ऊर्ध्वभरा[14] इध्मेयं"[14] । त्वया विष्ण्वात्मना[15] ऽहमप्यूर्ध्वं धार्यमाणः स्यामित्यर्थः ॥ केचित्तु[16] नृमणशब्द[17] उपक्रमवाचि[17] खल्वेवाख्यां[18] निवर्तत इत्याहुः[e] । तदयुक्तं । तस्य समासत्वेन बह्वृचतैत्तिरीयैरध्ययनादिति ॥

[1] यूपमिच्छ्रीय° Tg; यूपमुच्छ्रय° TG; °नृम्णा Tg. [2] °भवसन् Tg. [3] °त्रय D; °श्रय C, G.
[4] रमण G. [5] °दश्न्यां G; °दशीन्यां D. [6] नृमण G; नृमणा D. [7] °भरसां G.
[8] रमणः G. [9] संबुध्यंतं D, C. [10] नृम्णा D. [11] नृषि G. [12] G om.; विष्णो (°ष्णोः?) D.
[13] नृम्णः D. [14] ऊर्ध्वरास्संद्व° C. [15] विष्वात्मना D; विश्वात्मना C. [16] क्वेचिचु C.
[17] नृम्ण° D; °शब्दो उप° C; °शब्दोप° D, G. [18] °वाख्यं G; °चाख्यां° C; °वा D, and in marg. लि.

[a] PV. Br. 1, 1, 6. [b] 3, 1, 1. [c] ṚV. 10, 45, 3. [d] Taitt. Saṁh. 1, 3, 4, 1.

[e] Thus Rudrask. in his Comm. on 2, 4, 1.

यत्र तिष्ठन्त[1] उच्छ्रीयमाणं[2] पश्येयुरिति शाण्डिल्यः ॥ ३ ॥

अन्तर्वेदि वा बहिर्वेदि वा यत्र तिष्ठन्तो यूपं द्रष्टुं[3] शक्नुयुः । तत्र खिल्वाऽनुमन्त्रणमित्यर्थः ॥

अन्तर्वेद्येवेति धानंजय्यः ॥ ४ ॥

स्पष्टमिति ॥ हेतुमाह ॥

न बहिर्वेदि यजुरवकल्पत इति ॥ ५ ॥

न हि सति संभवे बहिर्वेदि मन्त्रप्रयोगो युक्त इति ॥

अथ सुत्येऽहनि प्रातरनुवाकात्पूर्वं विश्वरूपागानमस्मद्ब्राह्मणे विहितं[a] । तत्करणे[4] गुणातिशयस्य[5] श्रुतः । शाखान्तरे तु तद्गानं निषिद्धं । तत्र[6] निषेधपक्षमुपपादयति ॥

विश्वरूपाणां गानं ज्योतिष्टोमे यजमानेनोक्तः[7] प्रत्याचक्षीत चतुष्टोमस्तोमसंपदतिरेकाद्ग्रहशस्त्राभावाच्च[8] ॥ ६ ॥

गुणातिशयलिप्सुना यजमानेन चोदितोऽप्युद्गाता विश्वरूपाणां गानं प्रत्याचक्षीत । नैव कुर्यादित्यर्थः । कुतः । चतुष्टोमस्याग्निष्टोमस्य स्तोमानां[9] त्रिवृत्पञ्चदशसप्तदशैकविंशानां या संख्यासंपत्तिर्ब्राह्मणोक्ता[10] । "तस्य नवतिशतं[11] स्तोत्रीयाः"[b] इति । तदतिरेकप्रसङ्गात् । विश्वरूपागाने हि तिस्रः स्तोत्रीया अतिरिच्येरन् । स्तोमसंपत्तिरपि गुणवत्तरैव[12] श्रुता । किं च । गानपक्षे ग्रहशस्त्राभ्यामवश्यं भवितव्यं । "ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्"[13] इति[13] तैत्तिरीयकश्रुतेः[c] । स्तुतमनुशंसति[14] शान्त्या[d] इति च । न च तद्द्वयमप्यत्रास्ति[15] । तस्मादप्यगानमिति ॥ अथ[16] गानमुपपादयन्नाह ॥

[1] तिष्ठन् Tg. [2] उच्छ्रय° TG. [3] द्रष्टुं तत्र C. [4] अधिकरणे G. [5] गणा° G.
[6] ततः G. [7] °नोक्तं TG. [8] °स्तोमस्संपद° Tg; °स्तोमसंपदितिरे° G. [9] स्तोमान् G.
[10] संख्यसंप° C. [11] नवति D. [12] °वत्तरवै C. [13] °पाकरोरिति C. [14] °न्ति G.
[15] All MSS. °द्व°; चद्वय° (or वद्वय°) C. [16] अद्य C.

[a] ṢV. Br. 1, 4. [b] PV. Br. 16, 1, 8. [c] Taitt. Saṁh. 3, 1, 2, 4. [d] Cp. PV. Br. 4, 9, 13.

वसतीवर्यो ग्रहः प्रातरनुवाकः शस्त्रमासां[1] न[1] च संपत्कोपो यथा ऽन्यैः परिसामभिर्गायैवेति[2] चेद्ब्रूयात्[2] ॥ ७ ॥

वसतीवर्यो ग्रहः प्रातरनुवाकः शस्त्रं भविष्यति । न च ब्राह्मणोक्तसंपद्विरोधो[3] विश्वरूपाभिः सोमात्मकस्य[4] हविषस्तद्देवानां[5] च स्तुत्यभावात् । यथा परिसामभिर्न[6] संपत्कोपः । तद्वत् । तस्मात्त्वं[7] विश्वरूपा गायैवेति यजमानो यदि ब्रूयात् । तदा गानं[8] कार्यमिति । नात्र यजमाननियोगतन्त्रं[9] । किं तु यथोक्तग्रहशस्त्रक्लृप्तिः[10] । यदि[10] रोचते । तदा गातव्यमित्येतावद्विवक्षितं । तेन यजमानेनानुक्तो ऽपि गायेदिति शास्त्रार्थः । केचित्त्वाहुः[11] । नित्यमेव गानं[12] यजमाननियोगः प्रत्याख्यानं पुनर्नियोगस्यादृष्टार्थं[13] कार्यमिति । तदयुक्तं । ग्रहशस्त्राभावादिति हेतुकथनवैयर्थ्यात्[14] । गायैवेति चेद्ब्रूयादिति चेच्छब्देनानित्यतासूचनाच्च । जैमिनिरपि प्रत्याख्यानेनाकरणमेवाह[15] । तं[16] यदि ब्रूयुर्विश्वरूपा[17] गायेत्यकर्मण[17] एतं त्रयोदशं स्तोत्रं विराजं संलोभयतीति ब्रूयात् । संभवे[18] तु कार्यमन्यत्र[19] नेति[20] । अथ गानपक्षे प्रकारं विधत्ते ॥

न मामनामन्त्र्य[21] प्रातरनुवाकमुपाकुर्या[22] इत्यध्वर्युं ब्रूयात् ॥ ८ ॥

स्पष्टमिति ॥

होतारं प्रातरनुवाकायोपविष्टं पूर्वेण गत्वा यजमानश्च[23] पूर्वया[23] द्वारा प्रपद्यान्तरेण[24] हविर्धाने पूर्वेण चक्रे उदङ्मुख[25] उपविशेत्तूष्णीम्[25] ॥ ९ ॥

पूर्वया द्वारा हविर्धानं प्रपद्य[26] पूर्वमेवोपविष्टं होतारमग्रतो गत्वा शकटयोर्मध्ये

[1] °मासानं TD. [2] °सामभिस्तस्मात् गायैवेदि चे ब्रूयात् Tg. [3] °णोक्तसंपद्वि° G; °णोक्तसंशयविरोध C. [4] सोमात्म° C. [5] तद्देवाना D; तद्देवानानां G. [6] °सामभिन्नं C. [7] G. om. त्वं. [8] गमनं G. [9] °गः तत्र D. [10] °ग्रहशास्त्रे स्तुयुः ली यदि C; °क्लृप्तीय्यदि D. [11] केचिदाहुः G. [12] यजमानेन—गानं missing in C. [13] °योगं चा° G; योगं च दि° C. [14] °वैय्यर्थात् G. [15] °ख्यानं नाकर° C. [16] ते C. [17] °रूपायागेत्येकर्मण C. [18] संसवे D, G. [19] °न्यजे C. [20] वेति C, D. [21] °न्त्र्या Tg. [22] °कुर्यात् Tg. [23] °श्चापूर्वया TG. [24] °द्योत्त°. Tg. [25] उदङ्मुखमुप° TG, G. [26] प्रवद्य D.

चक्रयोः[1] पुरस्तादुदङ्मुख उपविशेत् । तूष्णीमिति वचनं स्तोत्रधर्मस्य मन्त्रवदुपवेशनस्य निवृत्त्यर्थमिति ॥

पुरस्ताद्यजमानः प्रत्यङ्मुखः ॥ १० ॥

यजमानस्यापि सह प्रपदनं पूर्वमुक्तं । स पुरस्तादुद्गातुरुपविशेदिति ॥

"युञ्जे वाचं शतपदीं ।
गाये[2] सहस्रवर्तनि ।
गायत्रं त्रैष्टुभं जगत् ।
विश्वा रूपाणि संभृता ।
देवा ओकांसि चक्रिरे"[3][a] ॥

इत्येतस्यां पङ्क्तौ त्रिर्गायत्रं गायेदिति धानंजय्यः स्वाध्यायस्वरेण[4] ॥ ११ ॥

पङ्क्ताविति वचनं पञ्चस्वपि पादेषु व्याप्य । गानार्थं[5] "अनिरुक्तं गेयं"[b] इति सामान्यश्रुतेरत्रापवादाभावादनिरुक्तमेव[6] गेयं । स्वाध्यायस्वरेणेति मध्यमया वाचेत्यर्थः ॥

मनसैव यजमान उपस्वरेत्[7] ॥ १२ ॥

उद्गातुर्गानकाले[8] यजमानो मनसैव गायत्रमुपस्वरेत्[9] । गायेदित्यर्थः । तदप्यनिरुक्तमेव । केचिदार्चिकमित्याहुरिति[10][c] ॥

त्रिषु त्रिषु पदेषु गायेदिति गौतमः ॥ १३ ॥

"युञ्जे वाचं" इत्यस्या ऋचस्त्रिषु[11] त्रिषु[12] पादेषु[13] गायत्रं गायेत् । न पञ्चसु पादेष्विति[14] गौतम[15] इति[15] ॥ कथमित्याह ॥

[1] The rest of this Comm. is missing in G, as also Sūtra 10, with part of Comm., up to पुरस्तादुद्गातुरु°. [2] गायेत TG. [3] G quotes this verse abbreviated, thus: युञ्जे वाच युतपदीं [!] ब्रू + चक्रिर. [4] स्वाध्यायवत्स्वरेण G, Tg. [5] गार्थं G. [6] °श्रुतेरत्रापिवा° G. [7] Tg has here: मनसैव यजमानमुपस्वरेदुपग्रहप्रभृतीनि स्वरयन्त उपेयुः. [8] उन्नाता गा° G. [9] गायत्र उप° C; यजमान उप° G. [10] °दार्चिदमि° D; °दार्चिमि° G. [11] ऋचं त्रिषु. [12] G om. [13] पदेषु G. [14] पदे° G. [15] गौतममिति C.

[a] SV. II, 9, 2, 7, 2 and 3. Cf. ṢV. Br. 1, 4, 10-14. [b] PV. Br. 7, 1, 8. [c] Thus Rudrask.

पूर्वं पूर्वमतिसृजन् गायत्रीकारम्[1] ॥ १४ ॥

प्रथममाद्येषु त्रिषु पादेषु गीत्वा पश्चात् प्रथमं पादमुत्सृज्य द्वितीयमुपक्रम्य[2] पादत्रयमनभ्यासेन[3] गायत्रीं कृत्वा गायेत् । पुनर्द्वितीयं पादमुत्सृज्य तृतीयमुपक्रम्य तथैव गायेदिति ॥

प्रगाथकारं[4] वा[5] ॥ १५ ॥

प्रगाथं[6] वा[6] कृत्वा गायेत् । तत्कथं । पादत्रये[7] गीत्वा पश्चात्तृतीयं पादं द्विरभ्यस्य चतुर्थेन पादेन सह गायत्री कृत्वा गायेत् । एवं[8] चतुर्थं पादं द्विरभ्यस्य पञ्चमेन सह गायत्री कृत्वा गायेत्[8] । कुत एतत् । पूर्वस्तोत्रीयाऽन्यस्य[9] पादस्य पुनरभ्यासः प्रगाथ इत्युच्यते । अत्र "त्रिषु पादेषु गायेत्" इति वचनात्तस्यैव द्विरभ्यासः कार्य इति ॥

गीत्वा यथार्थं स्यात्[10] ॥ १६ ॥

स्पष्टमिति ॥

विश्वरूपास्वेतास्वेज्ज्योतींष्यपि गायेत्[10] ॥ १७ ॥

"युञ्जे वाचं" इति तिसृणां स्तोत्रीयाणां[11] विश्वरूपा इत्यभिधानं "विश्वा[12] रूपाणि संभृता" इत्यक्षरान्वयात् । चेच्छब्दस्तासामनित्यतां सूचयतीति ॥ अथ ज्योतिषां[13] गानकालमाह ॥

परिहिते प्रातरनुवाकेऽपोनप्त्रीयं नाम सूक्तं पुरा तस्माद्धोतारमारमयित्वा[14] ॥ १८ ॥

प्रातरनुवाके होत्रा समापिते सति पश्चात्तेनैवानुवक्तव्यं अपोनप्त्रीयं नाम सूक्तमस्ति । तदनुवचनात्पूर्वं होतारमारमस्वेत्युक्त्वा[15] ज्योतींषि गायेदितीति ॥

---

[1] गायत्रीगारं Tg. [2] °मुत्सृज्य D. [3] °त्रयमभ्यासेन C. [4] प्रगाथगारं Tg; प्रगाथं कारं G. [5] TG om. [6] प्रगाथया C. [7] प्रथमं पा° G. [8] The passage एवं—गायेत is missing in G. [9] सर्वस्तोत्रीया° C, D. [10] Sūtras 16, 17, and 18 are missing in TG. [11] G om. [12] विश्व MSS. [13] ज्योतिषो C. [14] °द्धोता रमयित्वा G. [15] °मारमेत्युक्त्वा G.

आग्रयणस्य[1] वा ऽनु हिङ्कारं[2] पवित्रं धारयन्[3] ॥ १९ ॥

अथ वाग्रयणं गृह्णतो[4] ऽध्वर्योर्हिङ्कारमनु[4] तद्वेलायां दशापवित्रं धारयञ्ज्योतींषि गायेदिति ॥

आस्तावं वा प्राप्य पुरा[5] स्तोमयोगात्[5] ॥ २० ॥

अथवा बहिष्पवमानस्तुतिदेशं प्राप्य स्तोमयोगात्पूर्वं गायेदिति ॥ अथ गानप्रकारमाह ॥

"अग्निर्ज्योतिर्ज्योतिरग्निः ।
इन्द्रो ज्योतिर्ज्योतिरिन्द्रः ।
सूर्यो ज्योतिर्ज्योतिः सूर्यः"[6 a] ॥

इत्येतेषु पदेषु त्रिस्त्रिरेकैकमभ्यासं[7] मनसा गायत्रं गायेत् ॥ २१ ॥

अग्निर्ज्योतिरित्येतांस्त्रीन् पादान्[8] प्रत्येकं त्रिरभ्यस्य प्रथमे पादे त्रिरभ्यस्ते[9] मनसा गायत्रमनिरुक्तं गायेत् । एवमुत्तरयोरपीति ॥

तानि नान्यत्र विश्वरूपाभ्यः ॥ २२ ॥

तानि ज्योतींषि नान्यत्र विश्वरूपाभ्यः[10] प्रयोक्तव्यानि । विस्पष्टार्थमिदं वचनं । "विश्वरूपास्वेद्गायेत्"[b] इत्यनेनैव विश्वरूपागानस्य ज्योतिर्गाने निमित्तत्वावगमनादिति[11] ॥

न चान्यत्र विश्वरूपा ज्योतिष्टोमात्[12] ॥ २३ ॥

विश्वरूपा अपि ज्योतिष्टोमात् प्रकृतिभूतादग्निष्टोमसंस्थादन्यत्र[13] न भवेयुः । विकृतिष्वतिदेशप्राप्तस्य विश्वरूपागानस्य प्रतिषेधो ऽयमिति ॥

[1] आग्रेणस्य Tg. [2] TG om. the beginning of this Sūtra. [3] धारयन्निति C. [4] गृह्णतोरध्वर्यो° D, C. [5] पुरस्तात्स्तो° TD; पुरस्तास्तो° TG. [6] G quotes the mantra abbr., thus: अग्निर्ज्योतिर्ज्योतिरग्नि + सूर्य. [7] Tg om. अभ्यासं. [8] पदान् C. [9] °भ्यस्तो D. [10] °रूपाभिः G. [11] °त्वावगमादिति D. [12] So all MSS.; Rudraskanda's Comm. shows, however, that he has read विश्वरूपाज्ज्योतिष्टोमात्, as in Lāṭ. 1, 8, 16. [13] प्रकृतीग्नि भू° G.

[a] SV. II, 9, 2, 8, 1. [b] 2, 4, 17.

सहचराणि[1] ह्येतानि[2] विश्वरूपाश्च[3] ज्योतींषि च ज्योतींषि च ॥ २४ ॥

विश्वरूपाश्च[4] ज्योतींषि चेत्येतानि[5] सहचराण्येव[5]। तस्माद्विश्वरूपानिवृत्तौ[6] ज्योतिषां निवृत्तिरिति। पूर्वोक्तस्य हेतुकथनमिदमिति[7] ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ ८ ॥

॥ द्वितीयः पटलः ॥ २ ॥

इति च्छन्दोगसूत्रस्य दीपेऽस्मिन्धन्विना[8] कृते[8]।
द्वितीयः पटलो वृत्तः प्रीयतां देवकीसुतः[9] ॥

[1] सहस्राणि G. [2] हि तानि R 1. [3] °रूपाश्च D, Tg, G. [4] °रूपांश्च G; °रूपा च C; °रूपाच्च (?) D. [5] चेत्यसहंचरा° G; चेत्यानि सचरा. D. [6] °रूपान्नि° G; °रूपनिवृतौ C. [7] °कथनमिति D; °कथनमेतद्दिति G. [8] धन्वोविनिर्मिते C. [9] In G: द्राह्यायणकृते सूत्रे यथामति यथागमं। द्वितीयपटलव्याख्ये धन्विकाश्यपनन्दनः ॥ हरिः ओम् ॥

युगपत्कर्मसु सर्वेषूद्गातुर्दक्षिणमनु बाहुं प्रस्तोता सव्यं प्रतिहर्ता ॥ १ ॥

युगपत्कर्मकर्तव्यतया[1] चोदितेषु बहुकर्तृकेषु कर्मसु कियन्तः[2] स्तोत्रकर्तारः[2] कथं वा ऽनुष्ठानमित्यपेक्षायामिदमुच्यते। उद्गातुर्दक्षिणं बाहुमनु दक्षिणे पार्श्वे प्रस्तोता स्यात्। सव्यं बाहुमनु प्रतिहर्ता स्यात्। कर्तारो ऽप्येत एव त्रयो नान्य इत्यनेनैव सूत्रेणोक्तं। अन्यस्यानुपादानादिति ॥

होता प्रातरनुवाकमनूच्य "अभूदुषाः"[a] इति यदा ब्रूयादथ वेदिमाक्रामेयुः "मृदा शिथिरा"[3 b] इति ॥ २ ॥

"मा मा हिंसीः" इति मन्त्रान्त इति ॥

बहिर्वेद्येतज्जपित्वा "मा मा हिंसीः" इत्येतावतैवेति धानंजय्यः ॥ ३ ॥

"मृदा शिथिरा"[3] इत्यादि "वेदिरसि" इत्यन्तं बहिर्वेदि जपित्वा "मा मा हिंसीः" इत्येतावन्मात्रेणैव वेद्याक्रमणमिति ॥

सवनमुखेषु च यजुषा ॥ ४ ॥

जातौ बहुवचनं[c]। उत्तरयोरपि सवनयोर्मुखे "मृदा शिथिरा"[3] इति मन्त्रेणैव वेद्याक्रमणं। तत्राभिषवादि माध्यन्दिनं सवनं। आदित्यारम्भणं तृतीयसवनमिति ॥

अहरहरिति गौतमः ॥ ५ ॥

अहर्गणेषु प्रत्यहं सवनत्रये ऽपि मन्त्रेणैवाक्रमणमिति गौतम इति ॥

[1] Com. कर्म. [2] कियन्तस्ते क° G. [3] शिशि° G.

[a] ṚV. 5, 75, 9. Cf. Ait. Br. 2, 18, 10. 12. Kauṣ. Br. 11, 6. [b] PV. Br. 1, 1, 7. [c] Cf. Pāṇ. 1, 2, 58.

सकृत्क्रताविति शाण्डिल्यः ॥ ६ ॥

एकस्मिन्क्रतावादावेव सकृन्मन्त्रेणैवाक्रमणं[1] । न सवनत्रये[2] । नाप्यहरहरिति[2] शाण्डिल्य इति ॥

यावद्धाक्रामेयुरित्येके ॥ ७ ॥

यावद्धेति विधार्थे धाप्रत्ययः । यावत्कृत्वो वेदिमाक्रामेयुः । तत्र सर्वत्र मन्त्रेणैवाक्रमणमित्येके[3] । तेनातिरात्रे प्रतिपर्यायं निष्क्रान्तानां मन्त्रेणैव पुनः प्रवेश इति ॥

हविर्धानं प्रवेश्यमाना[4] वसतीवरीरनुप्रविशेयुः ॥ ८ ॥

अपरया द्वारा वसतीवरीः प्रवेशयन्ति । तस्मिन् काले पूर्वया द्वारा प्रविशेयुरिति ॥ कथमित्याह ॥

तस्य रराट्यामालभ्य[5] "विष्णोः शिरः"[a] इति ॥ ९ ॥

रराटी नाम हविर्धानस्य[6] पूर्वद्वारोपस्थिता[6] काष्ठमयी यष्टिरिति सत्याषाढः । तस्यां "विष्णोः शिरः" इति मन्त्रेणालभ्य प्रविशेयुः ॥

"इष ऊर्जे"[b] इति प्रविशन्तो[7] ऽन्तरेणेषे[8] बाहूनवहृत्य[9] पार्ष्णीरनुद्यच्छन्तो[10] "युनज्मि"[11][c] इति[11] राजानमभिमृशेयुर्यः[12] प्रातःसवनाय ॥ १० ॥

"इष ऊर्जे" इति मन्त्रेण प्रविशन्त ईषयोरन्तरा बाहूनधः प्रसार्य प्रातःसवनाय विभक्तं सोममभिमृशेयुः । अभिमर्शनाशक्तौ पादाग्रेण स्थित्वा पादस्य पृष्ठभागोद्यमनं स्यात् । तन्निवृत्त्यर्थं पार्ष्णीरनुद्यच्छन्त[13] इत्युक्तमिति ॥

अविभक्तश्चेत्सर्वम् ॥ ११ ॥

यद्यविभक्तः सोमः स्यात् । तदा सर्वमेव सोममभिमृशेयुरिति ॥

[1] D om. एव. [2] °त्रयेणाप्य° G. [3] C ins. के. [4] प्रवेश्याना G. [5] ललाº Tg.
[6] हविर्धानस्योपरिस्थिता D, C. [7] °न्ते G. [8] इतरेषे G. [9] °पहृत्य TG, Tg.
[10] °रनूद्यच्छ° G; °रनूद्यच्छदेन TG; °रनुच्छन्तो Tg. [11] युनजिति TG; युनक्मीति G.
[12] राजानमनभिमृ° TG; Tg om. यः. [13] °रनूद्यच्छ° G.

[a] PV. Br. 1, 1, 8. [b] PV. Br. 1, 1, 9. [c] PV. Br. 1, 2, 1 (cf. Sāyaṇa's Comm.: युनज्मीत्येवं शाखान्तरपाठः; but in quoting this Sūtra Sāyaṇa reads युनच्मीति).

न चेत्प्राप्नुयुर्देशेनैव ॥ १२ ॥

यदि हस्तेन सोमं प्राप्तुं[1] न[1] शक्नुयुः । तदा देश[2] एव हस्तं प्रमार्य मन्त्रं जपेयुरिति ॥

प्रस्तोता प्रथमोऽतिसर्पेत् ॥ १३ ॥

अथ सोममभीत्य हविर्धानयोर्मध्यतः प्रस्तोता प्रत्यङ्मुखः प्रथमं गच्छेदिति ॥

तत उद्गाता ततः प्रतिहर्ता ॥ १४ ॥

स्पष्टमिति ॥

दक्षिणस्य हविर्धानस्य[3] पश्चात्सव्यावृत[4] उपविशेयुः "ऋतस्य सदने"[5] [a] इति[5] ॥ १५ ॥

एवं गत्वा सव्येन पार्श्वेनावर्तमाना दक्षिणहविर्धानस्य[6] पश्चादुपविशेयुः । अत्र जैमिनिः । अन्तरेण हविर्धाने गत्वा दक्षिणस्य हविर्धानस्य पश्चादप्रदक्षिणमुपविशन्तीति[7] ॥ उपवेशनानन्तरं बहिष्पवमानार्थमृग्जपं विधास्यन् तत्प्रसङ्गात्सर्वस्तोत्रसाधारणमाह ॥

पुरस्ताच्चोपरिष्टाच्चर्चः सर्वत्र जपेयुर्यासु[8] करिष्यन्तः स्युः ॥ १६ ॥

सर्वेष्वपि[9] स्तोत्रेषु[9] यास्वृक्षु[10] स्तुतिं करिष्यन्तः स्युः । ताः स्तोत्रपुरस्तादुपरिष्टाच्च[11] सर्वत्र जपेयुरिति ॥

अत्र तु[12] बहिष्पवमानस्य ॥ १७ ॥

अत्र अस्मिन्काले उपवेशनानन्तरं[13] बहिष्पवमानर्चो जपेयुः । बहिष्पवमानादन्येषु स्तोत्रेषु[14] यद्यपि पुरस्तादुपरिष्टादित्यविशेषचोदनादव्यवधानेन गानानन्तरं जपः[15] प्राप्तः । तथाऽपि स्तोमयोगात्पूर्वमेव पुरस्ताज्जपः । यजमानोपहवानन्तरमुपरिष्टाज्जप इति मन्तव्यं । बहिष्पवमाने[16] तथैव दृष्टत्वादिति[17] ॥

[1] प्राप्नुयुर्न G; प्राप्नुर्न C. [2] तद्देश G. [3] C om. स्य. [4] °वृता TG.
[5] सदने सीदामीति G. [6] दक्षिणा° G. [7] पश्चादक्षिणमु° D; पश्चादुपविशदिति G.
[8] जपेयुः आसु Tg. [9] G om. [10] या ऋक्षु C. [11] स्तोत्रस्य पुर° G. [12] TD om.
[13] उपवेशानंतरं C. [14] C ins. यस्य स्तोत्रेषु. [15] जायः C. [16] हविष्पव° C. [17] After जपेयुः G has the following passage only: सर्वत्र स्तोमयोगात् पूर्वमेव पूर्वं जपः । बहिष्पवमाने दर्शनात् ।

[a] PV. Br. 1, 2, 2.

अभिषुते[1] राजनि "ऋतपात्रमसि"[a] इति द्रोणकलशमालभ्य[2] "वानस्पत्यः"[3b] इति प्रोहेयुः ॥ १८ ॥

सोमाभिषवे कृते द्रोणकलशमक्षस्य पश्चादवस्थितमक्षस्याधस्तात्प्राञ्चं प्रोहेयुः। "अधोऽधोऽक्षं द्रोणकलशं प्रोहन्ति"[4c] "प्राञ्चं प्रोहन्ति"[d] इति श्रुतेरिति[5] ॥

दक्षिणे पाणावुद्गाता दशापवित्रं कुर्वीत ॥ १९ ॥

पूर्वमेव द्रोणकलशेऽध्वर्युणा न्यस्तं दशापवित्रं, तदिदानीं[6] दक्षिणे हस्ते गृहीत्वा प्रोहेत्। शुक्लाभिरूर्णास्तुकाभिर्निर्मितं[7] दशायुक्तं[8] वासो दशापवित्रं "स्वर्भानुर्वा आसुरः"[e] इत्यारभ्य "तस्माच्छुक्लं पवित्रम्"[f] इति श्रुतेः[9] ॥

अक्षं चेदुपहन्युः पुनः प्रोहेयुः ॥ २० ॥

अत्र[10] ब्राह्मणं[10] "योऽस्य प्रियः स्यादनुपस्पृशन्नक्षं[11] प्रोहेत्"[g] इति। यदि प्रमादादक्षमुपहन्युः, उपस्पृशेयुरित्यर्थः[12], तदानीं पुनरपि द्रोणकलशमाकृष्यानुपस्पृशन्त एव प्रोहेयुः। तदेव तत्र प्रायश्चित्तमिति सूत्रार्थ इति ॥

अन्तरेणाक्षविष्कम्भौ[13] दशापवित्रं[14] द्रोणकलशे[15] प्रास्येदनुपघ्नन्[16] ॥ २१ ॥

अक्षस्योपरिष्टादीषाधारकः काष्ठः तद्वदेव तिर्यगायतो विष्कम्भः। तयोरक्षविष्कम्भयोर्मध्यावकाशेन[17] दशापवित्रं द्रोणकलशे प्रास्येत्। अनुपघ्नन् बाहुभ्यामक्षमस्पृशन्नित्यर्थः[18] ॥

संहितौ[19] चेदुभावुपरि ॥ २२ ॥

यद्यक्षविष्कम्भौ संश्लिष्टौ स्यातां, तदा तयोर्मध्यावकाशेन प्रासनाशक्तेस्तयोरुपरि-

[1] अभिषूते TG. [2] °रभ्य TD. [3] वानप्रस्थत्य TG. [4] प्रोहन्तीति श्रुतेः G (rest left out). [5] D om. श्रुतेरिति. [6] चदानीं C. [7] निर्मित्तं C; निर्मित D. [8] दशायुतं G. [9] D and C om. [10] G om. [11] °नुस्पृशन्नक्षं G. [12] उपस्पृशेदि° G. [13] °ष्कंभयो TG; °ष्कभौ Tg. [14] °त्र G. [15] R2 om. [16] प्रास्येदपघ्नन् Tg. [17] G om. न. [18] °मुपस्पृश° G. [19] संहतौ D.

[a] PV. Br. 1, 2, 3. [b] PV. Br. 1, 2, 4. [c] PV. Br. 6, 5, 14. [d] PV. Br. 6, 5, 20. [e] PV. Br. 6, 6, 8. [f] PV. Br. 6, 6, 9. [g] PV. Br. 6, 5, 15.

देशेनैव प्रास्येत्। अवकाशासंभवे तु तेनैवावश्यं[1] प्रासनं[1] कार्यं। "उपर्युपर्यचं पवित्रं प्रयच्छन्ति"[a] इति श्रुतेरिति ॥

सर्वं रथोपस्थमुपर्युपर्युत्तरेण रथजङ्घां रथश्चेत् ॥ २३ ॥

यदि कश्चिच्छ्येनादौ[2] रथो हविर्धानं स्यात्। तदा कृत्स्नस्यैव रथोपस्थस्योपरिष्टाद्रथजङ्घां मध्येऽवस्थितामुत्तरेण दशापवित्रं पुरस्तादतिहृत्याधस्तादवस्थिते द्रोणकलशे प्रास्येदिति ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ८ ॥

प्रत्याव्रज्य ग्राव्णो युञ्ज्यात् ॥ १ ॥

द्रोणकलशप्रोहणानन्तरमुत्थायाभिषवदेशं प्रत्याव्रज्य ग्राव्णो युञ्ज्यात्। एकवचनमविवक्षितं[3]। उत्तरसूत्रे "तानभिमृश्य जपेयुः"[b] इति बहुत्वश्रवणात्। जपस्यैव प्राधान्येन[4] ग्रावयोजनस्याप्राधानत्वाच्च[5]। किं च। "ग्राव्णः[6] संसाद्य द्रोणकलशमभ्यूहन्ति"[c] इति श्रुतेः स्पष्टमेव ग्रावयोजनेऽपि[7] कर्तृबहुत्वमिति[7] ॥ कथं युञ्ज्यादत आह ॥

प्रदक्षिणमष्टमदेशेषु[8] स्थवीयांस्यभ्यन्तराणि कृत्वा[9] ॥ २ ॥

अष्टमदेशः कोणदेशः। अभिषवचर्मणोर्मध्ये अवान्तरदिक्षु[10] चतुरो ग्राव्णः[11] प्रदक्षिणं युञ्ज्यात्। तेषां ग्राव्णां स्थवीयांसि स्थूलतरान् प्रान्तभागानभ्यन्तरान् कृत्वा युञ्ज्यादिति ॥

[1] °वश्यप्रासीनं G. [2] G om. श्येनादौ. [3] °वचनं वि° G. [4] प्राधान्यं न C.
[5] Thus C; D and G read ग्रावयोजनत्वाच्च. [6] ग्राह्य C. [7] पवित्रबहुत्वं G. [8] °ष्टदृशेषु TG.
[9] This Sūtra is wanting in G. [10] अवांतरिक्षु D. [11] ग्राह्यः C.

[a] PV. Br. 6, 5, 14. [b] 3, 2, 5. [c] PV. Br. 6, 6, 1.

तानि मुखानि ॥ ३ ॥

तानि[1] स्थवीयांसि मुखानीत्युच्यन्ते[2]। "संमुखान्[3] ग्राव्णः कृत्वा"[a] "विमुखान् ग्राव्णः"[4b] इत्यादि[5] ब्राह्मणमिति ॥

दक्षिणार्ध्यपूर्वार्ध्ये[6] प्रथमम् ॥ ४ ॥

दक्षिणपूर्वदेशस्थं ग्रावाणं प्रथमं युञ्ज्यात्। उत्तरपूर्वदेशे[7] समाप्तिरिति[7] ॥

तानभिमृश्य जपेयुः "मरुतः"[c] इति ॥ ५ ॥

स्पष्टमिति ॥

ऋतसदन एतज्जपित्वा "युक्ताः स्थ वहत"[c] इत्येतावतैवेति धानंजय्यः ॥ ६ ॥

द्रोणकलशप्रोहणानन्तरं तत्रैव स्थाने "मरुतः" इत्यादि "चातयध्वम्"[8] इत्यन्तं जपित्वा ततः प्रत्याव्रज्य "युक्ताः स्थ वहत" इत्येतावन्मात्रेण ग्रावयोजनमिति धानंजय्यः। "ऋतस्य[9] सदने[9] सीदामि"[d] इति मन्त्रेण यत्रोपविश्यते[10] तदृतसदनं। दक्षिणहविर्धानस्य[11] पश्चाद्देश इति ॥

पश्चाद्दक्षिणतो वा द्रोणकलशमध्यूहेयुः "इदमहमिमम्"[12e] इति ॥ ७ ॥

युक्तानां ग्राव्णामुपरिष्टाद्द्रोणकलशं पश्चादारभ्य प्राञ्चं स्थापयेयुः। दक्षिणत उदञ्चं वेति[13] ॥

यजमानशब्दं सर्वत्र यथार्थं कुर्युः[14] ॥ ८ ॥

मन्त्रगतं यजमानपदं सत्रे यथार्थमूहेत्। "इमान्यजमानान्"[15] इति। न केवलमत्रैवमिति[16] ॥

अनुजपेयुरन्येन[17] कृते मन्त्रौ[18] ॥ ९ ॥

अन्येनाध्वर्युणा ग्रावयोजनादिके[19] कृते केवलं तन्मन्त्रं[20] जपेयुः[20]। न पुनर्ग्रावयोजनं

[1] ता G. [2] समुखानी° C. [3] समुखान् D, G. [4] दग्रा: C. [5] कृत्वेत्यादौ। G. [6] दक्षिणार्द्धपूर्वार्द्धे G, TG, Tg. [7] °देशसमाप्तिः G. [8] कादय° G (and D?). [9] ऋतसदने G. [10] चात्रोप° G. [11] दक्षिणस्य ह° G. [12] Tg om. इमं. [13] G om. Comm. on this Sūtra. [14] TG om. कुर्युः. [15] °जमानास्थान् C. [16] °मंत्रैव° C; G om. Comm. on this Sūtra. [17] ननुज° G. [18] TG om. Ss. 9-11. [19] °योधनादिके C. [20] तन्मंत्रोपयेयुः C.

[a] PV. Br. 6, 6, 3. [b] PV. Br. 6, 6, 2. [c] PV. Br. 1, 2, 5. [d] Cf. 3, 1, 15. [e] PV. Br. 1, 2, 6 (cf. Sāyaṇa's Comm.: इमर्मिति केषांचित्पाठः).

कुर्युरिति। एवं[1] नित्यस्य ग्रावयोजनादेः कल्प उक्तः ॥ अयमेव काम्यानामपि[2] ब्राह्मणो-क्तानां[3] ब्राह्मणविहितं वैशेषिकमङ्गं[4] विनेत्याह[4] ॥

ब्राह्मणविहितादन्यत्रैष कल्पः[5] काम्यानाम् ॥ १० ॥

अत्र ब्राह्मणे। "यं द्विष्याद्विमुखान् ग्राव्णः"[a] इत्यारभ्य चत्वारः काम्याः[6] कल्पा उक्ताः। तेषु[7] प्रियकल्पात्मकल्पयोर्द्रोणकलशाध्यूहने[8] मन्त्रौ विशेषविहितौ[b]। अन्यत्सर्वं न विहितं। किं पुनस्तत्। प्रदक्षिणं ग्रावयोजनमभिमर्शनमन्त्रजपः[9] पश्चादध्यूहनमित्यादि तत्सर्वं नित्यवदेव[10] कार्यं। तथैव राष्ट्रजिघांसुकल्पेऽपि[c] ॥ द्वेष्यकल्पस्त्ववशिष्यते। तत्रापि नित्यधर्मग्रहणे[11] प्राप्त[12] आह ॥

द्वेष्यकल्पादन्यत्र ॥ ११ ॥

द्वेष्यकल्पादन्यत्र[13] नित्यकल्पधर्मग्रहणमिति ॥ कस्तर्हि[14] द्वेष्यकल्पे प्रकारः। तमाह ॥

विपर्यस्य तु तस्मिन्[15] ॥ १२ ॥

तस्मिन्द्वेष्यकल्पे नित्योक्तं प्रकारं विपर्यस्यानुष्ठेयं। तद्यथा। उत्तरपूर्वदेशमारभ्य प्रसव्यं बहिर्मुखान्[16] ग्राव्णो युञ्ज्यादिति ॥

तूष्णीं च योजनाध्यूहने ॥ १३ ॥

ग्रावयोजनं द्रोणकलशाध्यूहनं च द्वेष्यकल्पे मन्त्ररहितं कार्यमिति ॥

"इदमहममुम्"[d] इति दक्षिणापरमष्टमदेशं[17] निरूहेत् ॥ १४ ॥

एवं नित्योक्तप्रकारं विपर्यस्य[18] तूष्णीं[18] ग्रावयोजनादि[19] च[19] कृत्वा "इदमहममुम्" इति ब्राह्मणपठितेन वैशेषिकेण[20] मन्त्रेण[21] दक्षिणापरं कोणदेशं[22] प्रति द्रोणकलशं निरूहेदिति ॥ इदानीं द्वेष्यप्रियकल्पयोर्विषयं दर्शयति ॥

[1] G ins. तं. [2] काल कालम्यानामपि G. [3] °णोक्तं D; °णैकं C. [4] वैशेषिकभंगमपि नेत्याह C. [5] विकल्पः Tg; एककल्पः R2. [6] G om. [7] ते G. [8] द्वेष्यप्रियकल्पयो° G. [9] °भिमर्शमंत्रजपः D; °भिमन्त्र्यजपः G. [10] नित्यदेव G. [11] °ग्रहण C; नित्यकल्पग्रहणे G. [12] प्रीत्ये C. [13] G om. [14] किं तर्हि G. [15] G reads विपर्य्यय इते ऽस्मिन्. [16] °मुख्यान् G. [17] °देशे TD. [18] विपयन्तु° C. [19] °नादिकं C; G om. च. [20] वैशिकानां G. [21] मन्त्रो G. [22] कोदशदेश G.

[a] PV. Br. 6, 6, 2. [b] Cf. PV. Br. 6, 6, 3. 4. [c] Cf. PV. Br. 6, 6, 5. [d] PV. Br. 1, 2, 6.

द्वेष्यप्रियकल्पयोर्मन्त्रौ[1] राजन्यूहेत्[2] ॥ १५ ॥

द्वेष्यप्रियकल्पयोर्मन्त्रौ ब्राह्मणपठितौ राजन्येवोहेत् प्रतीयात् । न ब्राह्मणवैश्ययोः[3] । राजैकविषयावेतौ कल्पावित्यर्थः । कुतः[4] । राज्ञो हि[5] प्रकृतिवर्गो[6] विधिरित्युच्यते[6] । न चासौ[7] राज्ञोऽन्यत्र संभवति । येन[8] "यं द्विष्यात्" "योऽस्य प्रियः स्यात्" इत्यविशेषोक्तावपि "यं राजानं द्विष्यात्" "योऽस्य राजा प्रियः स्यात्" इति ब्राह्मणार्थः । "अमुष्या विशो निरूहामि" इति निरूहणस्य राजैकविषयत्वावगमादिति[9] ॥

तस्य च विशमादिशेत् ॥ १६ ॥

तस्य राज्ञो विशं प्रकृतिवर्गं "अमुष्या विशः" इत्यत्र नाम्ना निर्दिशेदिति ॥

तां चैवान्नाद्येन[10] ॥ १७ ॥

चकारो भिन्नक्रमः । तामेव विशं पुनस्तदापन्नेनान्नाद्येन[11] सह निर्दिशेत् । तदापन्नमन्नाद्यमपि[12] नाम्ना निर्दिशेदिति यावत् । तद्यथा । "इदमहं युधिष्ठिरं भारतं कुन्त्याः पुत्रं भीमार्जुनादिरूपायां विशि कुरुक्षेत्रराज्यरूपेऽन्नाद्ये[13]ऽध्यूहामि" इति । अन्नाद्यशब्दो भोगवचनः[14] ॥

अत्र ब्राह्मणं । "यः कामयेत विशा राष्ट्रं हन्यामिति व्यूह्य ग्रावणोऽधो द्रोणकलशं सादयित्वोपांशुसवनमुपरिष्टादभिनिदध्यात् इदमहममुया विशाऽदो राष्ट्रं हन्मीति"[a] । तद्व्याचष्टे ॥

उपांशुसवनो[15] नाम ग्रावा[16] पञ्चमस्तमुपरिष्टाद्द्रोणकलशस्य कुर्याद्राष्ट्रजिघांसुः[17] प्रतीवेशां[18] बलवतीं विशमादिशन्[19] ॥ १८ ॥

उपांशुग्रहाभिषवार्थो[20] ग्रावा उपांशुसवनः पञ्चमः । चतुर्षु ग्रावसु योजितेषु द्रोण-

[1] द्वेष्यप्रिययो मन्त्रौ G. [2] TG reads द्वेष्यकूर्थ्यानुजपेयुरनुजपेयुरन्येन इते मन्त्रप्रियकल्पयोर्मन्त्रौ राज्यन्यूहेत्. [3] वामवैश्य° G. [4] कुत एव C. [5] G om. [6] °वर्गावित्युच्यते G; °वर्गौ विधीत्युच्यते C. [7] वासौ G. [8] तेन G. [9] राजविषय° G. [10] चैव नाद्यैवेन TG. [11] °प [?] न्ने ' नांनात्यिक D; °पत्तेन्नान्नाद्येन C; पुनर्मन्त्रगतेनान्नाद्येन G. [12] तदायंतमन्नाद्य । मवि C; तदापं [?] न्नमनादयामवि D; G reads only अन्नाद्यमपि. [13] °रूपेना [corr. to °णा] ना [in marg.] द्ये D; °रूपेणांनाद्ये C; कुरुचेत्रे [corr. fr. °च] राजंन्यरूपे न्नाद्ये G. [14] भा° G. [15] उपांशुसमन TG. [16] ग्रामा Tg. [17] °द्राष्ट्रं जि° D; °सुः Tg. [18] प्रति° TD, D. [19] G om. this Sūtra; TG reads °द्रोणकशस्यौ ब्राह्मणविहित दन्यत्रैषकल्पः काम्यानां द्वेष्यकल्पादिन्यच कुर्याद्राष्ट्रजिघांसुः, etc.; cf. with Ss. 10 and 11. [20] उपाविशत्नुपांशु° G.

[a] PV. Br. 6, 6, 5.

कलशाध्यूहने च नित्यवत्कृते पश्चाद्ग्राव्णः पृथक्कृत्य मध्ये भूमौ द्रोणकलशं सादयित्वा तं पश्चमं[1] ग्रावाणं द्रोणकलशे प्रहरन्निव[2] प्रास्येत्। "इदमहममुया" इति मन्त्रेण प्रतीवेशां[3] राष्ट्रप्रतिपक्षभूतां विशं बलवतीमादिशेत्[4]। स्वामिद्वारेण बलवत्त्वं। यथा ' "युधिष्ठिराधिष्ठितया[5] भीमार्जुनादिरूपया विशा कुरुक्षेत्रं राष्ट्रं हन्मि" इति। अयं च कल्पः स्वकीयेनैव राष्ट्रेण यस्य राज्ञो विरोधो जातः ' तस्येति मन्तव्यमिति। केचित्तु प्रतियोगिनो राज्ञः प्रकृतिवर्गः ' प्रतीवेशा[6] विट् तया प्रतियोगिनो राष्ट्रजिघांसुरिति व्याचक्षत इति ॥

एतेषामेकं कृत्वा पथ्यं कुर्यादिति गौतमः ॥ १९ ॥

एतेषां काम्यानामेकं कृत्वा पुनस्तदानीमेव क्रत्वर्थतया नित्यं कुर्यात्। पथ्यशब्दो नित्यवचन इति[7] ॥

तदेवेति धानंजय्यः ॥ २० ॥

तदेव काम्यक्रतोरप्युपकारणं[8] पुनर्नित्यमपेक्षणीयमिति मन्यते[9] ॥

पृष्ठानामन्ते पूर्वया द्वारा निष्क्रम्य काम्यं शाण्डिल्यः ॥ २१ ॥

पृष्ठस्तोत्राणामन्ते माध्यन्दिने[10] सवने[10] संस्थिते[10] पूर्वया द्वारा निष्क्रम्य ग्रावयोजनं पृथगेव कुर्यात्। स्वस्थाने तु सर्वत्र नित्यमेव कुर्यादिति ॥

पवित्रेण द्रोणकलशं संमृज्यात् "वसवस्त्वा"[11] इति बुध्नं "रुद्रास्त्वा" इति मध्यम् "आदित्यास्त्वा"[a] इति बिलम् ॥ २२ ॥

दशापवित्रेण द्रोणकलशं संमृज्यात्। एकवचननिर्देशादुद्गातैवेति ॥

एतेषामेकैकेन त्रिस्त्रिरनुसवनं संमृज्यादिति धानंजय्यः ॥ २३ ॥

एतेषामेकैको मन्त्रः प्रतिसवनं। नात्र बुध्नादिनियमः[12]। अनुक्तत्वादिति ॥

[1] पञ्च G. [2] प्रहरणंनिव G. [3] प्रति° D, G. [4] °दिशन् C. [5] युधिष्ठिरायुधिष्ठितया G.
[6] प्रति° D, G. [7] G reads एतेषां काम्यानामेकं कृत्वा प्रातःसवने सकृत् कृत्वा नित्यमेव कल्पमुत्तरयोः सवनयोः कुर्यात्। पुनः पुनः काम्यमिति। [8] काम्यं क्र° C, D. [9] G reads काम्यं चेत प्रातस्सवने कृतं तदेव काम्यमुत्तरयोरपि सवनयोरित्यर्थः। [10] G om. [11] यसव° G.
[12] बुभादीनि° C; बुध्नादिति° D.

[a] PV. Br. 1, 2, 7; cf. PV. Br. 6, 6, 7.

सर्वैः सर्वेष्विति शाण्डिल्यः ॥ २४ ॥

प्रतिसवनं त्रयोऽपि मन्त्राः बुध्नादिनियममनादृत्य[1] भवेयुरिति ॥

सर्वैर्बुध्नं सर्वैर्मध्यं सर्वैर्बिलमित्येके ॥ २५ ॥

स्पष्टं[2] ॥

बिलं मध्यं बुध्नमित्यपरम् ॥ २६ ॥

बिलं मध्यं बुध्नमित्यनेनैव[3] क्रमेण संमृज्यादिति ॥

अवधूय पवित्रमुदग्दशमवाङ्नाभि[4] वितनुयुः[5] "पवित्रं ते"[a] इति ॥ २७ ॥

दशापवित्रस्य मध्ये शुक्लामूर्णास्तुकां[6] सोमधारास्रावणार्थं[7] यजमानः करोति । सा नाभिरित्युच्यते । उदीचीनदशमवाचीननाभि च दशापवित्रं कृत्वा द्रोणकलशस्योपरिष्टाद्वितनुयुः । उपरि च[8] वितत्य दशापवित्रस्य कोणं[9] धारयेयुः । तथा च ब्राह्मणं । "पवित्रं विगृह्णन्ति"[10 b] इति[10] । वितत्य[11] धारणं[11] विग्रहणमिति ॥

तृचेनैके[12] ॥ २८ ॥

स्पष्टमिति[13] ॥

संततायां धारायामुद्गाता जपेत् "प्र शुक्रा"[14 c] इति[14] ॥ २९ ॥

पवित्रविताने त्रयाणामप्यन्वयादितरयोर्निवृत्त्यर्थमुद्गातुर्ग्रहणमिति ॥

"अमुष्य राज्याय"[c] इति प्रियं राजानमादिशेत् ॥ ३० ॥

"प्र शुक्रैतु"[15] इति[15] मन्त्रान्तो[16] "अमुष्य राज्याय" इति । तत्रामुष्येत्यत्रोद्गातुः प्रियं राजानं नाम्नादिशेत्[17] । "युधिष्ठिरस्य[18] राज्याय"[18] इत्यादि[18] ॥

[1] °कृत्य C. [2] D and C om. [3] C reads तेनैव वा क्रमेण, etc. [4] °वाङ्न्याभि Tg. [5] वितन्युयुः Tg. [6] °सुकां C. [7] °स्रव° D. [8] G om. [9] °कोणां D; C ins. द्रोणकलश. [10] विगृह्णातीति D, C. [11] वितत्यावधा° G. [12] ऋचे° Tg; Sāyaṇa, in quoting this Sūtra in his Comm. on PV. Br. 6, 6, 15, reads ऋचैक इति. [13] G om. [14] शुक्रेत्विति C, D, TD. [15] शुक्रस्येति G. [16] मंत्रांते C; मन्त्रस्यान्तो G. [17] G om. नाम्ना. [18] G om.

[a] PV. Br. 1, 2, 8. SV. I, 6, 2, 12; II, 2, 2, 16, 1. [b] PV. Br. 6, 6, 12. [c] PV. Br. 1, 2, 9, and 6, 6, 16.

"राज्ञो[1] राज्याय" इति वा[2] ॥ ३१ ॥

अथवा "राज्ञो राज्याय" इति सामान्येनादिशेदिति[3] ॥

"यजमानस्य राज्ञो राज्याय" इति वा[4] ॥ ३२ ॥

अथवा यदा क्षत्रियो यजमानः । तदानीममुष्येत्यस्य यजमानस्य राज्ञ इति निर्दिशेदिति[3] ॥

"सोमस्य राज्ञो राज्याय" इति वा[5] ॥ ३३ ॥

अथवा[6] सोमस्य राज्ञ इति निर्दिशेदिति । तमेव पक्षं स्थापयति ॥

"सोमस्य"[7] इत्येव[7] ब्रूयात् सोमराजानो[8] हि ब्राह्मणाः ॥ ३४ ॥

यस्मात् सोम एव ब्राह्मणानां राजा[a] । तस्मात् सोमस्य राज्ञ इत्येव निर्देशः । क्षत्रियवैश्ययोरपि दीक्षयैव[9] ब्राह्मणत्वात्सोमस्येत्येव तयोरपि निर्देशः । "ब्राह्मणो वा एष[10] जायते यो दीक्षितः" इति श्रुतेरिति[b] ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ १० ॥

[1] राज्ञो G. [2] Tg om. [3] G om. Comm. on this Sūtra. [4] G and T om. this S.
[5] This S. is wanting in G. [6] G om. [7] सोमस्य वा त्येव TG. [8] सोमो रा° TG.
[9] दीक्षायैव G. [10] येष G.

[a] Cf. VS. 9, 40. S'. Br. 5, 4, 2, 3. [b] Cf. S'. Br. 3, 2, 2, 22.

आग्रयणं गृह्णन्नध्वर्युर्हिङ्करोति तदा प्रवृणीरन् “अग्निः[1] प्रस्तोता ऽहं मानुषो बृहस्पतिरुद्गाता ऽहं मानुषो[2] वायुः प्रतिहर्ता ऽहं मानुषः” इति यथालिङ्गम् ॥ १ ॥

यथालिङ्गं मन्त्रैर्देवानुद्गातॄन् प्रवृणीरन् । प्रवरणमभ्यर्थनं[3] । तद्यथा । अग्निरेव[4] प्रस्तोता[5] ऽस्तु स एव हि सर्वं[6] वेद[6] । अहं तु मानुषः प्रस्तोता तदधिष्ठितो यथाशक्ति[7] करोमीति । यथा[8] ऽध्वर्युर्देवं होतारं वृणीते । “अग्निर्देवो दैव्यो[9] होता” “देवान्यक्षत्”[a] इत्यादि तद्वदेव तत् ॥

न प्रवृणीरन्निति धानंजय्यः ॥ २ ॥

तथा हि न वयं प्रवरमन्त्रानधीमहे । किं च । “यन्निवत्याऽऽर्त्वीचा[10] ऽन्यानृत्विजो वृणीते[11] । कस्मादुद्गातारो ऽवृता आर्त्विज्यं कुर्वन्ति”[b] इति ब्राह्मणे ऋगन्तरवदुद्गातॄणामपि वरणं[12] कार्यमिति । चोदयित्वा “यद्द्रोणकलशमुपसीदन्ति तेनोद्गातारो ऽवृताः”[c] इति द्रोणकलशोपशक्तिमात्रेण[13] वरणं कृतं । न पृथक् कार्यमिति दर्शयति[14] ॥

प्रवृणीरन्नेवेति शाण्डिल्यः ॥ ३ ॥

स्पष्टमिति[15] ॥

अथ वाचं यच्छेयुः ॥ ४ ॥

प्रवरानन्तरं वाचं यच्छेयुरिति[14] ॥

[1] न्यनग्निः G. [2] D ins. वा. [3] प्रवण° D, C. [4] अग्निर्वै G. [5] प्रस्तोतु C; प्रस्तोतुस् G. [6] सर्वे वेदे C. [7] °क्तिं G. [8] The end of Comm.; यथा—तत् wanting in G. [9] D om. [10] अन्वि D. [11] D has orig. वृणते, as in PV. Br. [12] वर्णं C. [13] °शक्ति° C. [14] G om. the Comm. on this S. [15] स्पष्टे G.

[a] S'. Br. 1, 5, 1, 5. 6. [b] PV. Br. 6, 5, 16. [c] PV. Br. 6, 5, 17.

ऋतसदने[1] वा ॥ ५ ॥

"ऋतस्य सदने सीदामि"[a] इति मन्त्रेण[2] यत्र पूर्वमुपविष्टं । तदृतसदनस्थानं[3] । तत्रोपविश्य तदाप्रभृति वाग्यताः स्युरिति ॥

वेदिं वाक्रामन्तः[4] ॥ ६ ॥

अथ वा यदा "मृदा शिथिरा" इति मन्त्रेण वेदिमाक्रामन्ति[5b] । तदाप्रभृति[5] वाग्यताः स्युरिति ॥

स्तुते बहिष्पवमाने[6] विसृजेरन् ॥ ७ ॥

स्तुते बहिष्पवमाने[7] वाचं विसृजेरन् । नान्तरा कदाचिदिति ॥

उत्तराद्धविर्धानाद्ध्रुवस्थालीं हरन्तः पश्चिमेनोद्गातॄन् हृत्वा तेनैव प्रतिहरेयुः[8] ॥ ८ ॥

यदा[9] ऽध्वर्यव[9] उत्तरहविर्धानाद्ध्रुवग्रहणार्थं[10] ध्रुवस्थालीं हरन्ति । तदा ते पश्चिमेनोद्गातॄन् हृत्वा[11] प्रतिहरेयुः ॥

नैनानग्रेण[12] हरेयुः[12] ॥ ९ ॥

द्रोणकलशस्योद्गातॄणां च[13] न मध्यमदेशेन[14] हरेयुरित्यर्थः[14] ॥ ननु च । अध्वर्युकृत्यं किमत्र[15] विधीयते अत आह ॥

अपि[16] ह्यध्वर्यवो ऽप्यकुशला[17] भवन्तीति ॥ १० ॥

अध्वर्यवो ऽप्यस्मिन्नर्थे कदाचिदकुशलाः स्युः । तत्सूत्रेष्ववचनात्[18] अतो ऽस्माभिरेतदुक्तं । अध्वर्युभिरत्राविहितैर्भवितव्यमिति ॥

[1] ऋतस्य सदने TG; ऋतसवदने D. [2] G om. [3] तदृतचदनं G; तदृतसवनस्थानं D. [4] C reads वेदिमाक्रामंतमिति. [5] °मन्त एवं G. [6] Tg ins. न. [7] G ins. वा. [8] This S. is wanting in G. [9] G om. [10] उत्तराद्धवि° G. [11] हित्वा G. [12] G reads नाग्रेणेति; D orig. नाग्रेमेति; corr. in margin ण हरेयुरि; C corr. नाग्रे° to नैनानग्रे°. [13] C om. [14] °देशे निह° G. [15] किमर्थं G. [16] अपी C. [17] पकु° C (corr. from अकु°). [18] तत्सूत्रेष्वे° G.

[a] Cf. 3, 1, 15. [b] 3, 1, 2.

अभिपीड्य[1] पवित्रमध्वर्युं निःसर्पन्तं प्रस्तोता संतनुयात् ॥ ११ ॥

अभिपीडनं प्रस्तोतृकर्मगृहीतेषु[2] ग्रहेषु[3]। दशापवित्रं निष्पीड्य निश्चोत्य हविर्धानद्वारेण वैप्रुषहोमार्थं निःसर्पन्तमध्वर्युं प्रस्तोताऽन्वारभेतेति ॥

तमुद्गातोद्गातारं प्रतिहर्ता तं ब्रह्मा ब्रह्माणं यजमानः ॥ १२ ॥

सर्वत्र[4] संतनुयादित्यनुवर्तते ॥ एषां[5] समन्वारम्भे[5] प्रमाणमाह ॥

"पञ्चर्त्विजः संरब्धाः सर्पन्ति"[a] इत्येतानाह[6] ॥ १३ ॥

"पञ्चर्त्विजः संरब्धाः सर्पन्ति" इति ब्राह्मणं। एतानेवानूक्तानृत्विज[7] आह। नान्यान्। कुतः। अनन्तरमेव ब्राह्मणे त्रयाणां तावदुद्गातॄणामवच्छेदे[8] दोषवचनात्[9b]। ते[9] तावत्त्रय इति गम्यते। "अध्वर्युः प्रस्तरं हरति"[c] इति वचनात्स[10] एकः। सर्वत्र ब्रह्मणो[11]ऽनुसंधातृत्वात्स एकः। एवमेते पञ्चर्त्विज इति ॥

दोषवचनाद्यवच्छेदाज्जुगुप्सेरन् ॥ १४ ॥

"यदि प्रस्तोताऽवच्छिद्यते"[d] इत्यारभ्य ब्राह्मणे गुरुतरदोषवचनाद्गुरुतरप्रायश्चित्तविधानाच्च[12] सर्वात्मनावच्छेदं परिहरेयुरिति ॥

न राजानमालभ्यानुपस्पृश्याप आज्यमालभेरंस्तथाज्यं राजानं[13] सर्वत्र ॥ १५ ॥

सर्वत्र राजानं स्पृष्ट्वा राजस्पर्शने[14] कृते अनुपस्पृश्यापो घृतं न स्पृशेयुः। तथा[15] घृतं स्पृष्ट्वा[16]ऽनुपस्पृश्यापो[17] न[18] राजानं स्पृशेयुः ॥ तत्र प्रमाणमाह ॥

[1] अपिपी॰ Tg. [2] अध्वर्युकर्म॰ G. [3] ग्रहणेषु D. [4] C om. [5] तेषामन्वा॰ G. [6] G om. this Sūtra; ॰त्येतेनाह Tg; ॰त्येतान्याह R1. [7] एतामेव अनुक्रा॰ C; ॰वानुक्रा॰ D. [8] तद्वदुद्गातॄणामविच्छेदे G. [9] ॰चनं ते C; ॰चनानंतरं D. [10] G om. स. [11] ब्रा॰ G. [12] ॰धानत्वात्स C. [13] C corr. to राजानमिति. [14] ॰दर्शने G. [15] तदा G. [16] अस्पृष्ट्वा D. [17] ॰स्पृश्यानपो D; ॰स्पृश्योपो C. [18] G om.

[a] PV. Br. 6, 7, 12. [b] PV. Br. 6, 7, 13-15. [c] PV. Br. 6, 7, 16. [d] PV. Br. 6, 7, 13.

"वज्रो[1] वा[2] एष[2] सोमस्य यदाज्यम्" इति तयोरसमवायमाह ॥ १६ ॥

"वज्रो वा एष सोमस्य यदाज्यम्" इति श्रुतेः। तयोराज्यसोमयोरसंगतिमाह। सोमस्य वज्रो[3] घृतं घृतं वै देवा यज्ञं कृत्वा सोममपघ्नन्तीति[4] श्रुतेः। तेन घृतात्सोमस्य भयं भवति तत्परिहारायापामुपस्पर्शनं मध्ये कर्तव्यमिति। अनन्तरं प्रवृतहोमं[5] करिष्यतामुदकोपस्पर्शनार्थमेतत्सूत्रं। पूर्वं दशापवित्रं निष्पीडने[6] राजस्पृष्टत्वादिति[7] ॥

अध्वर्युणा हुते प्रवृतहोमौ जुहुयुर्गत्यानुपूर्व्येण[8] "बेकुरा[9] नामासि"[9a] "सूर्यो मा"[10b] इति[10] ॥ १७ ॥

अध्वर्युणा वैप्रुषहोमे कृते सर्पणक्रमेण त्रयोऽपि प्रवृतहोमौ जुहुयुः। होमस्य[11] सव्यहस्तेनेत्याहुः[12]। कुतः। अन्वारम्भवेलायामसंजातविरोधिना[13] दक्षिणेन हस्तेनान्वारम्भात्। तद्विच्छेदस्य चायुक्तत्वात्। उत्तरत्र सव्यैः पाणिभिः तृणनिरसनविधानाच्च[c]। व्यावृत्तत्वाद्धि[14] दक्षिणहस्तस्य सव्यैः पाणिभिरिति वचनं[15]। नान्यथेति। केचिदत्र[16] प्रवृतहोमाविति[17] समाख्यानात् प्रवराभावे[18] होमनिवृत्तिमाहुः। तदयुक्तं। जैमिनिकल्पे प्रवरणमनुक्त्वैव प्रवृतहोमविधानात्[17]। तस्मादयमर्थः। रक्षोभ्यस्त्राणाय देवानां[19] यज्ञे बृहस्पतिना प्रार्थितानां सूर्यादीनां देवैः प्रार्थिताया[20] वाचस्य[20] यौ होमौ तौ प्रवृतहोमाविति। अत्र "बृहस्पतिर्वै देवानामुदगायत्"[21d] इति[21] ब्राह्मणे। स्पष्टोऽयमर्थ इति ॥

संस्तुतसोमे त्वधिकामुद्गाता जुहुयात् "संवेशायोपवेशाय"[e] इति यथासवनं छन्दांस्यादिशन् ॥ १८ ॥

पृथक्[22] प्रयोजनानां युगपदेकस्मिन्देशे सुत्यायां सवः तस्मिन् संस्तुते सोमे प्रवृतहोमानन्तरमुद्गाताऽधिकामेकामाहुतिं जुहुयात्[22]। "संवेशायोपवेशाय" इति ब्राह्मण-

[1] यज्ञो G. [2] वैष TG. [3] यज्ञो D. [4] सोममघ्नंनीति (corr. to °निति) D. [5] G om. the passage तयोराज्यसोमयोः—प्रवृतहोमं, and proceeds: त्रयाणामुदकापस्पर्शनाभ्यां किमेतत्, etc. [6] °डनेन G. [7] राज्ञ स्पृ° G; राजस्पृर्शत्वा° C. [8] जुहुयुरित्या° Tg; °पूर्वेण R2, TD, TG. [9] बेकुरेति Tg. [10] मेवति संस्तुतसोमेति G. [11] होमस्य G. [12] सव्येन ह° G. [13] °वेलायां संजा° G; °विरोधिनां C. [14] व्यावृत° D. [15] °नात् G. [16] केचितत्र G. [17] प्रवृत्त° G. [18] प्रवरणा° G. [19] देवता G. [20] °तया वाचा G; °ताया वाचाश्च C. [21] °मुद्गायेदिति D; °मुदगायेदिति C. [22] The passage पृथक्—जुहुयात् is in G only.

[a] PV. Br. 1, 3, 1. [b] PV. Br. 1, 3, 2. [c] 3, 3, 26. [d] PV. Br. 6, 7, 1. [e] PV. Br. 9, 4, 6.

पठितैर्मन्त्रैर्यथासवनं छन्दांस्यादिशन् "संवेशायोपवेशाय गायत्र्यै छन्दसेऽभिभूतये[1] स्वाहा" इति प्रातःसवने होमः । "संवेशायोपवेशाय त्रिष्टुभे"[2] इति माध्यन्दिने । एवं "जगत्या अभिभूत्यै" इति तृतीयसवने । यथासवनमित्येकस्मिन्नेव सवने न[3] त्रयोऽपि मन्त्राः स्युरिति । अत्र केचिदाहुः । उद्गातृशब्देनात्र सवनोद्गाताऽभिधीयत[a] इति । कः पुनः सवनोद्गाता नाम[4] । तत्राप्याहुः । उद्गाता प्रातःसवने प्रस्तोता माध्यन्दिने प्रतिहर्ता तृतीयसवन इति । तेन तत्र तत्र सवने तेन तेनैव[5] संवेशायेति होतव्यमिति । तदयुक्तं । न हि सवनोद्गाता नाम[4] कश्चिदस्ति । क्वचिदपि सूत्रकारेण तथा व्यपदेशाभावात्[6] । ननु च । उत्तरयोः सवनयोः "यथासनमुपविश्य प्रस्तोता हविर्धानं गच्छेत्"[b] इति वचनादुद्गातुर्गमनं नास्ति । तेन यथासवनमुद्गाता जुहुयादित्युक्ते प्रस्तोतृप्रतिहर्त्रोरप्युद्गातृशब्देनाभिधानमिति गम्यते । नैतदेवं । उद्गातुर्गमनाभावेऽपि होममात्रमेव वचनात् । गत्वा करिष्यति । नैतावता सवनोद्गाता नाम कश्चित्कल्पनीय[7] इति[7] ॥

"ऋचं साम"[c] इति स्वाहाकारान्तया तृतीयां सर्वत्र ॥ १९ ॥

सर्वत्र[8] संसवे चासंसवे च[9] "ऋचं साम" इति स्वाहाकारान्तयर्चा[10] तृतीयामाहुतिमुद्गातैव जुहुयादिति ॥

स[11] एवेति शाण्डिल्यः ॥ २० ॥

स एवोद्गाता प्रवृत्तहोमौ जुहुयात् । नेतराविति शाण्डिल्यः । कुतः । "बृहस्पतिर्वै देवानामुदगायत्"[12 d] इति ब्राह्मणेनोद्गातुरेव प्रवृत्तहोमविधानात् । पक्षान्तरस्य मूलं तु । "उद्गातारो वै वाचे भागधेयं कुर्वन्ति"[13 e] इति[13] तत्रैव ब्राह्मणे बहुवचननिर्देश इति ॥

[1] ऽभिवृतये G. [2] त्रिष्टुभे छन्दसे भित्तत्या G. [3] G puts न after मन्त्रा.
[4] G om. [5] G om. एव. [6] °देशात् C. [7] °नीयमिति C. [8] G om.
[9] C om. [10] °न्तयचा D; °न्तयर्चे C; °न्तया च G. [11] G om. [12] °मुत्गाये° G.
[13] पूर्वतीति D.

[a] Thus Rudrask. [b] 5, 3, 7. [c] SV. I, 4, 2, 3, 10. [d] PV. Br. 6, 7, 1.
[e] PV. Br. 6, 7, 5.

महागिरिमहानदीरथाहर्वायुव्यवायेष्वसंस्रवः[1] ॥ २१ ॥

महागिरिभिर्विन्ध्यादिभिर्महानदीभिर्गङ्गादिभिश्च व्यवाये संस्रवदोषो नास्ति । तथा[2] यावति[2] प्रदेशे[2] महावातो वाति ' तावता व्यवायेऽपि[3] । तथा एकस्मिन्नहनि यावन्तं देशं रथो गन्तुं शक्नोति[4] ' तद्रथाहरित्युच्यते[4] । तेन व्यवायेऽपि नास्ति । राजदन्तादिवत्[5] परनिपात[6a] इति ॥

पृथग्जनपदे[7] च ॥ २२ ॥

व्यवायाभावेऽपि जनपदभेदे संस्रवदोषो[8] नास्ति ॥

अविद्विषाणमात्रादित्येके[9] ॥ २३ ॥

अविद्विषाणेति[9] भावपरो निर्देशः । यजमानयोरन्योन्यमविद्विषाणमात्रादेव[10] संस्रवदोषो नास्ति । नान्यदपेक्षणीयमित्येक इति ॥

हुत्वा जपेयुः "ब्रह्माऽहं गायत्रीं[11] वाचं प्राणं प्रजापतिं प्रपद्ये[12]ऽश्मानमाखणं पर्यूहे" इति ॥ २४ ॥

स्पष्टमिति ॥

अध्वर्युमन्वावर्तेरन् सर्पन्तः[13] ॥ २५ ॥

येन पथा येन[14] प्रकारेणाध्वर्युः सर्पति ' तेनैव[15] पथा तेन[14] प्रकारेण तमन्वावर्तेरन्निति ॥

सव्यैः पाणिभिः पृथग्दक्षिणा[16] तृणानि[17] निरस्येयुः "यो ऽद्य सौम्यः"[18 b] इति ॥ २६ ॥

सर्पन्त इत्येवान्वारम्भे[19] दक्षिणहस्तस्य व्यावृत्तत्वात्सव्यैरिति[20] वचनमिति ॥

[1] ॰गिरिर्म्म॰ TD; Tg om. वायु. [2] यथा अवन्तीदेशे G. [3] क्वि C. [4] After शक्नोति G reads तावता व्यवाये ऽपि नास्ति । एकमहरपितरतमगच्छन्नथोहरित्युच्यते. [5] ॰दन्तादित्मान् D; ॰दन्तादित्वात् C. [6] परि॰ G. [7] ॰पदेषु G, Tg. [8] संस्रवो G. [9] अविद्यु॰ G; G om. ति. [10] ॰विद्यु॰ G. [11] ॰त्रं G. [12] D om. प्र. [13] सर्पन्ति G. [14] G ins. च. [15] तेन च G. [16] ॰क्षिणानि G. [17] G om.; तृणान् Tg; तृण D; तृणा TG. [18] सोम्य Tg; सोम TG. [19] इत्यनुवर्तते । C. [20] C om. व्या; प्रावृत॰ G.

[a] Cf. Pāṇ. 2, 2, 31. [b] PV. Br. 1, 3, 3.

चात्वालदेशं प्राप्याध्वर्यावुपविष्टे[1] तस्मात् प्रत्यगुपविशेयुः "यो[2] म आत्मा"[a] इति[2] ॥ २७ ॥

स्पष्टमिति ॥

प्रत्यङ्मुखः प्रस्तोतोदङ्मुख उद्गाता[3] पश्चिमेनोद्गातारं[4] गत्वा दक्षिणपूर्वमष्टमदेशमीक्षमाणः प्रतिहर्ता ॥ २८ ॥

उपविष्टेऽध्वर्यौ तस्य पश्चाद्देशे प्रत्यङ्मुखः प्रस्तोतोपविशेत् । तस्य पश्चादुदङ्मुख[5] उद्गाता[5] । उद्गातारं[5] पश्चिमेन गत्वा दक्षिणपूर्वमष्टमदेशमीक्षमाणः[6] तं[7] चाभिमुखः प्रतिहर्तोपविशेदिति[8] ॥

सव्याधरानुपस्थान् कृत्वा द्यावापृथिव्योः सन्धिमीक्षमाणाः समानि[9] मुखानि धारयन्तः ॥ २९ ॥

सव्यः पादोऽधरो यस्येति सव्याधरः । उपस्थ उत्सङ्गः । द्यावापृथिव्योः सन्धिमवेक्षेरन् नाधस्तान्नोपरिष्टात् कायेन समं शिरो[10] धारयन्तः[11] । न नमवदना इत्यर्थः ॥

एवं सर्वस्तोत्रेष्वासीरन् ॥ ३० ॥

एवमिति प्रत्यङ्मुखत्वादिकमतिदिश्यते[12] । आवृत्तिस्तोत्रेषु तु "नमः सखिभ्यः"[b] इति मन्त्रविधानात् "यो म आत्मा" इति मन्त्रो[13] निवर्तत इति ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ११ ॥

[1] °ध्वर्या उप° TG, G. [2] आत्मा यामिति Tg. [3] G om. [4] G om. पश्चिमेन. [5] °खमुद्गातारं G. [6] °र्वमवान्तरदे° G. [7] तां D. [8] °विशति G. [9] सामानि TG. [10] G ins. यथा. [11] धारतः G. [12] °त्वादिकमदितिश्यते C. [13] G om.

[a] PV. Br. 1, 3, 4. [b] Cp. 4, 4, 13 (4, 3, 11).

चतुरवरार्ध्या उपगाः स्युः ॥ १ ॥

सर्वस्तोत्रेष्वित्यनुवर्तते। कुतः। "यो ऽनुपगीतं सामादत्ते मुष्यते[1] ह्रुच"[2] इत्यादिना[3] सामसामान्येनोपगानविध्यवगमात्[4]। "एकाचरेषु नोपरमन्ति"* इति च वक्ष्यमाणं सूत्रं सर्वस्तोत्रेषूपगानं[5] युज्यते। नान्यथेति। उपगायन्तीत्युपगाः[6]। सर्वेषु स्तोत्रेषु चत्वारो ऽवरार्ध्या उपगातारः स्युः। तत्प्रमाणं[7] ब्राह्मणमुदाहरतीति ॥

तथा हि भाल्लविब्राह्मणं[8] भवति। "यो ऽनुपगीतं सामादत्ते[9] मुष्यते[10] ह्रुक्षो[11] भावुको भवत्युपगातृभ्यः[12] प्रस्वरेत् प्राणो वै स्वरः[13] प्राणेनैव साम संतनो-तीति[14] वल्गुतमं सामोपगीतं भवति तस्मादप्युपगेयम्" ॥ २ ॥

उपगेयमित्यस्यानन्तर्यमिति शब्दोऽध्याहर्तव्यो[15] ब्राह्मणसमाप्तिसूचकः। यो ऽनुपगीतं साम गायति। असौ राचणादिभिर्मुष्यते अपह्रियते[16]। तस्य साम रचांस्यपहरन्तीत्यर्थः[17]। किं च। ह्रुचः शुक्लशरीर[18] उद्गाता[18] स्यात्। उपगानेन साम्नः[19] स्नेहाकरणात्[19]। तस्मा-दुपगातृभ्यः[20] प्रस्वरेत्। प्रकर्षेण स्वरणं[21] प्रस्वरः उपचयः साम्नां[22] वृद्धिरिति यावत्। उपगातृभ्य इति पञ्चमी। साम्नः[22] स्वरवृद्धिमुपगातृभ्यः संपादयेत्[23]। उपगातृभिर्गीतं[24] वर्धयेदित्यर्थः[24]। तत्र प्रणवेन त्रिवृता ब्राह्मणोपगानादृचति[25] स सिद्धिरित्यभिप्रायः।

[1] मुष्येते D; G om. [2] G om. [3] G om. आदिना. [4] D om. साम.
[5] °ने D, G. [6] °गाता G. [7] तत्रप्र° G. [8] भालवि° TD; भालवी° D. [9] समादत्ते TG; सामाधत्ते Tg. [10] TG om. ते. [11] ह्रुचुको TD. [12] भवतित्यु° D. [13] प्रस्वरः G.
[14] Tg, TG om. इति; rest of Sūtra and beginning of Comm. up to यो ऽनुप° are wanting in G.
[15] व्याह° C. [16] अपिहियन्ते C; अपिहियतो D. [17] °पहन्ति। G. [18] °शरीरुत्गाता D.
[19] साम्नस्तेव्याकर° G. [20] °दुत्रातृ° C. [21] स्वरः G. [22] G om. [23] संवाद° C.
[24] °गातृभिर्भवेर्द्धये° G. [25] °नादृच नि D; ब्रह्मणे पगानां रचति C.

* 3, 4, 11.

किं च । उपगातृभिः क्रियमाणो यः स्वरः प्रणवात्मकः । स साम्नः प्राणः । तेन साम संतनोति । अन्यथा पञ्चानां भक्तीनां त्रिभिः पुरुषैः पृथगेव गानात् साम्नः पर्वविच्छेदः । यथा शरीरे हस्ताद्यङ्गानि विच्छिद्येरन्[1] यथा च ब्राह्मणः[2] सर्वाण्यङ्गानि संधत्ते । एवं प्रणवसामपर्वाणीत्यर्थः । किं च । प्रकृत्या साम वल्गुश्राव्यं भवति । उपगानेन वल्गुतमं भवति । यथा लौकिकी गीतिः सहकारिभिरुपगीयमाना[3] । तस्मादप्युपगानं कार्यमिति[4] ॥

चत्वार उपगाः[5] स्युश्चतस्रो[6] दिशो "दिग्भिरुपगायन्ति" इति च ब्राह्मणम्[7] ॥ ३ ॥

स्पष्टमिति[8] ॥

षड्वा षडृतवः "ऋतव[9] उपगातारः"[a] इति च[10] ब्राह्मणम्[11] ॥ ४ ॥

षड्वा षडुपगातारः स्युः । एवं सति साक्षादृतव एवोपगातारः कृता भवन्तीति[11] ॥

यावन्तो वा संस्वरेरन्[12] ॥ ५ ॥

यावन्तः पुरुषा उपगानेन संस्वरेरन् साम्ना[13] संगतं स्वरेरन्[14] न[15] सामध्वनिमभिभवेयुरित्यर्थः[16] । तावन्त उपगायेयुः । तेन[17] चत्वारो नियताः तत ऊर्ध्वमनियम इति ॥

[1] विच्छिद्देरन् C; विच्छेद्येरन् D. [2] °णं C. [3] °नात् C. [4] For तत्र प्रणवेन त्रिवृता, etc., G has the following passage: तथा च महाव्रते तैनेदमुपगायतां तासां महेष्यत इति उपगानाचरे य स्वरार्थः [?] प्राणस्तस्मादुपगाने कृते प्राणेन संततं साम भवति अन्यथा निष्प्राणं साम स्यादिति ब्राह्मणार्थः । अन्यमपि ब्राह्मणान्तरमाह । वल्गुतमं सामोपगीतं भवति यथा लौकिकगीतिः सहकारिभिरुपगीयमाना । तद्वत् । [5] उपगातारः Tg. [6] Tg om. स्युः. [7] G om. this Sūtra. [8] G om. [9] Tg and TG om. (in TD on marg.). [10] TD om. [11] This Sūtra seems to be divided in two in G, thus: षड्वा षडुपगातारः स्युः । तत्र ब्राह्मणमाह । षडृतव उपगातार इति च ब्राह्मणं । स्पष्टं । [12] संस्मरेरन् G, TG. [13] साम्नां G. [14] स्मरेरन् C (G reads here स्व°). [15] C om. [16] सामद्धनन्तीमभि° G; तस्माद्ध्वनि° C. [17] G om.; the rest of the Comm. runs in G thus: चत्वारष्षडिति वा नियमः कार्यः ।

[a] PV. Br. 25, 18, 4.

ते हो इत्येतेनाक्षरेणोपगायेयुरोमिति[1] यजमानः ॥ ६ ॥

त उपगातारः सर्वेषु स्तोत्रेषु हिङ्कारप्रभृत्या स्तोत्रपरिसमाप्तेः हो इत्येतेनाक्षरेणाविरतं[2] प्लुतोच्चारणेनोपगायेयुः । तथैव यजमानोऽपि[3] प्रणवेन । तत्र हो इति परमात्मनः संबोधनं प्रणवतुल्यमेतत् । कुतः । "उपह्वतां[4] हो[5] इत्याहात्मानमेवोपह्वयत[5] आत्मा[5] ह्युपह्वतानां वसिष्ठः"[a] इति तैत्तिरीयकश्रुतेरिति ॥ अथोपगानप्रकारमाह[6] ॥

प्रष्ट्यन्तरयोरुपविश्य[7] भक्त्यन्तराणि च्छादयन्तो मन्द्र उपगा भवन्ति ॥ ७ ॥

प्रष्टिरिति[8] पार्श्वस्थस्याभिधानं[9] । उद्गातृपार्श्वस्थयोः प्रस्तोतृप्रतिहर्त्रोर्ये[10] अन्तराले[10] तयोरुपविश्य साम्नः[11] पञ्च भक्तीनां[12] छिद्राणि च्छादयन्तो[13] मन्द्रस्वरेणोपगानं कुर्युः । मन्द्र इति सप्तमी । मन्द्रस्वरे[14] स्थिता[15] मन्द्रेणेति यावदिति ॥

व्यन्तर उद्गीथः प्रातःसवनादन्यत्र ॥ ८ ॥

ये स्वरा मन्द्रो मध्यमः क्रुष्टश्चेति । तेषां योऽन्तरो मध्यमः । स[16] व्यन्तरः । तस्मिन्मध्यमे स्वरे प्रातःसवनादन्यत्रोद्गीथः कार्य इति[17] । केचित्तु तदुत्तर इति पठन्ति । तदानीं तच्छब्देन मन्द्रपरामर्शः । मन्द्रादुत्तरो मध्यमस्वर इति स एवार्थः ॥

मन्द्रस्त्वेव[18] प्रातःसवने ॥ ९ ॥

स्पष्टमिति ॥

निधनाय निधनायैवोपरमेयुः ॥ १० ॥

यद्यत्[19] साम्नो निधनं । तत्र सर्वत्रोपरमेयुः[19] । उपगानं न कुर्युः । एतेन ज्ञायते

[1] इत्येकेना° Tg. [2] °रेण विरतं C. [3] वि C. [4] उपह्वतात्मा C. [5] हो त्मात्यात्मनमेवोपह्वयनमात्मा C. [6] G om. this Comm., and has only गतं. [7] पृष्ठ्य TD; पृष्ठ्य° D, G (or प्र°); प्रष्ठ्य° R 2. [8] पृ° D, C (and G ?). [9] °स्थानामभि° G. [10] °र्येदन्तरालं G. [11] साम्नां G. [12] विभक्तीनां G. [13] C and D ins. here मन्द्रस्वरेण (cancelled in D). [14] °स्वरेण D, C. [15] स्थित्वा G. [16] G om. [17] G stops here. [18] प्रमन्त्रस्त्वेव G. [19] यद्यत्—°रमेयुः wanting in G.

[a] Taitt. Saṁh. 2, 6, 7, 3.

निधनव्यतिरिक्तासु भक्तिषु आदित आरभ्य संततमुपगानं[1] कार्यं। न केवलं भक्त्यन्तरालेष्विति[2]। किं च। "वल्गुतमं सामोपगीतम्"[a] इति वचनात् साम्न एवोपगानं[3] न[4] भक्तिच्छिद्रेष्वेव। किं च। "यावन्तो वा संस्वरेरन्"[5b] इति सामस्वरानुपमर्दविधानमपि कृत्स्नस्यैव[6] साम्न उपगाने युज्यते। न च्छिद्रमात्रोपगाने। न हि तदानीमुपमर्दशङ्काऽप्यस्ति गानस्यैवाभावादिति। केचित्तु भक्त्यन्तरेष्वेवोपगानं न साम्न इति मत्वा "निधनाय निधनायैवोपरमेयुः" इत्येतत्सूत्रमुपद्रवनिधनयोर्मध्ये विरामविधिरिति वर्णयन्ति। तदयुक्तं। भक्त्यन्तराणीति[7] बहुवचनेनोपद्रवनिधनान्तरस्यापि परिग्रहात्[8]। अन्यथा छिद्रद्वयमेवेति बहुवचनं न स्यात्। तस्मात्साम्न एवोपगानं न च्छिद्रमात्रस्येति सिद्धमिति ॥

तत्राप्येके[9] एकाक्षरेषु[9] नोपरमन्ति[10] ॥ ११ ॥

तत्रापि निधनेषु यान्येकाक्षराणि निधनानि। तेष्वेकशाखिनो नोपरमन्ति। कुर्वन्त्येवोपगानमित्यर्थः ॥ एवमुपगानविधिं समाप्योद्गातृन् प्रत्याह ॥

ते स्वां[11] स्वां भक्तिमनुच्छ्वसन्तो[12] ब्रूयुः ॥ १२ ॥

सर्वस्तोत्रेष्वनुवर्तत एव ॥

पदे वोच्छ्वसेयुः स्तोभे[13] वा[13] ॥ १३ ॥

यद्यनुच्छ्वासः कर्तुं[14] न शक्यते। तदा पदस्य मध्ये स्तोभस्य[15] मध्ये[15] वोच्छ्वसेयुः ॥

[1] संतमुप° D. [2] °न्तरेष्विति G. [3] °पतिनं C. [4] C om. [5] संस्वरे° C. [6] कृत्सनस्यैव (?) D; कृत्स्नस्यैव G. [7] C om. इति. [8] °ग्रहः G. [9] तत्राप्येकाक्षरेषु Tg; तत्राप्येकैकाक्षरेषु C. [10] This Sūtra is wanting in G, but part of it is embodied in the Comm., which in G runs as follows: तत्राप्येके निधनभक्तेरपि उपगानमित्येके। एकाक्षरेषु नोपद्रवन्ति साम्नामेकाक्षरेषु निधनेषूपरमेयुः ॥ एवमुपगाविधिं समाप्येरन्। उन्नातॄन् प्रत्याह। [11] स्वान् TD. [12] °नुच्छ्वसन्ते Tg; °नूच्छ्वसन्तो G. [13] स्तोभो G (om. वा). [14] कुर्वं C. [15] G om.

[a] 3, 4, 2. [b] 3, 4, 5.

नान्तरेण[1] पदे न स्तोभौ[2] ॥ १४ ॥

द्वयोः[3] पादयोर्मध्ये नोच्छ्वसेत् । न च विजातीययोः स्तोभयोरिति[3] । सर्वथा[4] पादान्ते[5] स्तोभान्ते वेत्यर्थः । तथा च सूत्रपरिशेषे[6] जैमिनिनोक्तं । स खलु पादमारभ्यारमेन्नान्तरेण[7] पादे व्यवान्यादिति[8] । तथा न पदान्तेष्वारमेत् । कृन्ततत्रमेतत्साम्नो[9] यत् पादान्ता[10] इत्युत्तरस्य पादस्यारभ्यावान्यात्[11] । यथा क्रमणादाक्रमणमाक्रम्यावानुत्तरायुक्तमिति[12] ॥

यत्र वोपपद्येत[13] न[14] तान्तः[15] कुर्यादिति ॥ १५ ॥

अथवा किमनेन निर्बन्धेन[16] यत्र यत्राशक्यत्वादुच्छ्वास आपतेत् । तत्रोच्छ्वसेयुरेव । न ह्यनुच्छ्वासेन तान्तः कर्म कर्तुं शक्नुयादिति ॥ एवं सर्वस्तोत्रसाधारणमुक्तं । अथ प्रकृतमेव बहिष्पवमानं प्रत्याह ॥

प्रस्तरं[17] प्रतिगृह्य[17] प्रस्तोता "ब्रह्मन् स्तोष्यामः प्रशास्तः" इत्युक्त्वोद्गात्रे प्रयच्छेत् ॥ १६ ॥

उपवेशानन्तरमध्वर्युणा[18] दत्तं प्रस्तरं[17] प्रतिगृह्योद्गात्रे प्रयच्छेदिति ॥

तेन दक्षिणां जङ्घामुपहत्य युञ्ज्यात् स्तोमम् "अग्नेस्तेजसा"[a] इति ॥ १७ ॥

तेन प्रस्तरेण स्वीयां दक्षिणां जङ्घामुपस्पृश्य स्तोमं युञ्ज्यात् । मन्त्रजप एव स्तोमयोग इति ॥

"अन्नं करिष्यामि"[b] इति जपेत् ॥ १८ ॥

स्पष्टमिति[19] ॥

[1] उत्तरेण G. [2] स्तेभयन् TG. [3] द्वयो—स्तोभयोरिति wanting in G. [4] G ins. न. [5] पदान्ते G. [6] सूत्रं ॥ परिवेषे G. [7] पादमभ्यारमेनांतरेण D, C. [8] व्यवन्या° C (in D emended to °वा°); व्यपान्या G. [9] कुतंत्र° C; ह्रतंत्र° D; ह्रतं तत्रैतत्सा° G. [10] पदान्ता G. [11] पदस्यामभ्या° D; पदस्यारभ्य त्वान्यान् C; °भ्यापन्यात् G. [12] °म्यावान्युत्तरा° D; अक्रमणादाक्रमणमाक्रम्यापान्यात् । तादृक् तदिति । G. [13] °द्येते TG. [14] R 2 om.; तेन TG. [15] नांतः R 1. [16] निर्वंधेन D; निब° G, C. [17] G om. [18] °शनानन्तरं G. [19] G om.

[a] PV. Br. 1, 3, 5. [b] PV. Br. 1, 3, 6.

तूष्णीं चात्वालमुदपात्रं चावेक्षेरन् ॥ १९ ॥

इदमपि स्पष्टमिति ॥

"सामासि[1] प्रति मा भाहि"[2] इत्यादित्यम्[2] ॥ २० ॥

अवेक्षेरन्नित्यनुषङ्ग इति ॥

तूष्णीं वा ॥ २१ ॥

गतमिति[3] ॥

सकृद्धिंकृत्य बहिष्पवमानेन स्तुवीरन् ॥ २२ ॥

सकृद्वचनं किमर्थमुच्यते। स्तोत्रान्तरेषु सर्वेषु बहुकृत्वो हिङ्कारदर्शनाद्बहिष्पवमानेऽपि तच्छङ्का स्यादिति तन्निवृत्त्यर्थं[4]। केचिदाहुः कल्पकारेण[5] कश्चिज्ज्योतिष्टोमप्रभेद[6] उक्तः। अथातो यज्ञायज्ञीयानुरूपो बृहदग्निष्टोमसामेति[7]। तत्र बहिष्पवमाने प्रथमस्तोत्रीये गायत्रं गीत्वा "दविद्युतत्या रुचा"[a] इत्यनुरूपे तृचे यज्ञायज्ञीयं गेयं। तदानीं सामभेदात् पृथग्घिङ्कारप्रसक्तौ[8] तन्निवृत्त्यर्थं सकृदिति वचनमिति। अत्र ब्राह्मणे गायत्रं सामाधिकृत्य[9] "द्विरवनर्द्धेद्धिङ्कुर्यात्तृतीयम्"[b] इति सामान्येनोक्तं॥ तद्विशिनष्टि[10] ॥

अहिङ्कृता[11] प्रथमा रेतस्या हिङ्कृताः पराः ॥ २३ ॥

बहिष्पवमानप्रथमावर्जमुत्तरास्वेव हिङ्कारः कार्यः। अहिङ्कृता[12] प्रथमा सा रेतस्येति चोच्यते संज्ञाकरणं व्यवहारार्थं "ऊर्ध्वं रेतस्याया ब्रह्मचरम्"[c] इत्यादौ। ननु च।

[1] मामासि TG. [2] माहीत्या° TG; भासीत्या Tg; Sūtras 20 and 21, with Comm., and Sūtra 22, are wanting in G. [3] गत इति D. [4] G om. beginning of this Comm. up to here. [5] चकारेण G. [6] कश्चिज्ज्यो° G. [7] °सामेदिति G. [8] प्रसक्त G. [9] सामाद्धिंकृत्य G; सामाधित्य C. [10] तं वि° G. [11] °ताः TD; °त्वा D. [12] °तैव G; °ते D.

[a] SV. II, 1, 1, 2, 1. [b] PV. Br. 7, 1, 2. [c] 21, 2, 12.

षड्विंशब्राह्मणे प्रथमायां हिङ्कारनिषेधादहिङ्कृता प्रथमेति न वक्तव्यं[1a]। नैवं। तत्र धूर्गानमधिकृत्य हिङ्कारनिषेधः[2]। धूर्गानाभावेऽपि सर्वत्र प्रथमायां हिङ्कारो न कार्य इत्येवमर्थं सूत्रमिति ॥

रथंतरवर्णोत्तमा[3]ऽविसृष्टहिङ्कारा[4] ॥ २४ ॥

सर्वत्र बहिष्पवमानस्योत्तमा[5] स्तोत्रीया रथंतरवर्णा कार्या। तथा अविसृष्टहिङ्कारा च कार्या। आकाररहितः[6] केवलो हिङ्कारो यस्याः। सा[7] अविसृष्टहिङ्कारा[7]। तत्स्वरूपं स्वयमेव गायत्रपटले[b] दर्शयिष्यति ॥ अथ[8] रथंतरवर्णेति कोऽर्थः। तं दर्शयति ॥

तस्या ऊर्ध्वं प्रस्तावाच्चत्वार्यक्षराण्यभिष्टोभेत्[9] ॥ २५ ॥

तस्या उत्तमायाः प्रस्तावादूर्ध्वमुद्गीथस्यादितश्चतुरक्षरं रथंतरवत्[10] भकारैरभिष्टोभेत्। तत्प्रकारं च स्वयमेव दर्शयिष्यति[c]। रथंतरस्येव वर्णचतुष्टयं यस्याः। सा रथंतरवर्णेति ॥

"अन्नमकरम्"[11d] इति[11] स्तुत्वा जपेत् ॥ २६ ॥

स्पष्टं ॥

नन्वत्र बहिष्पवमानस्य यच्च यावच्च[12] वक्तव्यं[13]। तत्सर्वं किमिति तत्सूत्रकारो[14] न ब्रूते। तदुच्यते। ब्राह्मणेनैव सर्वमुक्तं। तथा हि। "प्रजापतिरकामयत" इत्यारभ्य षष्ठप्रभृति चतुर्भिरध्यायैर्ज्योतिष्टोमस्य[15] स्तोत्राणि सामानि चोक्तानि[e]। तथा "त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि" इत्यहीनब्राह्मणोपक्रमे[16f] स्तोमक्लृप्तिरुक्ता। तथा। "उपास्मै गायता

[1] कर्तव्यं G. [2] G om. हिङ्कार. [3] °त्तमात्र TG. [4] Avagraha wanting in all MSS. [5] °त्तमाया G. [6] The preceding passage runs in G thus: तथाविसृष्टहिंकारा चाकाररहिता; C has अकाररहित; D corr. अ to आ. [7] साविसृ° G. [8] G om. [9] °र्यच्चरन्यभि Tg; °राण्यवि° TG; °स्तोभेत् D. [10] रयन्तरवर्णावत् G. [11] अन्नरेमिति TG. [12] यावत्तच्च G. [13] कर्तव्यं G. [14] G om. तत्. [15] चतुर्भिरनुवाकैः ज्यो° G. [16] पञ्चदशं दिति। अहीनब्राह्मणेनैव क्रमेण G.

[a] Cf. SV. Br. 2, 2. [b] Pat. 21. [c] Cf. 21, 2, 15 sqq. [d] PV. Br. 1, 3, 7. [e] PV. Br. 6–9. [f] PV. Br. 20, 1, 1.

नरः"[a] इत्यारभ्य बहिष्पवमानस्तोत्राणां[1] क्रमेण स्तोत्रीयाः समाम्नाताः क्रमलिङ्गप्रचित्रेन ब्राह्मणेन विनियुक्तास्त्वेति । न किंचिदक्तव्यं सूत्रकारस्यावशिष्यते ॥ प्रकृतमनुसरामः ॥

"श्येनोऽसि"[b] इति प्रस्तरे[2] यजमानं वाचयेत् ॥ २७ ॥

प्रस्तरे यजमानं स्पर्शयित्वा वाचयेदिति ॥

तं सर्वत्र स्तुत्वोपह्वयेरन्[3] ॥ २८ ॥

यजमानं[4] सर्वेषु स्तोत्रेषु स्तुत्यनन्तरमनुजानीरन् । "उद्गातार उपह्वयध्वम्" इति । यजमानेन प्रार्थिते "उपहूतः" इत्युपह्वः[0] कार्य इति ॥

"सं वर्चसा"[d] इतीक्षकान् सहकारिणश्च प्रेक्षमाणो जपेत् ॥ २९ ॥

सहकारिण उपगातॄन् प्रस्तोतृप्रभृतींस्त्वान्यांश्च[5] स्तोत्रमीक्षमाणान् पश्यन् जपेदिति ॥

"नमो गन्धर्वाय"[e] इत्यादित्यम् ॥ ३० ॥

प्रेक्षमाणो जपेदित्यनुषङ्ग इति ॥

देशेनैवान्तर्हितश्चेत् ॥ ३१ ॥

यदादित्यो मेघादिभिरन्तर्हितः[6] स्यात् । तदा तद्देशमेव प्रेक्ष्य जपेदिति ॥

एतत्सर्वं[7] कुर्यादुत्तरयोः पवमानयोः ॥ ३२ ॥

"मृदा शिथिरा" इति वेदिमाक्रमयेयुरित्यादिना[f] यदितः[8] पूर्वमुक्तादित्यप्रेक्षणान्तं[9] कर्म तत्सर्वमुत्तरयोरपि पवमानयोः कुर्यादित्युत्सर्गः[10] ॥ अथापवादमाह ॥

प्रवरास्तु निवर्तन्ते ॥ ३३ ॥

"अग्निः प्रस्तोताऽहं मानुषः"[g] इति प्रवरान्निवर्तेरन्निति ॥

[1] °त्राणि G. [2] °रो Tg; °रालब्धे TG. [3] Tg om. this Sūtra. [4] तं यज° G. [5] °प्रभृतिभिश्चा° G; प्रभृतिश्चा° C. [6] मेधा° C. [7] G om. सर्वं. [8] चदितः C. [9] पूर्वमादित्यः प्रे° G. [10] °र्गं C.

[a] PV. Br. 6, 9, 1 et seq. [b] PV. Br. 1, 3, 8. [c] Cf. 1, 3, 14. [d] PV. Br. 1, 3, 9. [e] PV. Br. 1, 3, 10. [f] Cf. 3, 1, 2. [g] Cf. 3, 3, 1.

चात्वालावेक्षणप्रभृति च प्राग्घिङ्कारात् ॥ ३४ ॥

चात्वालोदपात्रयोरादित्यस्य[1][a] चावेक्षणानि निवर्तेरन् । प्राग्घिङ्कारादिति बहिष्पवमानस्य हिङ्कारात् प्रागित्यर्थः ॥

प्रवेशनसंमार्जने[2] चान्तरेण तृतीयसवने ॥ ३५ ॥

हविर्धानप्रवेशनस्य[b] द्रोणकलशसंमार्जनस्य[c] चोभयोर्मध्यपतितं यत्कर्म ' तदपि तृतीयसवने निवर्तते । चकारात्[3] प्रवराद्यपीति ॥

कुम्भं तु तत्र संमृज्यात् ॥ ३६ ॥

तत्र तृतीयसवने संमार्जनवेलायां कुम्भमेव मन्त्रेण संमृज्यात् । न द्रोणकलशमिति ॥ कः पुनः कुम्भः ' तमाह ॥

उत्तरे[4] हविर्धाने यः पूर्वो द्रोणकलशावृता ॥ ३७ ॥

उत्तरे हविर्धाने द्वौ[5] कुम्भौ प्रवृत्तौ[6] । तयोर्यः पूर्वदेशे स्थितः ' तं कुम्भं संमृज्यात् । द्रोणकलशोक्तप्रकारेण[c] च संमृज्यादिति ॥

तं पूतभृदित्याचक्षते तं पूतभृदित्याचक्षते ॥ ३८ ॥

तं[7] कुम्भं पूतभृदित्याचक्षते[8] अध्वर्यवः । तेन नाम्ना कुम्भमवधार्य[9] संमृज्यादित्यर्थः । पवित्रवितानमपि तस्यैव मुखे[10] कार्यं । स्पष्टमुक्तं जैमिनिना । पूतभृतो मुखे पवित्रं वितनोतीति ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ १२ ॥

॥ तृतीयः पटलः ॥ ३ ॥

द्राह्यायणकृते सूत्रे यथामति यथागमं ।
तृतीयं पटलं व्याख्यं धन्वी काश्यपनन्दनः ॥

॥ इति धन्विभाष्ये प्रथमो ऽध्यायः समाप्तः ॥

[1] दित्यस्ये D. [2] प्रदक्षिणञ्च न संमार्जने TG. [3] ०रा G. [4] उत्तरेण C. [5] द्वादश G.
[6] प्रवृत्तौ C. [7] G om. [8] ०चक्षीते G. [9] ०धार्यं D. [10] तस्यैवमेव G.

[a] Cf. 3, 4, 19. 20. [b] 3, 1, 8. [c] 3, 2, 22.

स्तोमयोगे "अग्निर्युनक्तु"[1][a] इत्येतस्य[1] स्थाने "वायुर्युनक्तु" "सूर्यो युनक्तु"[b] इति नाना सवनयोः ॥ १ ॥

एतत्सर्वं[2] कुर्यादुत्तरयोः[2] पवमानयोरित्यतिदिष्टं[3]। तत्र स्तोमयोगमन्त्रे "अग्नेस्तेजसा"[4a] इत्यत्र[4] "अग्निर्युनक्तु" इत्यादिमन्त्रैकदेशस्य स्थाने "वायुर्युनक्तु" इति माध्यन्दिने पवमाने "सूर्यो युनक्तु" इत्यार्भवे पवमाने[5] स्यात्। उत्तरं सवनद्वयमधिकृत्य तयोः प्रत्यचाम्नानादिति[6] ॥

विहारं धानंजय्यः ॥ २ ॥

"अग्नेस्तेजसेन्द्रस्येन्द्रियेण सूर्यस्य वर्चसा"[7] इति षण्णां पदानां विहृत्य प्रयोगं धानंजय्य आह ॥ तदेव[8] दर्शयति[8] ॥

"अग्नेस्तेजसा बृहस्पतिस्त्वा" इति प्रातःसवने "इन्द्रस्येन्द्रियेण बृहस्पतिस्त्वा" इति माध्यन्दिने "सूर्यस्य" इति तृतीयसवने ॥ ३ ॥

प्रतिसवनं द्वे द्वे पदे विभजेरन्। "बृहस्पतिस्त्वा" इति प्रत्येकमनुषङ्ग इति ॥

सर्वैरेकैकं यथाम्नायं शाण्डिल्यः ॥ ४ ॥

"अग्नेस्तेजसा"[9] इत्यादिभिः सर्वैरपि षड्भिः पदैरविहृतैरेव प्रतिसवनं स्तोमयोगो यथाम्नायं कर्तव्यः। यथाम्नायमिति वचनं "बृहस्पतिस्त्वा" इत्यस्यानुषङ्गनिवृत्त्यर्थमिति ॥

साम्नि साम्नि हिङ्कुर्युः ॥ ५ ॥

उत्तरयोः पवमानयोः पृथक्पृथक्साम्नि हिङ्कुर्युः। न[10] बहिष्पवमानवदादौ सकृदेवेति[c] ॥

[1] नियुनक्तु एतस्य Tg. [2] G om. [3] पवमानयोरतिस्पष्टं G. [4] G om. [5] यमाने D. [6] °च्चममानत्वात् G. [7] G om. [8] C om. [9] °जस D. [10] G om.; नं D.

[a] PV. Br. 1, 3, 5; cf. Drāhy. 3, 4, 17. [b] PV. Br. 1, 5, 11. 14. [c] Cf. 3, 4, 22.

"वृषको ऽसि"[1] "स्वरो ऽसि"[a] इति यजमानवाचने ॥ ६ ॥

"श्येनो ऽसि"[b] इति यजमानवाचनस्थाने "वृषको[2] ऽसि" इति माध्यन्दिने सवने[3] "स्वरो ऽसि" इति तृतीयसवन इति[4] ॥

स्तुत्वा बहिष्पवमानेन प्रस्तरादुभयतः[5] परिच्छिद्य तृणं चात्वाले प्रविध्येत्[6] "यदि[6] स्तुतं[7] यदि वा ऽद्य[8] सुष्टुतमर्वाक् स्तुतं यदि वा[9] ऽतिष्टुतं[9] यत्तयोरन्येन दिवमारुहेमेममन्येन[10] जयेम लोकम्" इति ॥ ७ ॥

प्रस्तरात्तृणमादाय तस्य मूलमग्रं[11] च[12] च्छित्त्वा मध्यमभागं चात्वाले निरस्येत् "यदि स्तुतम्" इति[13] मन्त्रेणेति ॥

तत्रैवोदपात्रं निनयेत् ।
"समुद्रं वः प्रहिणोमि । स्वां[14] योनिमपिगच्छत[15] ॥
अरिष्टास्तन्वा[16] भूयास्म । मा परासेचि[17] नो[17] धनम्"[18] ॥ इति ॥ ८ ॥

स्पष्टमिति ॥

बहिर्वेद्युदञ्चो ऽयुञ्जि[19] पदान्युत्क्रामेयुः प्राग्दशभ्यः ॥ ९ ॥

उत्थाय बहिर्वेद्युदङ्मुखा[20] अयुग्मानि पदानि प्राग्दशभ्यः क्रामेयुः । त्रीणि पञ्च सप्त नव वा । न ततः परमिति ॥

अभिदक्षिणमावृत्याव्रज्याग्नीध्रीयं[21] बहिष्पवमानर्चो[22] ऽधीयीरन्[23] ॥ १० ॥

प्रदक्षिणमावृत्याग्नीध्रीयमग्निं गत्वा तस्य पश्चादुपविश्य बहिष्पवमानर्चो ऽधीयीरन् । जपेयुरिति ॥

[1] सीति TG. [2] वृचको D. [3] G om. [4] C om. the Comm. on this Sūtra.
[5] D adds in the margin चतुरङ्गुलं (as in Lāṭy.). [6] प्रसिच्छेयदि G; प्रास्येयदि Tg. [7] स्तुत्य G.
[8] G om.; ग TG. [9] चातिष्टुतं TG; वा त्रिष्टुतं G. [10] °रुहेममन्येन C; °रुहेमेममन्येम TD; °रुहेमेमन्ये TG. [11] मूलाग्रं G. [12] G om. [13] G om. इति. [14] स्वां TG.
[15] °मभिगच्छ° TG; TD °मपिभिगच्छ°, but deletes पि. [16] °रिष्टस्तन्वा C; °रिष्टास्तन्वा Tg; °रिष्टास्तनुतेन्वा G. [17] °सेचनो TG. [18] द° TG. [19] युञ्जी TG; युञ्ज्य Tg; युजि C.
[20] °ख G. [21] TG and R 2 om. आवृत्य; R 1 om. आव्रज्य. [22] °मस्यर्चो TG. [23] धियेरन् G, TG.

[a] PV. Br. 1, 5, 12. 15. [b] Cf. 3, 4, 27.

अनुव्याहार्षीन्मामिति[1] यमतिशङ्केत[2] तस्मा[3] आग्नीध्रीय[3] आहुतिवज्रं[4] प्रहरेत् "यज्ञ शं च त[5] उप च ते नमश्च ते सत्यो ऽसि सत्यसंस्कृतस्तस्य[6] ते य ऊनं[7] यो[8] ऽकृतं[8] यो ऽतिरिक्तमदर्शंस्तस्य[9] प्राणेनाप्यायस्व[10] स्वाहा" इति ॥ ११ ॥

उद्गातुरूनातिरिक्तकरणदोषोद्भावनेनाक्षेपोक्तिरनुव्याहारः[11]। य ऊनं यो ऽतिरिक्तमदर्शदिति[12] मन्त्रलिङ्गात्। आक्षिप्तवानयं मामिति यं मन्यते। तमुद्दिश्य[13] आग्नीध्रीये आहुतिवज्रं[14] प्रहरेत्। वज्रं प्रहरन्निवाहुतिं[15] जुहुयादित्यर्थः ॥

न व्यभिचरेदिति धानंजय्यः ॥ १२ ॥

अभिचार एव व्यभिचारः। "य एनमनुव्याहरति[16] स आर्तिमार्च्छति"[a] इति श्रुतेः। स्वयमेव नश्यतः किमभिचारेणेत्यभिप्रायः ॥

अहीनबहिष्पवमानैः[17] सदसि[18] स्तुवीरन् प्रथमादह्नो ऽन्यत्र ॥ १३ ॥

द्विरात्रप्रभृत्यहीनेष्विति[19]। प्रथमादह्नो ऽन्यत्र सदसि बहिष्पवमानस्तुतिः कार्या। न चात्वालदेश इति।

आद्यन्तयोस्तु सत्त्रेषु ॥ १४ ॥

आद्यन्तयोरिति पञ्चम्यर्थे सप्तमी। अन्यत्रेत्यनुवर्तते। सत्त्रेष्वाद्यन्ताभ्यामहोभ्यामन्यत्र[20] सदस्येव बहिष्पवमानमिति। कुतः। एवं व्याख्यायते। गवामयने विषुवति बहिष्पवमानस्य परमतेन[21] चात्वालदेशे[22] स्तवनविधानात्[23] स्वमतेन[24] सदसि स्तवनमिति गम्यते। यथोक्तं "बहिरस्येके[25] बहिष्पवमानेन[26] स्तुवते"[b] इति। तेन पञ्चम्यर्थे सप्तमी[27] निर्णय[27] इति[27] ॥

1 °हार्षिम्मामिति TG; °हार्षीन्मोमिति G. 2 यमितिश° Tg, G; D corr. °यमिति° to °यमति°. 3 तस्मादाम्नी° Tg, G. 4 °वर्जं G. 5 न C. 6 सत्यंस्कृत° Tg. 7 औनं TD, D, Tg. 8 Tg om. 9 °दर्शतस्य D, TD, Tg; °दर्शस्तस्य G; °दिशन्तस्य TG. 10 प्राणानाप्याय Tg. 11 C om. करण. 12 तिरिक्तमिति G; तिरिक्तमदर्शमिति D. 13 °द्दिश्य C. 14 °वर्जं G. 15 G om. आहुतिं. 16 °रति D; G om. व्या. 17 अहिबहि° Tg. 18 सदस Tg. 19 G reads अहर्गणेषु. 20 C om. अहोभ्यां. 21 °मतत्वे G. 22 G om. देशे. 23 °विधात् C. 24 स्वयमेष ते G. 25 °स्येके G. 26 G om. न. 27 सप्तमीति निर्णयः G.

a PV. Br. 6, 4, 10. b 8, 2, 28.

प्राग्धिष्ण्यविहरणान्निष्क्रम्य तृणप्रासनप्रभृति समापयेयुः ॥ १५ ॥

यदा[1] सदसि बहिष्पवमानः[2] । तदा स्तुत्यनन्तरं[3] धिष्ण्याग्निविहरणात्प्रागेव सदसो निष्क्रम्य चात्वाले तृणप्रासनप्रभृति[a] त्र्यृगजपान्तं कुर्युरिति ॥

बैदत्रिरात्रे[4] सत्त्रन्यायं[5] गौतमः ॥ १६ ॥

"त्रयस्त्रिवृतो ऽतिरात्राः"[6b] इति बैदत्रिरात्रस्य[7] क्लृप्तिः । तस्योभयतो ऽतिरात्रत्वात् सत्त्राणां च तथाविधत्वात्सत्त्रन्यायः स्यात् । तेनाद्यन्तयोस्तु सत्त्रेष्वित्येतत्प्रवर्तत इति ॥

अहीनन्यायं[8] धानंजय्यः ॥ १७ ॥

स्वत एवाहीनधर्मत्वादहीनधर्म[9] एवेति ॥

मन्द्रं[10] प्रातःसवने स्तुवीरन् ॥ १८ ॥

मन्द्रमध्यमक्रुष्टानीति[11] त्रीणि वाचः स्थानानि तेषां प्रथमेन प्रातःसव स्तुतिः कार्येति ॥

उत्तरोत्तर्युत्तरयोः[12] सवनयोः[13] ॥ १९ ॥

उत्तरयोः सवनयोरुत्तरोत्तरस्वरयुक्तं स्तवनं कार्यमिति ॥

समेन[14] वोभयोः ॥ २० ॥

अथवा समानेनैव[15] स्वरेणोत्तरयोः सवनयोः स्तुतिः[16] । मध्यमेन क्रुष्टेन वेति ॥

एतस्यां वेलायां प्राश्नीयुः ॥ २१ ॥

रागप्राप्तप्रातरशनस्यायं[17] कालनियमः । तेनातिरात्रे सायमशनेन कालनियमः । केचित्त्वा[18] तृतीयसवनसमाप्तेरितः परं न भोक्तव्यमित्याहुरिति ॥

[1] G om. [2] °मानं G, C. [3] सत्यन° G. [4] वैदं त्रि° TD; वैतत्रि° TG.
[5] सत्रभ्याभ्याय Tg. [6] त्रि° G. [7] वै° C, D. [8] अग्नीनन्वायं G. [9] एवाहीनत्वा° G.
[10] मन्त्रं G. [11] मन्त्र° G. [12] उत्तरोत्तरयोः G. [13] R 2 om. (as in Lāṭy.). [14] समानेन Tg.
[15] समेनैव G; समानेवनैव D. [16] G om. [17] रागतप्रा° C; रागतः प्राप्तस्य प्रातरशना सायं G.
[18] केचित्वा D; केचित्तु G.

[a] Cf. 4, 1, 7. [b] PV. Br. 21, 5, 1.

अनुसवनं तु सत्त्रेषु ॥ २२ ॥

सत्त्रेष्वनुसवनं भोजनमिति ॥ कस्मिन्काल इति चेदत[1] आह[1] ॥

सवनमुखीयान्भक्षयित्वा सत्त्रेषु नाराशंसेषु ॥ २३ ॥

तेषु नाराशंसेषु सत्त्रेषु[2] भोजनमिति ॥

प्रथमः खण्डः ॥ १ ॥

वपायां[3] हुतायां धिष्ण्यानुपतिष्ठेरन्[4] ॥ १ ॥

सवनीयस्य पशोर्वपायां हुतायां[5] धिष्ण्योपस्थानं कार्यमिति ॥

चात्वाले तु मार्जनं पूर्वं सत्त्रेषु ।
"इदमापः प्रवहत[6] । अवद्यं[6] च मलं च[7] यत् ॥
यच्चाभिदुद्रोहानृतं[8] । यच्च शेपे अभीरुणम् ॥
आपो मा तस्मादेनसः । दुरितात्पान्तु[9] विश्वतः"[a] ॥
"निर्मा मुञ्चामि शपथात् । निर्मा वरुणादुत ॥
निर्मा यमस्य पड्वीशात् । सर्वस्माद्देवकिल्बिषात्"[b] ॥
"सुमित्रा[10] न[11] आप[11] ओषधयः सन्तु दुर्मित्रास्तस्मै[12] सन्तु यो ऽस्मान्द्वेष्टि[13] यं[13] च वयं द्विष्मः"[c] ॥ इति ॥ २ ॥

सत्त्रेषु तु प्रागुपस्थानान्मार्जनं कृत्वा धिष्ण्योपस्थानं । जैमिनिस्तु सर्वेष्वपि क्रतुषु मा-

[1] चेत् G. [2] C om. [3] उपायां TG. [4] °नुपरिष्ठेरन् D; घृष्ण्या° Tg. [5] G om.
[6] प्रवहेता° TG. [7] G om. [8] TG, Tg om. यद्; यद्यद्यच्चापिदु° G. [9] दुरिता Tg.
[10] सुमित्रिया D, R 1; सुमित्र्या TG. [11] नाप Tg. [12] दुर्मित्रिया° R 1; दुर्मित्र्या° TG.
[13] °न्द्वेष्यं Tg.

[a] Cf. VS. 6, 17. AV. 7, 89, 3.
[b] Cf. RV. 10, 97, 16. VS. 12, 90. AV. 6, 96, 2; 7, 112, 2.
[c] Cf. VS. 6, 22.

र्जनमाह । अत्र धिष्ण्योपस्थाने "अध्वनामध्वपते"[a] इति मन्त्रः प्रथमोऽधीतः । सूत्रकारस्तु तं[1] मन्त्रमत्राविनियुज्योत्तरत्र[1] रौरिक्युपस्थाने[2] शाखान्तरीये विनियुक्तः[b] । तत्र निदानं मृग्यमन्ये त्वाहुः । प्रत्यचाम्नानबलात्ताण्डिशाखिनामस्माकमप्यादित्योपस्थानम्[3] "अध्वनामध्वपते" इत्यनेन कार्यमिति । जैमिनिरप्यादित्योपस्थानं प्रथममनेन मन्त्रेणाचोक्तवानिति[c] ॥

"सम्राडसि"[d] इत्याहवनीयमुपस्थायोदञ्चो गत्वास्तावचात्वालशामित्रानुदङ्मुखाः "तुथः"[4] "नभः" "असंमृष्टः"[5][e] इति[5] ॥ ३ ॥

उत्तरवेदेः[6] पश्चात् स्थित्वा "सम्राडसि" इत्यौत्तरवेदिकमाहवनीयमुपस्थायोदञ्चो गत्वा बहिष्पवमानदेशे[7] तिष्ठन्त उदङ्मुखास्तस्मादास्तावदेशे[8] चात्वालं शामित्रं च "तुथो" "नभो" "ऽसंमृष्टः"[9] इति त्रिभिर्मन्त्रैर्यथाक्रममुपतिष्ठेरन्निति ॥

"विभुरसि"[10][f] इत्याग्नीध्रीयमुपतिष्ठेरन् ॥ ४ ॥

गतमिति ॥

तमुत्तरेण संचरः सर्वत्र ॥ ५ ॥

आग्नीध्रीयमग्निमुत्तरेणैव[11] सदा[12] संचरः[13] कार्यः । प्राक् च प्रत्यक् च गच्छद्भिरिति ॥

दक्षिणेनोत्तरयोः सवनयोर्यदा हविर्धानमाहवनीयं[14] च पृष्ठहोमाय[15] ॥ ६ ॥

उत्तरयोः सवनयोर्यस्मिन्काले हविर्धानं[16] प्रविशति ग्रावयोजनादि कार्यार्थं[g] । यदा

[1] तन्मन्त्रं मन्त्राविनि° G. [2] रौह्° C; the reading in G is from this word somewhat different: रौक्युपस्थानमध्वनामध्वपत नम ऋग्यर्थैत्याहुः । प्रत्यचाम्नानवत्त्रिण्डिशाको यामस्माकमप्यादित्यो य स्थानमध्वनामध्वप इति एतेन न कार्यमिति । जै°, etc. [3] प्रत्यचम्नातव° C; °वलात्ता शा° D. [4] °स्तुतो D, C, R 1, Tg. [5] °मृष्टो सीति Tg. [6] °वेद्याः G. [7] °मानस्तुतिदेशे G. [8] °खा तमास्तावदेशं G. [9] सम्मुष्ट D. [10] विभू° C. [11] °यमुत्तरेणाग्निमेव G. [12] सर्वदा G. [13] संचारः C. [14] °धानञ्चाहव° TG. [15] °होमायां Tg. [16] °ने C.

[a] PV. Br. 1, 4, 1. [b] 4, 3, 1. [c] Cf. Sāyaṇa in his introduction to PV. Br. 1, 4, 1. [d] PV. Br. 1, 4, 2. [e] PV. Br. 1, 4, 3. [f] PV. Br. 1, 4, 4. [g] Cf. 3, 2, 1 et seq.

च पृष्ठहोमार्थमाहवनीयं प्रस्तोता गच्छति[a] । तदा दक्षिणेनाग्नीध्रीयं संचरः कार्यः । ततोऽन्यत्र सर्वत्रोत्तरेणैवेति । पृष्ठहोमायेति विशेषणं प्रायश्चित्तहोमेषु[1] निवृत्त्यर्थमिति ॥

पूर्वस्यां सदसो द्वारि प्रत्यङ्मुखास्तिष्ठन्तो "वह्निः"[2b] इति होतुर्धिष्ण्यम्[3] ॥ ७ ॥

उपतिष्ठेरन्निति शेषः ॥

"श्वात्रः"[c] इति मैत्रावरुणस्य ॥ ८ ॥

मैत्रावरुणस्य धिष्ण्यं "श्वात्रः" इत्युपतिष्ठेरन् । सदसो द्वार्येव तिष्ठन्त इति ॥

"तुथः" "उशिक्" "अङ्गारिः" "अवस्युः"[d] इति ब्राह्मणाच्छंसिप्रभृतीनामुदञ्चः[4] ॥ ९ ॥

"तुथः" इत्यादिमन्त्रचतुष्टयस्य[5] प्रतीकोपादानं ब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकानां चतुर्णां धिष्ण्यान्[6] चतुर्भिर्मन्त्रैस्तत्रैव[7] तिष्ठन्त उदङ्मुखा उपतिष्ठेरन्निति ॥

"शुन्ध्युः"[8e] इति[8] मार्जालीयं तत्रैव तिष्ठन्तः[9] ॥ १० ॥

तत्रैव सदसो द्वारि तिष्ठन्तो मार्जालीयं दक्षिणामुखा उपतिष्ठेरन् सामर्थ्यादिति[9] ॥

"ऋतधामा"[f] इत्यौदुम्बरीम्[10] ॥ ११ ॥

सदसो द्वार्येव तिष्ठन्तः प्रत्यङ्मुखा औदुम्बरीमुपतिष्ठेरन्निति[10] ॥

"समुद्रः"[g] इति ब्रह्मणः सदनम् ॥ १२ ॥

द्वार्येव तिष्ठन्तः । केचित्तु ब्रह्मणः सदनोपस्थानं साग्निचित्ये[11] क्रतौ नान्यत्रेत्याहुः ।

[1] प्रय॰ C; ॰होमे G. [2] वह्निरसि TG. [3] ॰र्धिष्ण्णीयं TD, R2; ॰र्धिष्णियं Tg. [4] ॰दञ्च पृष्ठहोमाय पूर्वस्य TG. [5] C om. स्य. [6] G om.; धिष्ण्यं C. [7] चत्रिभि॰ G. [8] शुन्ध्युरसि TG; ॰रसीति TD. [9] तिष्ठद् TG; this Sūtra and the Comm. are wanting in G. [10] G om. this Sūtra and the Comm. [11] साचित्ये G.

[a] Cf. 6, 1, 1. [b] PV. Br. 1, 4, 5. [c] PV. Br. 1, 4, 6. [d] PV. Br. 1, 4, 7. [e] PV. Br. 1, 4, 8. [f] PV. Br. 1, 4, 9. [g] PV. Br. 1, 4, 10.

तदयुक्तं सूत्रे[1] विशेषाकथनात्[2]। अनिष्टकचितस्यापि[3] ब्रह्मसदनस्यौदुम्बरीपत्नीशालादिवद्धिष्ण्यत्वोपपत्तेश्चेति[4] ॥

उत्तरेण सदो[5] गत्वा ऽन्तर्वेदि प्रत्यङ्मुखास्तिष्ठन्तो[6] "अहिः"[a] इति प्राजहितम्[7] ॥ १३ ॥

ब्रह्मसदनोपस्थानानन्तरमुत्तरेण[8] सदो गत्वा सदसः पश्चादन्तर्वेदि प्रत्यङ्मुखास्तिष्ठन्तः "अहिः"[9] इति[9] प्राजहितं[10] पुराणं गार्हपत्यमुपतिष्ठेरन्निति ॥

"अजः"[b] इति गार्हपत्यम् ॥ १४ ॥

यस्मादौत्तरवेदिकमग्निं प्रणयति[11]। स गार्हपत्य इति[12] ॥

"सगराः"[c] इति दक्षिणाग्नेरायतनम् ॥ १५ ॥

स्पष्टमिति[12] ॥

"कव्यः"[d] इति दक्षिणं वेद्यन्तम् ॥ १६ ॥

दक्षिणमहावेदिपार्श्वे दक्षिणामुखा उपतिष्ठेरन्निति[13] ॥

तत्रैव तिष्ठन्तः सर्वान् समन्वीक्षमाणाः[11] "पात[15] मा"[e] इति ॥ १७ ॥

उपस्थितान् सर्वानेव धिष्ण्यान्पुनः समन्वीक्षमाणाः[14] "पात मा" इति संहत्योपतिष्ठेरन्निति ॥

एकैकमुपस्थायैतद्ब्रूयुरिति शाण्डिल्यः ॥ १८ ॥

तं तं[16] धिष्ण्यमुपस्थाय तदानीमेव[17] तं[17] तं[17] समन्वीक्षमाणाः[14] "पात मा" इति मन्त्रं ब्रूयुः। न सर्वोपस्थानान्त इति शाण्डिल्यः ॥ ननु[18] च[18] प्रत्येकं "पात मा" इत्युपस्थाने बहुवचनविरोधः स्यात्। अत आह ॥

[1] सूत्र G. [2] विशेषक° C; ऽविशेषा° D. [3] अमिष्ट° G. [4] °वत् धिष्णियचो° G; च धिष्ण्य° C; °धिष्ण्येत्वो° D. [5] सदसो D. [6] °स्वात्ति° Tg; G om. प्रत्यङ्मुखाः. [7] प्रजहितं TD, R; प्राग्विहितं G. [8] G inserts उत्तरेण. [9] अभिरिति D. [10] प्राजिहितं G. [11] प्रणयंति C. [12] G om. [13] G om. this Comm. [14] समीक्षमाणाः G. [15] पाद G. [16] G om. [17] तदातमेव G. [18] G om.

[a] PV. Br. 1, 4, 11. [b] PV. Br. 1, 4, 12. [c] PV. Br. 1, 4, 13. [d] PV. Br. 1, 4, 14. [e] PV. Br. 1, 4, 15.

बहुशब्दानेकवत्कुर्वन्तः[1] ॥ १९ ॥

बहुवचनान्येकवत्कुर्वन्त इत्यर्थः[2]। तद्यथा। "सम्राडसि कृशानुः" इत्युक्त्वा[3] "पाहि[4] माऽग्ने[5] रौद्रेणानीकेन पिपृहि[6] मा[6] नमस्ते[6] अस्तु मा मा हिंसीः" इति ॥

द्वितीयः खण्डः ॥ २ ॥

॥ अथ शाखान्तरीयमुपस्थानं दर्शयति ॥

रौरिकीणि[7] चेत्कुर्युरादित्यं[8] प्रथममुपतिष्ठेरन् "अध्वनाम्"[a] इति ॥ १ ॥

रौरिकिणो[9] नाम केचिच्छाखिनः। तैरधीतानि यजूंषि रौरिकीणि[10]। तानि यदि कुर्युः। तथा प्रथमम् "अध्वनाम्" इत्यादित्योपस्थानमिति[11] ॥

आहवनीयमुपस्थाय तमेव "अपिजो[12]ऽसि जायमानः" इति "अपिजो[13]ऽसि नवजातः"[14] इति वा यमग्निमनुप्रहरन्ति तमभिप्रेत्य ॥ २ ॥

"सम्राडसि"[b] इत्याहवनीयमुपस्थाय तमेव पुनः "अपिजो[15]ऽसि जायमानः" इति द्वयोर्मन्त्रयोरन्यतरेणोपतिष्ठेरन्। ननु च। किमर्थं पुनरुपस्थानमिति। अत्रेदमुच्यते। यमग्निमनुप्रहरन्ति। तमभिप्रेत्येति। यमाग्निं[16] मथित्वाहवनीये प्रहरन्त्यध्वर्यवः। तम-

[1] G om. this Sūtra. [2] G om. the beginning of the Comm. up to this word inclusive. [3] G om. [4] पात G. [5] मयो G. [6] पिप्रीतहि मन्म मोवो G. [7] रौरु° R; °किणि TD; °किणी G; °कीणी D (thus corr. from °किणी). [8] °रदित्यं Tg. [9] रौरु° C. [10] रौरु° C; रौरीकिणी G. [11] इत्युप° G. [12] °विजो C, G. [13] °विजो G. [14] न्यजात G; जायमान Tg. [15] °विज्ञो G. [16] G om. the greater part of the following passage and reads only यमग्निं मत्वा प्रहृतस्यामिरु°, etc.

[a] PV. Br. 1, 4, 1. [b] Cf. 4, 2, 3.

भिप्रेत्य पुनरुपस्थानं । यद्यप्ययमग्निः पृथङ्नोपलभ्यते । तथाऽपि तद्बुद्ध्योपस्थानं कार्यं । तदुक्तमभिप्रेत्येति । तथाश्वलायनोऽपि "यूपादित्याहवनीयनिर्मथ्यान्"[1][a] इति[1] मथित्वा प्रहृतस्याग्नेरुपस्थानमुक्तवानिति ॥

यदा[2] चात्वालमथोत्करं "तुमुलोऽस्याक्रन्द[3] कृत्वा" इति ॥ ३ ॥

यदा[4] चात्वालमुपस्थितवन्तः[5] । तदा "तुमुलोऽसि" इत्युत्करमुपतिष्ठेरन्निति[6] ॥

यदा[7] शामित्रमथ यत्रोवध्यं निखनन्ति[8] "ऊवध्यगोहो[8]ऽसि[9] पार्थिवः"[b] इति ॥ ४ ॥

यत्राध्वर्यव ऊवध्यं[10] निखनन्ति । तं प्रदेशम् "ऊवध्यगोहः"[11] इत्युपतिष्ठेरन्निति[12] । ऊवध्यं पशुशकृत् । तस्य गूहनार्थस्य[13] भूः ऊवध्यगोहः ॥

यदाग्नीध्रीयमथ यत्राच्छावाक[14] आसीनो होतर्युपहवमिच्छति[15] "उपहव्योऽसि नमस्यः"[16] इति[17] "उपहव्यो[17]ऽसि[18] तनूपाः"[19] इति वा ॥ ५ ॥

आग्नीध्रीयोपस्थानानन्तरमच्छावाकस्योपहवस्थानमुपस्थेयं । किं पुनस्तत् । यत्रासीनोऽच्छावाको होतुरनुज्ञामाकाङ्क्षते "उपोऽस्मान् ब्राह्मणान्[20] ब्राह्मणा ह्वयध्वम्" इति ॥

यदा[21] ब्रह्मणः सदनमथ सदस्यस्य "सदस्यो[22]ऽसि[23] मलिम्लुचः" इति ॥ ६ ॥

ब्रह्मसदनोपस्थानं कृत्वा सदस्यस्य[24] सदनमुपस्थेयं "सदस्योऽसि" इति मन्त्रेणेति ॥

[1] °निर्मथ्याग्निं C. [2] यथा G, Tg. [3] °क्रन्दं TG. [4] यथा G. [5] °वंतं D, G. [6] उत्क° G (om. इति). [7] पदा Tg. [8] °वध्यगोहो G; निखनन्त्युः ऊव° Tg; °गाहो R1. [9] सीति D. [10] भद्धं G. [11] °वध्यगोह G. [12] °तिष्ठेरन् G (om. the remainder). [13] गृहनर्थस्य C. [14] यत्वाच्छा° TG; याचाका TD. [15] होतुर्यु° C, TG, Tg. [16] नमस्यत D; नस्यत Tg; TG om. [17] TG om. [18] सी D; TG om. [19] तनुपा TD; तनुनपा D; तनूनपा Tg, G. [20] G om. [21] यथा G. [22] सदसो TG. [23] ति C; पि R1. [24] सदस्य G.

[a] Āśv. Śr. 5, 3, 15. [b] Cf. Ait. Br. 2, 6, 16.

यदा दक्षिणं वेद्यन्तमथ "प्राजापत्यमसि" इति पत्नीशालाम् "ऐन्द्रमसि" इति सदो "वैष्णवमसि" इति हविर्धानम् "ऐन्द्राग्नमसि"[1] इत्याग्नीध्रीयं "वैश्वदेवमसि" इति वा ॥ ७ ॥

यदा दक्षिणं वेद्यन्तमुपस्थितवन्तः । तदा "प्राजापत्यमसि" इत्यादिमन्त्रचतुष्टयेन[2] पत्नीशालादिचतुष्टयमुपस्थेयमिति[3] ॥

अथ तथैव[4] समस्तेन ॥ ८ ॥

सर्वान्ते यथापूर्वमुक्तमुपस्थानं[5] । तथा[6] समस्तेन मन्त्रेणोपतिष्ठेरन्निति । समस्तमेव मन्त्रं शाखान्तरीयं पठति ॥

"सर्वे स्थः सोम्यासः[7] सर्वे सोमं पिबत सर्वे सोमस्य पीतिमानशध्वे[8] पात मा" इति समानं[9] परम्[9] ॥ ९ ॥

"पात माऽग्नयो[10] रौद्रेणानीकेन"[a] इति मन्त्रशेषोऽस्माकं रौरिकीणां[11] च[11] समान इत्यर्थः ॥ एवं शाखान्तरीयमुपस्थानमुक्तं । अथोपस्थानानन्तरं कृत्यमाह ॥

"ऋतस्य द्वारौ स्थः"[b] इत्यपरौ द्वारबाहू सदसः संमृज्य "मा मा संताप्तम्"[b] इति सदः[12] प्रविशेयुः[13] ॥ १० ॥

स्पष्टमिति ॥

दक्षिणेनौदुम्बरीं गत्वा तस्या उत्तरत उपविशेयुः "नमः सखिभ्यः"[c] इति ॥ ११ ॥

इदमपि स्पष्टमिति ॥

[1] ऐन्द्रमसि Tg. [2] °ष्टये G. [3] G om. आदि. [4] Tg om., and ins. सर्वं. [5] G om. उक्तमुपस्थानं. [6] G om. [7] सोम्याः D, Tg. [8] °मानः शध्वे TD; पितिमानशब्दे TG. [9] समानमपरं Tg; समानपरं TG. [10] मेयो G. [11] रौरीकिणां च G; रौरुकीणाश्च C. [12] G, Tg, and R om. सदः. [13] प्रोहोयुः Tg.

[a] Cf. 4, 2, 17. [b] PV. Br. 1, 5, 1. [c] PV. Br. 1, 5, 2.

पूर्वेण प्रस्तोतारं प्रतिहर्ता गच्छेत् ॥ १२ ॥

यदा[1] दक्षिणेनौदुम्बरीं गत्वोपवेशनार्थमुदङ्मुखा[2] गच्छन्ति[2] । तदोद्गातुः सव्यं पार्श्वं प्रतिहर्ता परित्यज्य प्रस्तोतुर्दक्षिणपार्श्वस्थ उदङ्मुखो गच्छेदित्यर्थः ॥

एतस्यां वेलायां समुपह्वयेरन् सर्वे सत्त्रेषु ॥ १३ ॥

उपह्वानमनुज्ञानं[3] । उपवेशनानन्तरं[4] सत्त्रेषु यजमाना अन्योऽन्यमनुजानीरन् । "उपहूतः" इत्येवमनुज्ञाप्रदानं[5] । अनुज्ञानस्य प्रार्थनापूर्वत्वात् "यजमाना उपह्वयध्वम्" इति प्रार्थनमर्थसिद्धमिति ॥

मिथोऽन्यत्र ॥ १४ ॥

सत्त्रेभ्यो[6]ऽन्यत्र उद्गातॄणां मिथ एवोपह्वानं कार्यं । नान्येषामध्वर्य्वादीनां । तत्रोद्गाता प्रथममितरावनुजानीयात्[7] । ततः प्रस्तोतेरौ । ततः प्रतिहर्तेतराविति ॥

सर्वे यजमानम् ॥ १५ ॥

सर्वे त्रयोऽप्युद्गातारो यजमानमुपह्वयेरन् । "उद्गातार उपह्वयध्वम्" इति यजमानेन प्रार्थिताः "सर्वे उपहूताः" इत्यनुज्ञां[8] कुर्युरित्यर्थः[8] ॥

द्वारबाहुसंमार्जनप्रभृत्येतत्सर्वं कुर्युर्यदा[9] धिष्ण्यानुपतिष्ठेरन् ॥ १६ ॥

यदा[10] यदा धिष्ण्योपस्थानमुत्तरयोः सवनयोः क्रियते । तदा[10] तदा सर्वत्र तदनन्तरं द्वारबाहुसंमार्जनप्रभृत्युपह्वानान्तं[11] कुर्युरिति ॥

तृतीयः खण्डः ॥ ३ ॥

[1] यथा G. [2] °खो गच्छति D; G corr. खो to खा; °खा गच्छति C. [3] उपस्थानम° G. [4] उपवेशानांतरं D. [5] G om. एवं. [6] The MSS. read अस°. [7] प्रथममनुजानीय G. [8] °ज्ञा कु° D; °ज्ञां कार्या इ° G. [9] कुर्यात् । यद G. [10] G om. [11] °प्रभृत्युपह्वानं G.

अथोद्गातुरार्त्विज्यसमासे[1] प्रकारं वक्तुमाह ॥

याजमानब्रह्मत्वे[2] चेदुद्गाता[3] कुर्यात् ॥ १ ॥

रोगादिना ब्रह्मयजमानयोः स्वकार्याशक्तौ । तत्कर्म कर्तुमुद्गाता[4] यदीच्छेदित्यर्थः[5] । अत एवानुवादाज्ज्ञायते । ऋत्विजामेकस्य कर्माशक्ताावितरस्तत्कर्म[6] कुर्यादिति ॥ अथ प्रकारमाह ॥

आग्नीध्रीयमुपस्थाय[7] पूर्वेण परिक्रामेत् ॥ २ ॥

आग्नीध्रीयमुपस्थाय तं पूर्वेण परिक्रामेत् । प्रदक्षिणमित्यर्थः ॥

सादसानुपस्थाय तत एवेक्षमाणः पात्नीशालान् ॥ ३ ॥

सदसि भवान्[8] धिष्ण्यान् होत्रीयप्रभृतीन्[9] ब्रह्मसदनपर्यन्तानुपस्थाय[10] तत एव सदसो द्वार्येव तिष्ठन्नीक्षमाणः पात्नीशालान् प्राग्वंशगतान्धिष्ण्यानुपतिष्ठेतेति[11] । पात्नीशालपदेन[12] दक्षिणवेद्यन्तोऽपि गृह्यते ॥

इतरथेतरौ ॥ ४ ॥

इतरौ[13] प्रस्तोता प्रतिहर्ता च । इतरथा[14] पूर्वोक्तेनान्तर्वेदि प्रत्यङ्मुखास्तिष्ठन्त इत्यनेन[15] प्रकारेण पात्नीशालानुपतिष्ठेयातामिति ॥

"ऋतस्य द्वारौ स्थः"[a] इति पूर्वौ[16] द्वारबाहू सदसः संमृज्य दक्षिणस्य पुरस्तादुदङ्मुख[17] उपविशेदिति शाण्डिल्यः ॥ ५ ॥

दक्षिणस्य द्वारबाहोः पुरस्तात्सदसो बहिरुदङ्मुख उपविशेदिति ॥

[1] ॰से C. [2] यज॰ TG. [3] TD om.; चोद्गा॰ Tg. [4] कर्तुं उ॰ D. [5] यदिच्छे॰ D.
[6] ॰तरत् कर्म G. [7] आग्नीध्यमु॰ Tg. [8] भवा D. [9] G om. [10] G has only उपस्थाय.
[11] ॰गत॰ G; ॰गता॰ D; G om. इति, as also the rest of the Comm. [12] पत्नी॰ C.
[13] उत्तरौ D. [14] उत्तरथा G. [15] इत्येतेन G (?). [16] पूर्व G. [17] ॰स्तादुतं मुख Tg.

[a] PV. Br. 1, 5, 1.

तस्यैव[1] पश्चात्प्रत्यङ्मुख इति धानंजय्यः ॥ ६ ॥

तस्यैव दक्षिणस्य[2] द्वारबाहोः पश्चादन्तः सदसि प्रत्यङ्मुख उपविशेदिति धानंजय्यः ॥ तदिदमुपवेशनं याजमानमुक्तमिति ॥

उक्ते प्रवेशनोपवेशने[a] ॥ ७ ॥

प्रवेशनोपवेशनार्थौ मन्त्रौ पूर्वमेवोक्तावित्यर्थः[3]। "मा मा संताप्तम्" इति प्रवेशनमन्त्रः[4]। "नमः सखिभ्यः" इत्युपवेशनमन्त्रः[5]। उभयोरपि धानंजय्यमते प्रयोगः। शाण्डिल्यमते तु बहिः सदस[6] उपवेशनात् प्रवेशनमन्त्रो निवर्तत इति ॥

ऋत्विक्पथेन गत्वा समस्तोपस्थानप्रभृति[7][b] समानम् ॥ ८ ॥

एवं यजमानोपवेशनं[8] कृत्वा तत उत्थायर्त्विक्पथेन पश्चाद्गत्वा "पात माऽग्नयः" इति समस्तधिष्ण्योपस्थानप्रभृति समानं कर्म ब्रह्मण उद्गातुश्च तन्त्रेणानुष्ठेयमित्यर्थः[9]। सदस उत्तरतो[10] यो मार्गः । स ऋत्विक्पथः । तत्र[11] समस्तोपस्थानप्रभृतीति वचनात् पूर्वत्र याजमाने[12] समस्तोपस्थानं[13] नास्तीति गम्यत इति ॥

दक्षिणार्धे तु सदसः पूर्वमुपवेशनम्[14] ॥ ९ ॥

अपरया द्वारा सदः[15] प्रविश्य[16] औद्गात्रोपवेशनात्पूर्वं[16] सदसो दक्षिणार्ध उपवेशनं कार्यमिति ॥ कथमित्याह ॥

प्रस्तोतुः प्रत्युपवेशनं ब्रह्मोपवेशनेन[17] ॥ १० ॥

प्रस्तोतुराभिमुख्येनोपवेशनं ब्रह्मोपवेशनेन कार्यं। ब्रह्मोपवेशनप्रकारेण[18] कार्यमिति[18] ॥ तदेव स प्रकारमाह ॥

"निरस्तः परावसुः"[c] इति दक्षिणा तृणं निरस्येत्[19] ॥ ११ ॥

[1] °वं Tg. [2] °ण G. [3] °र्थं G. [4] यजमानप्रवेशमंत्रः D. [5] °न्त्रं G. [6] सदन G. [7] समस्तोप° TG. [8] या° G. [9] तंत्रेणुष्ठे° D. [10] उत्तरो C; उत्तर D. [11] अत्र G. [12] य° G. [13] G om. नं. [14] पूर्वोपवेशनं Tg. [15] सदसः D, C. [16] °शनते उद्गा° C; °शेतोद्गा° D. [17] °शने TG; °शनं Tg. [18] G om. [19] °स्यात् Tg; °स्योत् TG.

[a] 4, 3, 10. 11. [b] 4, 3, 8. [c] Cf. S'P. Br. 1, 5, 1, 23. S'āṅkh. S'r. S. 1, 6, 6.

"आवसोः सदने सीदामि"[a] इत्युपविशेत् ॥ १२ ॥

स्पष्टे इति ॥

"नमः सखिभ्यः पूर्वसद्भ्यो[1] नमोऽपरसद्भ्यो भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं मानुष ओम्" इत्युक्त्वौदुम्बरीं[2] गत्वोपविशेत्[2 b] ॥ १३ ॥

"नमः सखिभ्यः" इति मन्त्रजपो ब्रह्मोपवेशनाङ्गं । "बृहस्पतिर्ब्रह्माहं मानुषः" इति मन्त्रलिङ्गात् । तेन ब्रह्मत्वविधानप्रकारेण[3] यद्वच्यति ' उक्तं[4] सदस्युपवेशन[5] इति[5] । तत्र[6] मन्त्रजपान्तमुपवेशनमिति[7] सिद्धं भवति । अथ मन्त्रजपानन्तरमौदुम्बरीं गत्वा समन्त्रकमौद्गात्रमुपवेशनं[8] कार्यमिति ॥

अनूपविशेयातामितरौ[9] ॥ १४ ॥

इतरौ[10] प्रस्तोतृप्रतिहर्तारावौद्गात्रोपवेशनमेवानुपविशेयातां[10] । न ब्रह्मोपवेशनकाल इत्यर्थः ॥

एतेनानुपूर्वेण[11] सर्वं यथासनं चिकीर्षेत् ॥ १५ ॥

योऽयं सदस्युपवेशने क्रमः । अनेनैव क्रमेण सर्वं याजमानं ब्रह्मत्वमौद्गात्रं च कर्तुमिच्छेत् । यथासनमिति[12] । स्वे स्वे स्थान इत्यर्थः ॥

ग्लायेच्चेदध्यौदुम्बर्येव[13] ॥ १६ ॥

यद्युपवेशनत्रयं स्वे स्वे स्थाने गत्वा कर्तुमशक्तः । तदौदुम्बर्यामेवोपवेशनत्रयमपि तत्तन्मन्त्रतः[14] कार्यमिति । अध्यौदुम्बरीति सप्तम्यर्थेऽव्ययीभाव इति ॥

सदस्य एवमेव धिष्ण्यानुपतिष्ठन्[15] ब्रह्माणमनुप्रविशेत् ॥ १७ ॥

सदस्यो नाम षोडशर्त्विग्भ्योऽन्यः कर्मणामुपद्रष्टेत्यापस्तम्बः[16c] । सोऽप्युक्तेन प्रकारेण धिष्ण्यानुपतिष्ठन् ब्रह्माणमनु[17] सदः[18] प्रविशेदिति ॥

[1] पूर्वसखिभ्यो TG. [2] इत्येतेनोपविशेत् G. [3] °विधानेन प्र° G. [4] उत्तरं G. [5] °शनमिति C, D. [6] तत् G. [7] G om. [8] मन्त्रक्रमोत्गा° G. [9] अनुपवेशे° G. [10] G om. इतरौ प्रस्तोतृप्रतिहर्तारौ. [11] °र्व्येण TD, C, G. [12] स्वासनमिति G. [13] गाये° TG; °च्चेद्ध्यौ° G; °र्ये वा Tg and C (in C so corrected from °म्बर एवेति). [14] तन्मन्त्रतः G. [15] °तिष्ठेरन् Tg (and, orig., TD). [16] कर्मणात्वद्रष्टे° G. [17] ब्राह्मण° G. [18] G om.

[a] Cf. S'P. Br. 1, 5, 1, 24. S'āṅkh. S'r. 1, 6, 9. [b] Cf. 4, 3, 11. [c] Āpast. S'r. S. 10, 1, 10. 11.

ब्राह्मणाच्छंसिनं वा ॥ १८ ॥

स्पष्टमिति ॥

तेनास्य समुपहवः[1] स्यात् ॥ १९ ॥

तेन ब्रह्मणा ब्राह्मणाच्छंसिना वा सदस्यस्य[2] समुपहवो[3]ऽन्योऽन्यमनुज्ञानं स्यात् । "ब्रह्मन्नुपह्वयस्व सदस्योपह्वयस्व" इत्युक्ते "उपहूतः" इति प्रतिवचनमिति ॥

भक्षश्च समानः ॥ २० ॥

सोमभक्षोऽपि तयोरन्यतरेण[4] सदस्यस्य समानः । एकस्मिंश्चमसे सहभक्षणं कार्यमित्यर्थः ॥

बीभत्सेयातां[5] चेन्नाना चमसौ स्याताम् ॥ २१ ॥

यदि ब्रह्मसदस्यावेकस्मिंश्चमसे सहभक्षणाद्बीभत्सेयातां[6] तदा[7] पृथक्चमसौ स्यातां । अत एवानुवादाज्ज्ञायते[8] । आस्यसंसृष्टेन[9] चमसेन सोमभक्षणं कार्यमिति । अन्यथा बीभत्साभावात् । न हि चमसाद्धारां स्रावयित्वा भक्षणे बीभत्सागन्धोऽप्यस्तीति ॥

सर्पत्सु न शून्यं सदः कुर्यात् ॥ २२ ॥

संस्थिते सवने यदर्त्विजो निःसर्पन्ति तदा तेषु निःसर्पत्सु शून्यं सदो न कुर्यात् । निःसर्पणकाले स्वयं सदस्येव तिष्ठेत् । अशून्यत्वायेत्यर्थः ॥

तस्य दधिभक्षान्तं कर्म ॥ २३ ॥

तस्य दधिद्रप्सभक्षणान्तं सुत्ये[10]ऽहनि कर्मेत्यर्थः ॥

स निवर्तेत[11] सत्त्रेषु[12] ॥ २४ ॥

सत्त्रेषु[13] सदस्यो न[13] वरणीय इत्यर्थः ॥

[1] °हवि Tg. [2] सदस्य D, G. [3] °व्यो G. [4] °करेण C. [5] भीभ° Tg; विभ° TG. [6] चमसभक्षणा° G. [7] तथा G. [8] °वादज्ज्ञा° C. [9] अस्य सं° D, G. [10] सत्ये G. [11] °ता Tg. [12] Tg om. [13] G om.

विसंस्थिते सवने पूर्वया द्वारा ऽन्तरेण होतुर्धिष्ण्यं मैत्रावरुणस्य च[1] संचरः[2] ॥ २५ ॥

विसंस्थिते असमाप्ते सवने सवनमध्य इति यावत् होतुर्मैत्रावरुणस्य च[3] धिष्ण्ययोर्यदन्तरालं[4]। तेन[5] सर्वेषां संचर[6] इति ॥

तद्यथेतं[7] तद्यथेतम्[7] ॥ २६ ॥

तत्तदानीं सवनमध्ये यथेतमेव पुनः प्रवशः कार्य इति ॥

चतुर्थः खण्डः ॥ ४ ॥

चतुर्थः पटलः ॥ ४ ॥

इति च्छन्दोगसूत्रस्य दीपेऽस्मिन्धन्विना[8] कृते[8]।
चतुर्थः पटलो वृत्तौ[9] वासुदेवः प्रसीदतु ॥

[1] Tg om. [2] G om. [3] The passage विसंस्थिते—च is wanting in G. [4] धिष्ण्यया यदंतरालं C; धिष्ण्यंयोर्य्यदंतराले D; धिष्ण्यंययोर्य्यद° G. [5] गतेन D. [6] संचार D. [7] °थे° TD, TG. [8] °न्विनिर्मिते G. [9] °त्तो C.

चमसं प्रतिगृह्य प्रस्तोता दक्षिण ऊरावाधाय दक्षिणेन पाणिनाऽपिधायासीत[1] ॥ १ ॥

सवनमुखीयं चमसमध्वर्युणाहृतमुद्गात्रृणां[2] चमसं प्रस्तोता प्रतिगृह्य स्वस्य दक्षिण[3] ऊरावाधाय होतुर्भक्षणकालं[4] प्रतीक्षमाण[5] आसीत ॥

उपहूयमानायामिडायामनूपधारयेदनुपघ्नन्[6] ॥ २ ॥

इडोपह्वानकाले स्वं[7] चमसमिडापात्रवदास्यसंमितं धारयेत् । चमसस्थं सोमरसमनुपघ्नन्नङ्गुलीभिरस्पृशन्नित्यर्थः[8] ॥

वषट्कर्तुरनु भक्षं[9] सर्वत्र भक्षयेयुः ॥ ३ ॥

वषट्कर्त्रा चमसेषु भक्षितेषु पश्चादुद्गातारः स्वीयं चमसं भक्षयेयुः । एवमेव सर्वत्र न केवलमत्रैव सवनमुखीयप्रचारे[10] ॥

मिथ उपहूयोद्गाता[11] प्रथमः ॥ ४ ॥

उपह्वयेत्यन्तर्भावितण्यर्थो[12]ऽयं । उपह्वानमनुज्ञानं । मिथोऽनुज्ञाप्य त्रयोऽपि[13] भक्षयेयुः । तत्रोद्गाता प्रथमो भक्षयेत्[14] । मिथ उपह्वयेति वचनादुद्गातृचमसं वषट्कर्ता न भक्षयेदिति गम्यते । यदि स्यात् । तस्याप्यनुज्ञापनमवश्यं कार्यं । नानुपह्वतेन[15] सोमः पातव्य[16] इति श्रुतेः ॥

दक्षिणमनु बाहुं[17] दण्डं कृत्वा "श्येनः"[18][a] इत्यवेक्ष्य "इन्दो"[19][b] इति[19] द्विरल्पं भक्षयेद्यथासवनं छन्दांस्यादिशन् ॥ ५ ॥

आत्मनो दक्षिणं बाहुमनु चमसस्य दण्डं कृत्वा तिर्यक्[20] चमसं धारयित्वा "श्येनो

[1] पर्य्यायाº TG. [2] चमसाध्वर्युº D. [3] ºणा G. [4] ºक्षणाकालं D, C. [5] ºणाः D, C. [6] ºमनुपº D, TD; Tg om. अनुपघ्नन्. [7] स्वयं C, D. [8] G om. अनुपघ्नन्. [9] भक्षन् TG. [10] ºप्रकारे G; ºप्रचारेति C. [11] ºह्वतोº Tg. [12] ºत्यंतर्भातण्यº D; ºत्यन्तर्भाविण्यº G; ºत्युपह्वानमर्थो C. [13] G om. [14] भक्षेत् C. [15] ननूपह्वº G. [16] पात G; पात वा C. [17] वाहूं TD; बाहु TG. [18] TG ins. ना. [19] ºन्द्व इति Tg, G; ºन्द्वीति TG. [20] तिर्य्यंचं D.

[a] PV. Br. 1, 5, 3. [b] PV. Br. 1, 5, 4.

नृचक्षाः"[1] इत्यवेक्ष्य "इन्दविन्द्रपीतस्य" इति द्विर्भक्षयेत्। अल्पमल्पं[2] सकृन्मन्त्रेण सकृत्तूष्णीं[3]। यथासवनं छन्दांस्यादिशन्नित्ययमर्थः। "त्रिष्टुप्छन्दसः"[4a] इति माध्यन्दिने सवने[4]। "जगच्छन्दसः"[5b] इति तृतीयसवने। तथैवोत्तरत्र[6] मन्त्रपाठादिति॥

"ऊर्ध्वः"[c] इति मुख्यान्प्राणानभिमृशेत[7]॥ ६॥

भक्षणानन्तरं "ऊर्ध्वः[8] सप्त ऋषीन्" इति सप्त मुख्यान्प्राणांश्चक्षुषी नासिके श्रोत्रे मुखं[9] चाभिमृशेत[10]॥

"सोम रारंधि"[d] इति हृदयम्॥ ७॥

"सोम गीर्भिः"[e] इति नाभिम्॥ ८॥

उभयत्राभिमृशेतेत्यनुषङ्गः॥

एवमितरौ कुर्यातां प्रतिहर्ता पश्चात्॥ ९॥

एवमेवेतरौ[11] प्रस्तोतृप्रतिहर्तारावपि भक्षणं कुर्यातां। तयोः प्रतिहर्ता पश्चाद्भक्षयेत्॥

तं स आप्याययेदभिमृश्य "आप्यायस्व"[f] इत्येतया[12] गायत्र्या॥ १०॥

तं चमसं प्रतिहर्ताप्याययेत्। द्रोणकलशात्सोमरसमादाय तेन वर्धनमाप्यायनं[13] मन्त्रेणाभिमर्शनमात्रं वा। इयमप्युक्तं कात्यायनेन। भक्षयित्वा मन्त्रेणालभेरन्। सोमं[14] वासिञ्चेयुरिति[14g]। गायत्र्येति वचनमुत्तरत्र[15] "गायत्र्यैवानुसवनं"[h] इति सूत्रे "आप्यायस्व समेतु ते" इति मन्त्रप्रतिपत्त्यर्थः[16]॥

सर्वे वा॥ ११॥

सर्वे[17] वा[17] त्रयोऽप्युद्गातारश्चमसमाप्याययेयुः॥

तां तृतीयसवने द्विर्ब्रूयुः॥ १२॥

तां "आप्यायस्व" इत्येतामृचं तृतीयसवने द्विरुक्त्वाप्याययेत्। जगतीसंपत्त्यर्थं। जागतं हि तृतीयसवनमिति॥

[1] ०क्ष D; नुचक्षा G. [2] अल्पं once only G. [3] G om. सकृत्. [4] G om. [5] जगतीछ० C; ऋजतिछन्द G. [6] G om. च. [7] ०त् TD. [8] ०र्ध्वं G. [9] मुख्यं G. [10] ०त् D. [11] G om. एव. [12] ०प्यायस्वाहिति एतया Tg. [13] वर्द्धितमा० G. [14] सोममासि० D. [15] ०मुत्तरा G. [16] ०र्थे G. [17] G om.

[a] PV. Br. 1, 5, 13. [b] PV. Br. 1, 5, 16. [c] PV. Br. 1, 5, 5. [d] PV. Br. 1, 5, 6. [e] PV. Br. 1, 5, 7. [f] PV. Br. 1, 5, 8. [g] Kāty. S'r. S. 9, 12, 5. 6. [h] 5, 1, 14.

"सं ते पयांसि"[a] इति माध्यन्दिने ॥ १३ ॥

"सं ते पयांसि" इति त्रिष्टुभाप्याययेत्[1]। त्रैष्टुभं हि माध्यन्दिनमिति ॥

गायत्र्यैवानुसवनमाप्याययेदिति शाण्डिल्यः ॥ १४ ॥

"आप्यायस्व" इत्येतस्या एव पाठात्। एवं सर्वेषु चमसगणप्रचारेषु[2] सामान्यं न भक्षणमुक्तं ॥ अथ विशेषमाह[3] ॥

द्वितीयाः सवनेषु नाराशंसाः ॥ १५ ॥

प्रतिसवनं बह्वश्चमसभक्षाः[4]। तत्र[5] द्वितीयाश्चमसा[6] द्वितीयाश्चमसगणा[7] नाराशंसदेवत्याः ॥

पूर्वयोश्च तृतीयौ ॥ १६ ॥

चकारोऽभिन्नक्रमः। पूर्वयोः सवनयोस्तृतीयौ[8] चमसगणौ[9] नाराशंसाविति ॥ ततः किमित्याह ॥

तेषामनवेक्ष्य भक्षणम् ॥ १७ ॥

तेषां नाराशंसानां "श्येनो नृचक्षाः"[10] इत्यनेनानवेक्ष्य[10] भक्षणं कार्यमिति ॥ अथ[11] तेषां भक्षणमन्त्रमाह ॥

"अवमैः" इति प्रातःसवने[12] "ऊर्वैः" इति माध्यन्दिने "काव्यैः"[b] इति तृतीयसवने ॥ १८ ॥

"अवमैस्ते"[13] इति[13] प्रातःसवने[13] नाराशंसभक्षणं[14]। न पुनः "इन्दविन्द्रपीतस्य" इत्यनेन। "ऊर्वैः" "काव्यैः" इत्युत्तरयोः सवनयोरिति ॥

"पितृभिः"[b] इति सर्वत्रानुसंहरेत् ॥ १९ ॥

"अवमैः" इत्यादि त्रिष्वपि मन्त्रेषु "पितृभिर्भक्षितस्य" इत्येतत्[15] प्रत्येकमनुषज्जेदिति ॥

[1] °प्यायेत् C. [2] चमसभक्षणप्रकारेषु G. [3] विशेषणमाह G. [4] °भक्षणाः D, G. [5] ततः G. [6] °श्चमसभक्षणाः G; C om. [7] G om., and repeats ततः द्वितीयाश्चमसभक्षणाः; द्वितीयचमसगणा D. [8] C om. [9] चमसभक्षणौ G. [10] नृचक्षावित्यनवेक्ष्य G. [11] अतः G. [12] Rest of Sūtra wanting in G. [13] G om. [14] °सं भक्षणं G. [15] D om. इति.

[a] SV. I, 7 (Ār. S.), 3, 2. [b] PV. Br. 1, 5, 9.

प्रत्यभिमर्शने याथाकामी[1] ॥ २० ॥

नाराशंसे भक्षिते प्राणादिप्रत्यभिमर्शने याथाकाम्यं स्यादिति ॥

प्रथमद्वितीयौ पूर्वयोः सवनयोराप्याययेत् ॥ २१ ॥

पूर्वयोः सवनयोः प्रथमद्वितीयौ चमसगणौ[2] भक्षणानन्तरमाप्याययेत् । नेतरानिति[3] ॥

प्रथमं तृतीयसवने ॥ २२ ॥

आप्याययेदित्यनुषङ्गः[4] । अत्रोद्गातृभिरात्मीयचमसस्यैवाप्यायनं । इतरैरपि यथास्वमाप्यायनं कार्यमिति । अत्र[5] सर्वत्र सुब्रह्मण्यस्य न भक्षणं । अनुक्तत्वात्तस्य स्तुतावनन्वयाच्च । जैमिनिकल्पे तु तस्यापि भक्षणमुक्तं[a] । अयमेव कल्पकारयोर्मतभेदात्प्रभाकरगुरोर्मीमांसावार्त्तिककारस्य च विप्रतिपत्तेर्मूलमिति[5] ॥ एवं भक्षणकथां समाप्यावृत्तिस्तोत्रेषु वक्तव्यमाह ॥

आवृत्तिषु[6] तृणे प्रतिगृह्य प्रस्तोता प्रयच्छेद्यथाप्रस्तरम्[7] ॥ २३ ॥

येषु स्तोत्रीया[8] पुनः पुनरावर्तते । तान्यावर्तीनि । पवमानव्यतिरिक्तानि स्तोत्राणि तेष्वध्वर्युणाहृतौ[9] स्तोत्रोपकरणदर्भौ प्रतिगृह्य प्रस्तोता प्रयच्छेत्[10] । कस्मै[10] कथं[10] प्रयच्छेदित्यत्रोक्तं । यथाप्रस्तरमिति । "ब्रह्मन्[10] स्तोष्यामः[10] प्रशास्तः"[10b] इति[10] मन्त्रमुक्त्वा प्रस्तरवदुद्गात्रे प्रयच्छेदित्यर्थः ॥

अनाह्रियमाणयोर्न[11] मन्त्रं[11] जह्यात् ॥ २४ ॥

यदा[12] पृष्ठ्ये[13] षडहे[13] दर्भयोः[14] स्थाने अरण्यादेराहरणं[15c] । तदाऽपि "ब्रह्मन्[16] स्तोष्यामः[16] प्रशास्तः"[16] इति[16] मन्त्रं ब्रूयादित्यर्थः ॥

[1] य° C, D, G, TG. [2] °सभक्षणौ G. [3] °नीति C, D. [4] G om. these words, and repeats part of the preceding Comm. [5] G om. the passage अत्र—मूलमिति. [6] आवर्त्तिषु Tg, R (and, orig., TD). [7] °प्रस्तरं TG. [8] °या: D, G. [9] ते ध्वर्यु° G. [10] G om. [11] अनाहीर्य° TD; तमाह्रिय° Tg; अनाद्रियमाणयोः तन्मन्त्रं G. [12] यथा G. [13] G om. [14] °या G. [15] अरण्योरा° G. [16] G om.

[a] Mīm. S. 3, 5, 23-26. [b] Cf. 3, 4, 16. [c] Cf. 9, 1, 5.

तथैव[1] जङ्घामुपहत्य युञ्ज्यात्स्तोमं “दीक्षायै” “तपसः” “मनसः” “वाचः”[2][a] इति ॥ २५ ॥

यथा प्रस्तरेण तथैव तृणाभ्यां दक्षिणां[3] जङ्घामुपहत्य स्तोममुद्गाता युञ्ज्यात् । चतुर्भिर्मन्त्रैः “दीक्षायै” “तपसः” “मनसः” “वाचः” इति पदचतुष्टयं मन्त्रचतुष्टयस्य प्रतीकोपादानं । प्रतिमन्त्रं “प्रजापतिस्त्वा” इत्यनुषङ्गं वक्ष्यति[b] । तत्र “दीक्षायै वर्णेन प्रजापतिस्त्वा युनक्तु प्रजाभ्यो ऽपानाय” इति प्रथमो मन्त्रः । “तपसो रूपेण प्रजापतिस्त्वा” इति द्वितीयः । “मनसो महिम्ना[4] प्रजापतिस्त्वा” इति तृतीयः । “वाचो विभूत्या प्रजापतिस्त्वा” इति चतुर्थः । एतैश्चतुर्भिरपि मन्त्रैरेकस्मिन्नेव स्तोत्रे स्तोमयोगः[5] कार्य[5] इति[5] ॥ पक्षान्तरमाह ॥

नाना[6] धानंजय्यो यत्रानन्तराणि[7] चत्वारि ॥ २६ ॥

यत्रानन्तर्येण चत्वार्यावृत्तिस्तोत्राणि पूर्णानि लभ्यन्ते । तत्र चतुर्षु स्तोत्रेषु[8] चतुरो मन्त्रान् क्रमेण प्रथमं[9] विभजेत् । एवं[10] पुनः[11] पुनरेकस्मिन्नेव स्तोत्रे मन्त्रचतुष्टयमिति । तद्यथा[12] । सर्वेषु पृष्ठ्येषूक्थ्येषु रात्रिपर्यायेषु वेति[12] । अनन्तराणीति वचनं विजातीयपवमानव्यवहितान्यावृत्तिस्तोत्राणि[13] गृहीत्वा मन्त्रविभागो न कार्य इत्येवमर्थः । तेन प्रातःसवने सोमातिरेकनिमित्तमावृत्तिस्तोत्रमारभ्य माध्यन्दिनपवमानादुत्तराणि च त्रीणि गृहीत्वा तेषु मन्त्रविभागो न कार्य इति ॥

अन्तः[14] सर्वेषां “प्रजापतिस्त्वा”[c] इति[15] ॥ २७ ॥

सर्वेषां चतुर्णामपि मन्त्राणां “प्रजापतिस्त्वा युनक्तु” इत्ययमन्तो[16] भवेत् । अन्ततो ऽनुषङ्ग इत्यर्थः । इदं च पक्षद्वयसाधारणं । अथ यत्र चत्वार्यावृत्तिस्तोत्राणि[17] पूर्णानि न लभ्यन्ते[18] । यथा ऽग्निष्टोमसंस्थे षोडशिसंस्थे च । तत्र द्व्यावृत्तिस्तोत्राणां चतुष्कशो[19] विभजने[20] सत्येकैकमवशिष्यते । तथा वाजपेये द्वौ[21] ॥ तत्र कथं स्तोमयोगः । अत आह ॥

[1] तद्वैव G; rest of Sūtra is wanting in G, it being confused with the Comm. [2] वाचक TG.
[3] The beginning of the Comm., up to this word, is wanting in G. [4] मभिम्ना D.
[5] °गं कार्यमिति G. [6] TG ins. सवनयोर्विहारं. [7] यन्त्रणानन्तराणि G. [8] G om.
[9] G ins. पृथग्. [10] C has न for एवं. [11] G ins. पुनः; so, originally, also D.
[12] G om. तद्यथा—वेति; चेति C. [13] The rest of this Comm. is left out in G. [14] अन्ततः Tg.
[15] G om. this Sūtra. [16] °यमंत्रो C. [17] G om. the beg. of the Comm. up to °स्तोत्राणि, incl.
[18] लभन्ते G. [19] चतुष्कष्कंशो C. [20] °ते C. [21] द्वे C.

[a] PV. Br. 1, 5, 10; cf. Drāhy. 3, 4, 17. [b] Below, Sūtra 27. [c] PV. Br. 1, 5, 10.

प्रथमेनाल्पीयःसु ॥ २८ ॥

अल्पीयःसु चतुर्भ्यो[1] न्यूनेषु स्तोत्रेषु प्रथमेनैव[2] मन्त्रेण स्तोमं युञ्ज्यादिति ॥

तत्प्रभृतीनि[3] रात्रौ[4] ॥ २९ ॥

रात्रिपर्यायेषु प्रत्येकं चतुःस्तोत्रेषु प्रथमप्रभृतींश्चतुरो मन्त्रान् क्रमेण विभजेत् । ननु च । "यत्रानन्तराणि चत्वारि" इत्यनेनैव सिद्धमेतत् । सत्यं । अषोडशिके[5] ऽतिरात्रे सिद्धं । यदा पुनः षोडशिमानतिरात्रः[6] । तदा षोडशिनमुपक्रम्य चतुर्षु चतुर्षु मन्त्रविभागः स्यात् । तदा रात्र्युपक्रमे द्वितीयो मन्त्रः स्यात् । तन्निवृत्त्यर्थमुक्तं प्रथमप्रभृतीनेव मन्त्रान् रात्रौ विभजेदिति । तदा ऽपि षोडशिनः प्रथमेनैवानुमन्त्रणं । "प्रथमेनाल्पीयःसु" इति वचनादिति ॥

तथा ऽतिरिक्तस्तोत्रेषु ॥ ३० ॥

अप्तोर्यामे[7] अतिरिक्तस्तोत्रेष्वपि चतुर्षु तथैव प्रथमप्रभृतीनेव मन्त्रान्विभजेत् । तत्रापि संधिस्तोत्रमारभ्य विभागे प्राप्ते तन्निवृत्त्यर्थं वचनमिति ॥ एवं धानंजय्यमतं समाप्य मतान्तरमाह ॥

सर्वैरेकैकं यथाम्नायं शाण्डिल्यः ॥ ३१ ॥

"दीक्षायै वर्णेन" इति चतुर्भिरपि मन्त्रैरेकैकं स्तोत्रं युञ्ज्यात् । "प्रजापतिस्त्वा युनक्तु प्रजाभ्यो ऽपानाय" इत्येतद्यथाम्नायमेव सकृदन्ते प्रयोज्यं । न प्रतिमन्त्रमनुषङ्ग इति विशेषः ॥

आवृत्तिन्यायः[8] संधौ ॥ ३२ ॥

आवृत्तिस्तोत्राणां यो धर्मः । स संधिस्तोत्रे ऽपि स्यात् । तस्या नावृत्तित्वादेवमुक्तं । तेन स्तोमयोगः । कुशास्तरणमित्यादयो धर्माः स्युः । तथा[9] "प्रथमेनाल्पीयःसु" इति प्रवर्तत इति[9] ॥

उपवसथ्ये ऽहनि न[10] समामनेरन् ॥ ३३ ॥

सुत्यायाः पूर्वदिवसे न स्वाध्यायमधीयीरन् । सुत्ये ऽहनि वाचो[11] ग्लानिर्माभूदित्येवमर्थमिति[12] निदानकार इति ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ५ ॥

[1] चतुभ्यो G; चतुर्थो C. [2] प्रथनैव G. [3] एतत्प्र° Tg. [4] रौत्री TG. [5] G om. अ. [6] °त्रं G. [7] आप्तो° D. [8] आवृत्त° G; °न्यायां TG. [9] G om. तथा—इति. [10] TD om. [11] G om. [12] ग्यानि° C.

प्रस्तोता तु[1] कुशाः कारयेद्यज्ञीयस्य वृक्षस्य ॥ १ ॥

श्वोपवसथ्येऽहनीत्यनुवर्तते। कुशा नाम स्तोत्रीयागणनार्थाः[2] काष्ठाः[3]। ता यज्ञार्हस्य[4] वृक्षस्याश्वत्थादेः संबन्धिनीः[5] कारयेदिति ॥

खदिरस्य दीर्घसत्त्रेष्वेके ॥ २ ॥

स्पष्टमिति ॥ क्रियाप्रकारमाह[6] ॥

प्रादेशमात्रीः[7] कुशपृष्ठास्त्वक्तः[8] समा मज्जतोऽङ्गुष्ठपर्वपृथुमात्रीः प्रज्ञाताग्राः ॥ ३ ॥

'कुशपृष्ठास्त्वक्त' इति त्वक्प्रदेशे कुशवदुन्नतपृष्ठाः स्युः। समा मज्जतः काष्ठान्तर्गतो रसो मज्जा तदवस्थानदेशे समाः स्युः। काष्ठं[9] भित्त्वा तदन्तःप्रदेशं[10] समं तक्षयेदित्युक्तं[11] भवति। प्रज्ञाताग्रा इति ' यदेव वृक्षे स्थितस्याग्रस्याग्रं[12] तदेवेदानीमपि प्रज्ञातं[13] कार्यमिति ॥

कारयित्वा[14] गन्धवतीभिरोषधीभिरनुलिप्य सर्पिषा सत्त्रेष्वेके कुशाविधानेन वसनेन[15] परिवेष्ट्य[16] क्षौमशाणकार्पासानां केनचिदुपर्यौदुम्बर्या[17] वासयेत् ॥ ४ ॥

एवं[18] कारयित्वा हरिद्रचन्दनादिभिरोषधीभिरनुलिप्य[19] क्षौमशाणकार्पासानामन्यतमेन कुशास्तरणेन वाससा परिवेष्ट्य सदस्यौदुम्बर्या उपरि[20] वासयेत्। कुशा विधीयन्ते स्तीर्यन्ते[21] यस्मिन् ' तत्कुशाविधानं[22]। सत्त्रेषु सर्पिषाऽनुलेपनमेक आहुरिति ॥

[1] TD, D, Tg om. [2] °र्थः C. [3] °ष्ठाः C. [4] यज्ञारहस्य C. [5] D corr. to संबधीनि from शंवधिनि. [6] °प्रकरण° G. [7] °त्रः TG. [8] °पृष्ठात्व° Tg. [9] °ष्ठं C; °ष्ठा G. [10] °शे C. [11] °क्षयेत्युक्तं G. [12] वस्थितस्य काष्ठस्याग्रान् G. [13] °तां G. [14] R ins. ता. [15] सवमेन G. [16] °ष्य TD. [17] TG and R 1 om. उपरि. [18] एका G. [19] हरिद्रा° C (D ?). [20] C om. [21] G om. [22] G om. तत्.

तां श्वोभूते कुशैरूर्ध्वाग्रैः परिवेष्ट्यैवंजातीयेनैव वसनेन प्रदक्षिणमूर्ध्वदशेन[1] परिवेष्ट्य स्पृष्टो[2] ऽनपश्रित[3] उद्गायेदिति गौतमः ॥ ५ ॥

इदमुद्गातुः कर्म । श्वोभूते सुत्येऽहनि तामौदुम्बरीमुद्गाता कुशैर्दर्भैरूर्ध्वाग्रैः परिवेष्ट्य एवंजातीयकेन पूर्वोक्तेन[4] क्षौमादीनामन्यतमेन वाससा चोर्ध्वदशेन[5] परिवेष्ट्य तां स्पृष्ट्वा[6] ऽनपश्रित[7] उद्गायेत् । तस्यां शरीरभागमनाश्रित्य[8] स्पर्शनमात्रमेव कृत्वेत्यर्थः । स्पृष्ट[9] इति कर्तरि निष्ठा ॥ अनपश्रयणे हेतुमाह ॥

धिष्ण्यो ऽयं भवति न धिष्ण्यमासादयेदिति ॥ ६ ॥

औदुम्बर्यपि[10] कश्चिद्धिष्ण्यो ऽग्निरेव । तथा च धिष्ण्योपस्थाने तदुपस्थानमप्युक्तं[11][a] । न च[12] धिष्ण्यमग्निं कंचिदासादयितुमर्हति[13] । तस्मादनपश्रित एव गायेदिति ॥

धृष्टमपश्रयेतेति[14] धानंजय्यः[15] ॥ ७ ॥

धृष्टं निर्भयं । धिष्ण्यो ऽयमग्निरिति भीतिर्न[16] कार्येत्यर्थः ॥ कुत इत्याह ॥

"स एव तदूर्जि[17] श्रितः प्रजाभ्य ऊर्जं विभजति"[18][b] इति ह्याह ॥ ८ ॥

"ऊर्ग्वा[19] उदुम्बरः"[c] "साम वै[20] देवानामन्नं"[b] इति च प्रकृत्य ब्राह्मणं "स एव तदूर्जि श्रितः प्रजाभ्य ऊर्जं विभजति"[21] इति[21] । ऊर्ग्रूपायामौदुम्बर्यामपश्रितमूर्ग्रूपं[22] साम[23] उद्गाता देवेभ्यो विभजतीति[24] ब्राह्मणार्थः । एतदुक्तं भवति । यदिदमौदुम्बर्यामपश्रितमुद्गायति[25] । तदिदमन्नमवष्टभ्यान्नं[26] देवेभ्यो[26] ददातीति[26] । यद्यनपश्रित[27] उद्गायेत्[27] । तदा देवेभ्यो ऽन्नं दत्त्वा स्वयं रिक्त[28] एव स्यादिति ॥

[1] °दशेन all MSS. except TD. [2] स्पृष्टो G; °ष्टे D. [3] नपरित TG. [4] °क्तकेन C.
[5] °दशेन MSS. [6] स्पृष्टो D. [7] न परिश्रित D. [8] °भारमनिश्चित्य G. [9] पृष्ट C; वृष्ट D; स्पष्ट G. [10] °र्यवि C. [11] न उपस्था° C. [12] G om. [13] कश्चि° C.
[14] धृष्टः प्रश्रयतेति G; धिष्ण्यमपगायेदिति TD; ग्रिष्टमपश्रतेति Tg. [15] °य्यो पश्रयणार्थेयं भवतीति TG. [16] G om. भीतिः. [17] °र्जे G, Tg; °र्ज्जित TG. [18] व्यभज° TG.
[19] ऊर्ध्वा D. [20] C om. [21] व्रजतीति G. [22] °र्या: प्रभृत ऊर्य्रूपं G. [23] G om.
[24] व्यभ° G; ह्य भ° D. [25] °र्यामपरिश्रि° D. [26] °ष्टह्यान्तन्देतिवेभ्यो ददाति G.
[27] °श्रितदुद्गा° C; °येति G. [28] G om.

[a] 4, 2, 11. [b] PV. Br. 6, 4, 13. [c] PV. Br. 6, 4, 11.

स्तोष्यमाणानां मध्ये वैष्टुतं वसनं[1] प्राक्समासं[2] वोदक्समासं वोपरिदशमास्तीर्य प्रस्तोता कुशा विदध्यात्प्रस्तावान्तेषु ॥ ९ ॥

आवृत्तिस्तोत्रैः[3] स्तोष्यमाणानामुद्गातॄणां मध्ये विष्टुतिगणनार्थं कुशास्तरणं वासः प्राक्समासं वोदक्समासं वोपरिदशमास्तीर्य तत्र प्रस्तोता कुशा विदध्यात्प्रस्तावभक्त्यन्तेष्विति[4] ॥

आद्ये[5] ऽनेकप्रस्तावासु[5] ॥ १० ॥

अनेकप्रस्तावयुक्तासु स्तोत्रीयासु महानाम्न्यादिषु प्रथमप्रस्तावान्ते[6] कुशाविधानमिति ॥

अप्रस्तावास्वादौ ॥ ११ ॥

संतनिय[7] एवादौ[7]। प्रस्तावभक्तिरहितासु[8] स्तोत्रीयासु स्तोत्रीयोपक्रम एव कुशाविधानमिति ॥

उदगग्रं प्रथमं विष्टावं प्राक्संस्थं प्रत्यग्वा ॥ १२ ॥

विष्टावो नाम पर्यायस्य त्रेधाविभक्तस्यैकैको भागः स्तोत्रीयाभ्यासरूपः । तेषु[9] प्रथमं विष्टावमुदगग्रं प्रागपवर्गं प्रत्यगपवर्गं वा कुर्यात् । उदगग्राभिः कुशाभिः[10] क्रमेण पुरस्तात्प्रत्यग्वा निहिताभिर्गणयेदित्यर्थः ॥

तं पश्चिमेन मध्यमदेशेनोदक्संस्थं[11] प्रागग्रं प्रत्यग्वा ॥ १३ ॥

तस्य प्रथमविष्टावस्य मध्यमदेशतः[12] पश्चादुदगपवर्गं प्रागग्राभिः प्रत्यगग्राभिर्वा द्वितीयं विष्टावं गणयेदिति ॥

तं पश्चिमेनोदगग्रं प्रत्यक्संस्थम् ॥ १४ ॥

स्पष्टमिति ॥

[1] सवनं G. [2] पृथक्स° G. [3] G om. स्तोत्रैः. [4] °स्तावविभज्यन्तेषु G.
[5] आद्येनेकप्रस्तावासु TD, C, TG, G, R2; D reads आद्ये नेकप्रस्तावेष्विति (thus corr. from °स्तावास्विति). [6] प्रथमप्रथावा° G. [7] सन्तनीययणवादौ G; संतनियवादौ D.
[8] प्रस्तावविभीतिर° G. [9] For तेषु C substitutes सरूपपत्तेषु. [10] G om. [11] मध्यदे° TD, C.
[12] मध्यदे° C.

एवंविधाः पर्याया उत्तरोत्तराः[1] ॥ १५ ॥

एवं त्रयोऽपि पर्याया[2] उत्तरतः[3] कुशाविधाने[4] कार्या इति ॥

मिथः पर्यायविष्टावान् संदध्यात् ॥ १६ ॥

इतरेतरं[5] विष्टावेषु कुशाः संश्लेषयेत् । पर्यायेषु[6] चेति[6] ॥

पर्यायादिषु[7] हिङ्कारं स्तुवीरन् ॥ १७ ॥

हिङ्कारमिति णमुल्प्रत्ययान्तः[8] । प्रतिपर्यायं हिङ्कृत्य हिङ्कृत्येत्यर्थः । पर्यायो नाम त्रेधाविभक्तस्य स्तोमस्यैकैको भागः । अत्र त्रिवृदादिस्तोमानां पर्यायविष्टावक्लृप्तिर्ब्राह्मणेनैवोक्तेति[*] । न सूत्रकारस्य कृत्यमस्ति । यद्येवं हिङ्कारो वितत[9] एव[10] सिद्ध[10] इति न[10] सूत्रकारेण वक्तव्यः । सत्यं । "तिसृभ्यो हिङ्करोति" इत्येकत्वश्रुतेरुद्गातुरेव हिङ्कारे प्राप्ते त्रयाणामपि प्राप्त्यर्थं हिङ्कारं स्तुवीरन्नित्युक्तमिति ॥

उत्तमां प्रस्तुत्य[11] "एषा"[11] इति शंसिष्यन्तं ब्रूयात् ॥ १८ ॥

उत्तमां स्तोत्रीयां प्रस्तोता प्रस्तुत्य "एषा" इति शंसिष्यन्तं प्रतिब्रूयात्[12] । असमाप्त[13] एव[13] स्तोत्रे[14] शस्त्रारम्भप्रबोधनार्थमिति[14] ॥

"स्तुतस्य स्तुतमसि" इति यजमानवाचनम्[15] ॥ १९ ॥

स्तोत्रे समाप्त इति शेषः ॥

सवनसंस्थासु प्रशास्तोक्ता[16] यथेतमपरया[17] द्वारा निष्क्रम्य पश्चिमेनाग्नीध्रीयं बहिर्वेदि[18] मूत्रं[19] कुर्युः ॥ २० ॥

प्रशास्ता मैत्रावरुणेन सर्पतेत्युक्ताः । अर्थप्राप्तस्य मूत्रस्य कालनियमोऽयमिति ॥

[1] उत्तरो TG. [2] पर्यया G. [3] उत्तरोत्तरतः G. [4] °नेन G. [5] D had originally उत्तरोत्तरं. [6] G om. [7] पर्यायेषु G; पर्याया TG. [8] वर्णमुपस्मृत्य° G. [9] पितत C. [10] G om. [11] °त्ये° Tg, G (for °त्यै°). [12] G om. प्रति. [13] G om. [14] स्तोत्रशस्त्रयोस्तन्त्र स्वर्थं (?) G. [15] यजमानयाचनं Tg. [16] °क्त Tg. [17] यथि° Tg, G. [18] सभिर्वेदि Tg. [19] मात्रं G.

[*] PV. Br. Adhy. 2.

वाचं यच्छेयुर्यावदुदक्याः स्युः ॥ २१ ॥

यावदुदकाचमनेन शुद्धाः । तावद्वाग्यताः स्युरिति ॥

एतन्मृगतीर्थम् ॥ २२ ॥

आग्नीध्रीयस्य पश्चाद्यो देशः । स मृगतीर्थनामेति ॥

तेन न[1] भूयः शम्यापरासाद्गच्छेयुः ॥ २३ ॥

तेन मृगतीर्थेन शम्यापरासादतिरिक्तदेशं[2] न[2] गच्छेयुः[2] । हस्तेन वेगयुक्तेन शम्या प्रास्ता यावन्तं प्रदेशं[3] गच्छेत् । स शम्यापरास इति ॥

यो भूयो जिगमिषेदाग्नानेन[4] स[5] गच्छेत्[5] ॥ २४ ॥

यस्तु[6] शम्यापरासादतिरिक्तं गन्तुमिच्छति । स आग्नानेन तीर्थेनैव गच्छेदिति ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ ६ ॥

अथ धिष्ण्यानुपतिष्ठेरन् ॥ १ ॥

सवनसंस्थानन्तरं[7] निष्क्रान्ताः कृतावश्यकाः पुनराग्नानतीर्थेन[8] प्रपद्य[9] यथापूर्वं[a] धिष्ण्योपस्थानं कुर्युरिति ॥

समस्तेनोत्तरयोः सवनयोरिति गौतमशाण्डिल्यायनौ ॥ २ ॥

उत्तरयोः सवनयोः "पात माऽग्नयः" इति समस्तेनैव मन्त्रेणोपस्थानं[b] नेतरैरित्येकं मतमिति ॥

[1] TG and Tg om. [2] G om. [3] देशं C. [4] °दानानेन Tg. [5] संगच्छेत् TG. [6] यत्तु G. [7] °संस्थानमंतरं D. [8] °ग्नानेन G. [9] प्रवद्य C.

[a] Cf. 4, 2 and 3. [b] Cf. 4, 3, 8. 9.

सर्वेणेति धानंजय्यः ॥ ३ ॥

सर्वेण सर्वैरपि मन्त्रैर्यथाखमुपस्थानमिति मतान्तरमिति ॥

अनुपस्थानं शाण्डिल्यः ॥ ४ ॥

स्पष्टं ॥

एवमेव निष्क्रम्य पृथक्स्तोत्रेभ्यः समस्तेनोपतिष्ठेरन्यान्यूर्ध्वमुक्थेभ्यः[1] ॥ ५ ॥

तृतीयसवने उक्थस्तोत्रेभ्य[2] ऊर्ध्वं यानि स्तोत्राणि[3] षोडशिसामादीनि तदर्थमेवापरया[4] द्वारा[5] निष्क्रम्य[6] "पात मा ऽग्नयः"[7] इति समस्तेनोपस्थानं प्रतिस्तोत्रं कार्यमिति ॥ तत्र[8] विशेषमाह ॥

पर्यायेभ्यस्तु रात्रेः ॥ ६ ॥

रात्रिसंबन्धिभ्यः पर्यायेभ्य[9] एव[10] पृथक्पृथगुपस्थानं । न पुनः प्रतिस्तोत्रमिति[11] । तेन षोडशिस्तोत्रे वाजपेये च बृहत्स्तोत्रे[12] संधौ च पृथक्पृथगुपस्थानं । तथा ऽतिरिक्तस्तोत्रेष्वपि[13] प्रतिस्तोत्रमुपस्थानमिति पूर्वसूत्रेणोक्तं[14 a] भवति ॥

यथासनमुपविश्य प्रस्तोता हविर्धानं गच्छेन्माध्यन्दिने ॥ ७ ॥

यथासनमुपविश्य यजमानोपहवे च[15] गमनं । "एतत्सर्वं कुर्युर्यदा धिष्ण्यानुपतिष्ठेरन्"[b] इति वचनात् । यद्येवं तेनैव सिद्धत्वाद्यथासनमुपविश्येति[16] न वक्तव्यं । तथा हविर्धानं गच्छेदित्यपि न वक्तव्यं । "एतत्सर्वं कुर्यादुत्तरयोः[17] पवमानयोः"[c] इत्यतिदेशात् । सत्यं[18] । नियमार्थमित्येतत्सूत्रं[18] । प्रस्तोतैव गच्छेन्नेतरावित्येको[19] नियमः । तथोपवेशनानन्तरं[20] गच्छेन्न पूर्वमित्यपरो नियमः । अन्यथा प्रस्तोतुरुपवेशनस्य दृष्टप्रयोजनाभावादुपस्थाने कृते तदानीमेव हविर्धानगमनं[21] स्यात् । तन्निवृत्त्यर्थमुपविश्यैवेति[22] वचनमदृष्टार्थमिति ॥

[1] °त्तेभ्यः TG. [2] G om. उक्थ. [3] स्तोत्रीयाणि C. [4] °मेव वापरया G. [5] G om. [6] G ins. पुनः प्रविश्य. [7] °मेय G. [8] G om. [9] °येण G. [10] G om.; एवं C. [11] °स्तोत्रिय° G. [12] बृहतस्तोत्रे C, G. [13] °त्रे D. [14] पूर्वमन्त्रे° G. [15] कृते D. [16] °विशेदिति G; विशेति C. [17] °दुक्तयो° G. [18] सन्नियमा° G; नियमर्थैत° C, D. [19] °तर इ° G. [20] °वेशानंतरं C. [21] °ने गमनं D. [22] °र्थमेवमु° G.

[a] 5, 1, 30. [b] 4, 3, 16. [c] 3, 4, 32.

हुत आदित्यग्रहे प्रतिहर्ताऽऽर्भवे ॥ ८ ॥

इदमपि नियमार्थं। आर्भवे पवमाने प्रतिहर्तैव गच्छेद्यथासनमुपविश्यादित्यग्रहहोमानन्तरमिति[1] ॥

उभयत्र सर्वे सत्त्रेषु ॥ ९ ॥

सत्त्रेषु[2] तूभयत्राप्यार्भवे माध्यन्दिने पवमाने च त्रयोऽप्युद्गातारो हविर्धानं गच्छेयुः। सर्वत्र[3] होतृमैत्रावरुणधिष्ण्यावन्तरेण पूर्वया द्वारा निष्क्रम्य दक्षिणेनाग्नीध्रीयं हविर्धानं गच्छेयुः। "दक्षिणेनोत्तरयोः सवनयोर्यदा हविर्धानं"[a] इति वचनात्। गत्वा हविर्धानं रराट्यालम्भनादि[b] पवित्रनिष्पीडनान्तं[4c] कृत्वा निःसर्प्य[5] प्रवृत्तहोमौ च हुत्वा[d] सदस्यागत्य "यो म आत्मा" इत्युपवेशनान्तं[e] कृत्वा पवमानस्य स्तुग्जपादि कर्तव्यमिति[6] ॥

पवमानयोरुत्तरयोर्धिष्ण्यविहरणे मार्जालीयं[7] हरन्तः[8] पश्चिमेन यजमानं हृत्वा[9] तेनैव प्रतिहरेयुः ॥ १० ॥

सदसः पूर्वया द्वारा प्रविश्य यजमानं पश्चिमेन मार्जालीयं हृत्वा तेनैव पुनः प्रतिहृत्य[10] मार्जालीयस्थाने निदध्युः। अदृष्टार्थमेतत्। इदं चाध्वर्यवं विकल्पते[11]। अध्वर्युसूत्रेऽनुक्तत्वादिति ॥

माध्यन्दिनेन स्तुत्वा सत्त्रेषु दधिघर्मस्य[12] भक्षयेयुः[13] समुपहूय[13] "दधिक्राव्णः"[14] इति[f] ॥ ११ ॥

स्पष्टमिति ॥

[1] गच्छेद्यथासवमनुपविश्य वादित्य॰ G. [2] सत्रे G. [3] सर्वे G. [4] For this G reads: प्रयुङ्क्ते इति देविमन्त्रजपान्तं. [5] निःसर्प C. [6] G adds: अत्र सर्पणवेलायामुत्गातृप्रतिहर्त्रोरपि सर्पणं कार्यं। एतत्सर्वं कुर्यादुत्तरयोः पवमानयोरिति वचनात् ॥ तथा उपग्रन्थकारेण उभयोर्वा सर्पणयोः प्रतिहर्ता वक्ष्यते हि माध्यन्दिने सवने प्रतिहर्तुं सर्पणं कर्त्तव्यं। आपस्तंबो प्याह ॥ बहिष्पवमानवन्माध्यन्दिनं पवमानं सर्पन्तीति। [7] मार्जनमार्जालीयं G. [8] भ॰ G. [9] गत्वा G. [10] प्रहृत्य G. [11] ॰ल्प्यते C, G. [12] ॰र्मं D, G, Tg. [13] ॰येयुरसमुप॰ G, TG, Tg; ॰ह्वीय G. [14] ॰क्राविण G.

[a] 4, 2, 6. [b] Cf. 3, 1, 9. [c] Cf. 3, 3, 11. [d] Cf. 3, 3, 17. [e] Cf. 3, 3, 27.
[f] Cf. 6, 3, 30.

तस्या उत्तमं पादं[1] दशमे ऽहन्यभ्यस्येयुः ॥ १२ ॥

दशमे ऽहनि[2] "परोक्षमनुष्टुभमुपयन्ति"[a] इति ब्राह्मणेन प्रत्यक्षमनुष्टुभां[3] परिहरणीयत्वात् । तदर्थो ऽभ्यास इति ॥

पूर्वेण पत्नीशालामन्तरेणाग्नीध्रीयं सदश्च तीर्थेन[4] दक्षिणा[5] नयेयुः[5] ॥ १३ ॥

दक्षिणादानकाले महावेदेर्दक्षिणपार्श्वे पूर्वमेव दक्षिणाः स्थाप्याः । ताः पूर्वेण पत्नीशालामुदीचीं नीत्वा पुनराग्नीध्रीयं सदश्चान्तरेण प्राचीं नीत्वा पुनस्तीर्थेनोदीचीं नयेयुरिति ॥

सर्वासां "देवस्य त्वा"[b] इति पुरस्ताज्जपः ॥ १४ ॥

सर्वदक्षिणानां प्रतिग्रहे "देवस्य त्वा" इति पुरस्ताज्जपः कार्य इति ॥

"वरुणस्त्वा"[c] इति यथादैवतं[6] प्रतिगृह्णीयात्[7] ॥ १५ ॥

यथादैवतमिति यस्य द्रव्यस्य देवता प्रतिग्रहमन्त्रे[8] पठिता । तामादिश्य तत्प्रतिगृह्णीयात् । यथा "वरुणायाश्वं"[d] "अग्नये हिरण्यं"[e] इत्यादि ॥

यथाजाति मृगान् ॥ १६ ॥

"वायवे मृगं"[f] इति मृगप्रतिग्रहमन्त्रे यथाजाति मृगानादिशेत्[9] । "वायवे हरिणं" "वायवे खगं" इत्येवं सर्वस्वदक्षिणे[10] क्रतौ मृगस्यापि शशहरिणादेर्गृहे[11] विद्यमानस्य[12] दानमस्तीति ॥

अप्राणच्च[13] ॥ १७ ॥

"उत्तानायाङ्गिरसायाप्राणत्"[14g] इति[14] मन्त्रे अप्राणदपि[15] यथाजात्यादिशन्प्रतिगृह्णीयात्[16] । तद्यथा[17] । उत्तानायाङ्गिरसायानःशय्यासनमित्येवमिति ॥

[1] पदं D, R. [2] G om. [3] प्रत्यक्षानु° G. [4] R 2 om.; R 1 adds in marg.
[5] °णाग्निनयेयुः G. [6] °दैवतं D. [7] तत्प्रति° D. [8] °न्त्रेषु G. [9] मृगमादिशेत D.
[10] G om. स्व. [11] G om. [12] G om. [13] °णश्च TG; अप्रमाणाच्च G.
[14] उत्तारणायांगिरसायां प्रमाणमिति G. [15] अप्रमाणादि G; अप्राणादपि C (and, orig., D).
[16] °दिश्य प्र° G. [17] तथा G.

[a] PV. Br. 4, 8, 9. [b] PV. Br. 1, 8, 1. [c] PV. Br. 1, 8, 2 et seq. [d] PV. Br. 1, 8, 2.
[e] PV. Br. 1, 8, 5. [f] PV. Br. 1, 8, 13. [g] PV. Br. 1, 8, 11.

पुंवन्मिथुनान्यन्यत्राजाभ्यः[1] ॥ १८ ॥

मिथुनप्रतिग्रहे पुंस इव मिथुनानां देवतामादिशेत्। यथा "वरुणायाश्वौ"[2] इत्यादि[2]। अन्यत्राजाभ्य इति वचनं। अजमिथुने स्त्रियश्च[3] पुंसश्च पृथक्पृथग्देवताम्नानात्। तद्यथा "अग्नये ऽजं"[a] "अग्नीषोमाभ्यामजां"[b] इति ॥

"तेन"[c] "क इदम्"[d] इत्युपरिष्टाज्जपः ॥ १९ ॥

"तेनामृतत्वमश्यीय" इत्यादि "प्रतिग्रहीत्रे" इत्यन्तं तथा "क इदं कस्मा[4] अदात्" इत्यादि "कामैतत्ते" इत्यन्तं द्वयमप्युपरिष्टाज्जपेदिति[5] ॥

तत्रोहापादीनि पदानि[6] ॥ २० ॥

तेषु मन्त्रेषु यानि पदान्यूहमापद्यन्ते। तान्यूहापादीनि[7] वक्ष्याम इत्यर्थः ॥ तान्येवाह ॥

"त्वा" "देवि" "दक्षिणे" "अदः" इति च[8] यत्तत्स्यात् तेन "दात्रे"[9] "इदम्" "आविश" "एतत्ते" "भुञ्जति"[e] "हिंसीः"[10e] इति च ॥ २१ ॥

"वरुणस्त्वा नयतु देवि दक्षिणे" इत्यत्र पदत्रयं यथार्थमूह्यं। "वरुणो वो नयतु देव्यो दक्षिणाः" इत्येवं। अद इति च यत्तत्स्यादित्यस्यायमर्थः[11]। अद इति द्वितीयान्तं च पदमूह्यं। यत्संख्यं[12] यल्लिङ्गं च तद्द्रव्यं स्यात्। तेनाकारेणोह्यमिति च। ननु च। अद इति द्वितीयान्तं पदं नास्ति। सत्यं। "वरुणायाश्वं" इत्यदिषु प्रतिगृह्यद्रव्यवचनानां[13] द्वितीयान्तानामेतदुपलक्षणं। तेनाश्वमश्वावित्यादि[14] लिङ्गवचनोहः कार्यः। तथा "तेनामृतत्वमश्यीय वयो दात्रे"[15] इति पदद्वयमूह्यं। "ताभ्याममृतत्वमश्यीय[16] वयो दातृभ्यां"

[1] °थुनान्यत्रा° TG, Tg. [2] °श्वादित्यादि D. [3] स्त्रियाश्च D. [4] कस्मात् G.
[5] °ष्टाज्जप इति C. [6] D om. this Sūtra. [7] तानि G. [8] G om. the rest of this Sūtra.
[9] Tg ins. क. [10] मा मा हिं° TG. [11] G om. अस्य. [12] यज्जातियं G. [13] प्रतिग्राह्य° G.
[14] °श्वमश्वा इ° G. [15] G ins. इत्यनेन दात्र. [16] ताभ्यामृ° D, G.

[a] PV. Br. 1, 8, 4. [b] PV. Br. 1, 8, 6. [c] PV. Br. 1, 8, 2. [d] PV. Br. 1, 8, 17.
[e] PV. Br. 1, 8, 7.

"दाल्भ्यः" इति । दाल्भ्यशब्दो[1] यजमानवाची । तथा "क इदं कस्मा अदात्" इत्यत्र[2] "इदं" "आविश" "एतत्" इति पदत्रयमूह्यं । इदमिममिमामिति[3] । अत्र "कामं समुद्रमाविश"[a] इति तैत्तिरीयाणां मन्त्रपाठः । छन्दोगानामपि नूनं शाखान्तरे तथैव पाठः । यतः[4] सूत्रकारेणैवमुपात्तं[4] । तत्पक्षे "आविश" इत्यस्याख्यातस्य दक्षिणापरत्वाद्यथार्थमूहः । "आविश"[5] "आविशतं" "आविशत"[6] इति[6] । अस्माकं[b] तु "कामः समुद्रमाविशत्"[7] इति[7] पाठः । तदानीं "आविशत्" इत्यस्य कामपरत्वादूहो नास्ति । तथा[8] हि । काम एव समुद्रं तद्वत्प्रहृता[9] दक्षिणा निर्भयमाविशत्[10] । नाहमिति मन्त्रार्थः । तथा "कामैतत्ते" इत्यत्राप्येतच्छब्दस्य[8] यथार्थमूहः । "कामैतत्ते" "कामैष[11] ते[11]" "कामैषा ते"[12] इत्यादि । "कामैतत्ते" इत्यत्र तेशब्दस्य नास्त्यूहः । एतच्छब्दप्रदर्शनार्थं तस्य सहपठितस्य[13] सूत्रेणोपदानमिति । तथा "अन्नस्यान्नपतिः[14] प्रादात्"[15] इत्यस्मिन्मन्त्रे[15] "भुञ्जति"[16] "हिंसीः" इति च पदद्वयमूह्यं[17] । यथा "भुञ्जत्यो मा मा हिंसिष्ट" इति ॥

अश्वरथं चेद्दद्यात् ॥ २२ ॥

यद्यश्वैर्वाहनैर्युक्तं रथं यजमानो दद्यात् । तदा विशेषं वक्ष्याम इत्यर्थः ॥

पूर्वेणाग्नीध्रीयमवस्थाप्य पुरस्ताज्जपं जपित्वा दर्भमुष्टिना ऽश्वमुखानि संमृज्याद्वाभ्यां[18] द्वाभ्यामश्वनामभ्यामेकैकस्य "अश्वो ऽसि"[d] इत्येतत्प्रभृतिभिरुदक्संस्थमिति धानंजय्यः ॥ २३ ॥

"अश्वो ऽसि अत्यो ऽसि मयो ऽसि हयो[19] ऽसि" इत्यश्वनामान्यष्टौ पठितानि[20] । तानि[20] विभज्य[21] द्वाभ्यां द्वाभ्यामेकैकमश्वमुदगपवर्गं संमृज्यात् । तेन सामर्थ्याच्चतुर्भिरश्वैर्युक्तस्य रथस्य प्रतिग्रहे ऽयं धर्मः । उदक्संस्थमिति[22] वचनात्[22] । प्राङ्मुखः प्रत्यङ्मुखो वा रथो ऽवस्थाप्य इति ॥

[1] दातृत्वश॰ C. [2] इत्यादि ह्यत्र G. [3] इमिमामिति D; इदंमिमामिति C. [4] G om. [5] G om. [6] ॰शेति D, G. [7] ॰विशेदिति G. [8] तथा—॰च्छब्दस्य missing in D. [9] G om. [10] G om. निर्भयं. [11] C and D om. [12] व C. [13] सहपते स्य D; सहयत्ते स्य C. [14] D om. ऽन्नस्य. [15] प्रादा इ॰ C. [16] G adds इति. [17] ॰यमप्यू॰ C. [18] ॰ज्य द्वा॰ TG, G. [19] D om. हयो, G अत्यो and मयो. [20] G om. [21] प्रवि॰ G. [22] प्रतिग्रहवचनात् G.

[a] Taitt. Âr. 3, 10, 2. [b] PV. Br. 1, 8, 17. [c] PV. Br. 1, 8, 7. [d] PV. Br. 1, 7, 1.

धुर्यौ प्रथममित्यपरम् ॥ २४ ॥

धुर्यौ अभ्यन्तरावश्वौ प्रथमं संमृज्यादित्यपरं मतमिति ॥

दक्षिणं पूर्वम् ॥ २५ ॥

धुर्ययोरपि दक्षिणं प्रथमं संमृज्यादिति ॥

तथा प्रष्टी[1] ॥ २६ ॥

तथैव प्रष्टी बहिर्युक्तावश्वौ संमृज्यात्। तयोरपि दक्षिणं पूर्वमित्यर्थः। अस्मिन्नपि मते[2] यथापाठमेव मन्त्रक्रममिति[3] ॥

सर्वाण्येकैकस्मिन्नुदक्संस्थमिति शाण्डिल्यः ॥ २७ ॥

अष्टावप्यश्वनामानि प्रत्येकमश्वेषु प्रयुञ्ज्यात्। उदगपवर्गमिति ॥

सर्वाण्येकस्मिंस्तूष्णीमितराणीत्यपरम्[4] ॥ २८ ॥

अष्टावप्यश्वनामान्येकस्मिन्नेव दक्षिणेऽश्वे प्रयोज्यानि[5] तूष्णीमितरान्संमृज्यादिति ॥

एतान्येवाश्वास्वश्वतरेष्वश्वतरीषु[6] च यथार्थमूहेत् ॥ २९ ॥

एतान्येवाश्वनामानि[7] वडवादिषु[7] यथार्थमूहेत्[7]। तत्र[8] वडवासु[9] स्त्रीलिङ्गमात्रस्यैवोहः[10]। यथा "अश्वाऽस्यत्याऽसि" इति। "वृषा[11] ऽसि"[11] इत्येव[11] तस्य[11] स्थाने "स्त्र्यसि"[12] इत्यूह्यं[12]। "मयोऽसि" इति मयःशब्दः[13] सकारान्तः सुखवचनः। सुखमसीत्यर्थः[14]। तदनूह्यमेव। "अत्यो[15] ऽसि"[15] इति[15] सततगमनार्थशब्दः। शिष्टानि[16] पञ्च नामान्यश्वजातिवाचकानि। तत्स्थानेऽश्वरथविषये[17]ऽश्वतरशब्दः कार्यः। तत्रापि स्त्रियां "अश्वतर्यसि"[18] इत्याद्यूहनीयमिति[18] ॥

[1] प्रष्टीस् Tg. [2] मन्त्रे D, C. [3] °क्रमः G. [4] °ण्येकैक° TG, Tg; °रान्नित्यपरं TG.
[5] प्रयुंज्यानि D. [6] °वाश्वाश्वतरेष्व° TD. [7] G om. [8] अत्र G. [9] व° G.
[10] G om. एव. [11] वृषान्तस्येत्यस्य G. [12] स्त्रियसी° G. [13] यमःशब्दः C.
[14] सखमासी° G. [15] अत्यासीति G. [16] G substitutes द्विशि. [17] अश्वतरविषये G.
[18] °तरीयसी° G.

त्रिभिश्चेदर्धान्येकस्मिन्नर्धानि द्वयोः ॥ ३० ॥

यद्यश्वरथः त्रिभिरश्वैर्युक्तः स्यात् । तदानीमर्धानि[1] चत्वार्यश्वनामानि एकस्मिन्ब्रूयात्। इतराणि चत्वारि द्वयोरश्वयोः समं[2] विभज्य[2] ब्रूयादिति ॥

द्वैधं[3] द्वयोः[3] ॥ ३१ ॥

यदि द्वाभ्यामश्वाभ्यामेव रथो युक्तः स्यात् । तदा द्वयोरश्वयोर्द्वैधमश्वनामानि समं[4] विभजेदिति[4] ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ७ ॥

"आदित्यानाम्"[a] इति रथशिर आलभ्य जपेत् ॥ १ ॥

संमार्जनानंतर "आदित्यानां" इति[5] जपेदिति[6] ॥

यद्द्रव्यं स्यात् "वायोः"[b] इति चर्मण्यं[7] प्रतिगृह्णीयात् "नक्षत्राणाम्"[b] इत्यस्थिमयं "सूर्यस्य"[b] इत्ययोलोहे हिरण्यं च ॥ २ ॥

तत्र यद्द्रव्यं रथाङ्गं चर्मलोहहिरण्यादिनिर्मितं स्यात् । तत्र[8] "वायोः" इति चर्मविकारं प्रतिगृह्णीयात्[9] । अस्थिमयं गजदन्तादिनिर्मितमयोलोहे हिरण्यमिति[10] । आयसं ताम्रं सौवर्णं चेत्यर्थः ॥

दक्षिणेन रथं गत्वा "रथन्तरमसि"[c] इति दक्षिणं चक्रमालभेत ॥ ३ ॥

स्पष्टमिति ॥

[1] तदानीं मध्यानि C. [2] समाविभज्य G. [3] द्वैधयोः G. [4] समावि॰ G. [5] G om.
[6] जपः G; जप इति C. [7] ॰ण्यम Tg. [8] ताम्रं G. [9] प्रगृ॰ D. [10] G om.

[a] PV. Br. 1, 7, 2. [b] PV. Br. 1, 7, 3. [c] PV. Br. 1, 7, 4.

“वामदेव्यमसि”[a] इत्यधिष्ठानम् ॥ ४ ॥

अधिष्ठानमुपवेशनस्थानमिति[1] ॥

“बृहदसि”[a] इत्युत्तरं चक्रम् ॥ ५ ॥

गतमिति ॥

“अङ्कान्यङ्कू”[2b] इति चक्रे एव संमृज्यात् ॥ ६ ॥

ये[3] पूर्वमालब्धे[4] चक्रे ' ते एव पुनरपीत्येव शब्दार्थः ॥

“वैश्वानरः”[c] इति दक्षिणेन पादेनारोहेत् ॥ ७ ॥

रथमिति शेषः ॥

तदपि वेदितमवपन्नं[5] दक्षिणं चक्रं निर्वृत्य[6] खमन्वीक्षयेत्पूर्वस्यान्तेन[7] “ते त्वा ऽग्नयः”[8d] इति[8] ॥ ८ ॥

तच्चक्रमक्षभङ्गादिना[9] ऽवपन्नं विनष्टं[10] यजमानेनाप्यावेदितं चेद्दक्षिणं चक्रमक्षान्निर्वृत्य[11] निष्कृष्य ' तस्य चक्रस्य द्वारं[12] यजमानं दर्शयेत् । प्रतिग्रहीता पूर्वस्य मन्त्रस्यान्तेन “ते नो ऽग्नयः पप्रयः पारयन्तु”[13] इत्यनेन[13] तत्र न[14] इत्यस्मच्छब्दस्य[15] स्थाने “ते त्वा ऽग्नयः” इति युष्मच्छब्दं[16] यजमानमभिप्रेत्य[17] प्रयुञ्ज्यादिति ॥

“ते मा”[18d] इतीतरो[18] ब्रूयात् ॥ ९ ॥

इतरो यजमानः “ते मा[19] ऽग्नयः पप्रयः पारयन्तु” इति ब्रूयादिति ॥

आरुह्य जपेत् “गिर्देष[20] ते”[e] इति ॥ १० ॥

स्पष्टमिति ॥

[1] G reads: अधिष्ठानमुपवेशनं । उपवेशनमुपवेशनस्थानं । [2] अंगान्यंग G. [3] एवं G; ए C. [4] °ब्धौ C. [5] वेतित° D; वद्दिम° TG. [6] निर्वर्त्त्य TD, R 2. [7] मीषमन्वीक्ष° R 1; °न्ते Tg. [8] मे मेति TG. [9] तं च° C; °क्रमविभंगा° G. [10] पिनष्टं D. [11] °क्षां नि° D; °क्षां निर्वत्य C; G ins. न. [12] पारं G. [13] पारवित्य° D. [14] D om. [15] ह त्यस्म° D; प्रत्यस्म G. [16] °ब्दो G. [17] °मान इति अभि° G. [18] नेतो° G. [19] नो C. [20] जपेहिन्नेष D.

[a] PV. Br. 1, 7, 4. [b] PV. Br. 1, 7, 5. [c] PV. Br. 1, 7, 6. [d] Cf. PV. Br. 1, 7, 5. [e] PV. Br. 1, 7, 7.

तदपि वेदितं[1] श्रमरथं शाखां[2] स्तम्बमालभ्यान्तरा[3] चक्रवर्त्मनी[4] एतेनैवान्वीक्षेत[5] ॥ ११ ॥

श्रमरथः[6] श्रान्तरथः जीर्णरथ इत्यर्थः । यजमानेन जीर्णोऽयमिति निवेदितं । रथं चक्रवर्त्मनोर्मध्येनावकाशेन "गिरैष ते[7]" इत्येतेनैव निरीक्षेत । तदिति नपुंसकलिङ्गं छान्दसमिति ॥

"कृशा"[a] इति सव्यानभीशूनायच्छेत्[8] ॥ १२ ॥

सव्यानभीशून्[9] रश्मीनायच्छेदिति ॥

"दास"[b] इति दक्षिणानवगृह्णीयात् ॥ १३ ॥

दक्षिणानभीशूनिति ॥

अवरुह्य सकृद्वारुणमुक्त्वा यथादैवतमादिश्योपरिष्टाज्जपं[10] जपेदिति गौतमः[11] ॥ १४ ॥

रथादवरुह्य "वरुणस्त्वा नयतु देवि दक्षिणे" इत्येतं[12] वारुणमन्त्रं[c] बहुवचनोहेन सकृदुक्त्वा यथादैवतमश्वांश्च[13] रथं चादिश्य "तेनामृतत्वमश्यीय" इत्युपरिष्टाज्जपमूहेन[14] सकृद्ब्रूयात् । तद्यथा । "वरुणो वो नयतु देव्यो दक्षिणा वरुणायाश्वानुत्तानायाङ्गिरसाय रथं तैरमृतत्वमश्यीय"[15] इति[15] ॥

संमार्जनप्रभृत्येतत्सर्वं कृत्वा विमुच्य नाना पुरस्ताज्जपोपरिष्टाज्जपौ[16] वारुणमश्वेभ्यो रथाय चेति धानंजय्यः ॥ १५ ॥

अश्वसंमार्जनप्रभृत्यवरोहणान्तं[d] कर्म कृत्वा रथादश्वान्विमुच्य पृथगेव पुरस्ताज्जपोपरिष्टाज्जपौ[17e] वारुणं चेति मन्त्रत्रयमश्वेभ्यो रथाय[18] च[19] कार्यं न[19] तन्त्रेणेत्यर्थः ॥

[1] वेदिदं TG; वेदितं Tg. [2] °खा D, TD. [3] स्तंबालभ्या° TG; स्तंबवालभ्या° R 1. [4] TG, Tg, and G om. चक्र; R adds य. [5] °क्षते D. [6] °थं G. [7] D om. [8] सर्वान° Tg. [9] सर्वान° G. [10] यथादैवतांश्चाचयं चादि° D; °दैवत° R 1. [11] गौतममिति D. [12] °कं D. [13] °श्वं च C. [14] °ज्जपं जपेदिति । हे G. [15] °शीयेदिति G. [16] °पो D, G. [17] °पो G. [18] रथार्थे C. [19] G om.

[a] PV. Br. 1, 7, 8. [b] PV. Br. 1, 7, 9. [c] Cf. 5, 3, 15. [d] Cf. 5, 3, 23; 5, 4, 14. [e] Cf. 5, 3, 14. 19.

ग्लायेच्चेद्यथासनं[1] वैतत्सर्वं जपेत् ॥ १६ ॥

यद्यक्षमः[2] प्रतिग्रहीता स्यात् । तदा यथासनं सदस्येवासीन एवाश्वनामप्रभृतिमन्त्रान् जपेदिति ॥

पृष्ठ्यं[3] चेद्दद्यात्प्राग्वारुणादश्वनामानि जपेत् ॥ १७ ॥

पृष्ठे साधुः पृष्ठ्यः । पृष्ठे[4] न वहने[5] शिक्षित[6] इत्यर्थः । तं चेद्दद्यात्[7] । तदा "वरुणस्त्वा नयतु" इत्यतः[8] प्रागश्वनामानि जपेदिति । द्विविधो[9]ऽश्वः । पृष्ठे दान्तो वहने दान्तश्चेति[9] । तथा चापस्तम्बः । "मातृमन्तं पितृमन्तं पृष्ठे वहे च दान्तं"[a] इति ॥

पुरस्ताज्जपाद्वा[10] ॥ १८ ॥

स्पष्टमिति ॥

तथा दान्तेषु[b] ॥ १९ ॥

दान्तेषु सुशिक्षितेष्वप्यश्वेषु तथैवाश्वनाम्ना[11] जपः[11] कार्य[11] इति[11] ॥

यद्रथ्यं स्यात्तेन तत्प्रतिगृह्णीयात्[12] ॥ २० ॥

यद्रथगतं व्रीहियवादिकं । तत्सर्वं रथमन्त्रेणैव[13] प्रतिगृह्णीयादिति । रथप्रतिग्रहेण[14] तत्प्रतिगृहीतं भवति । न पृथक्प्रतिग्रहः[15] कार्य इत्यर्थः । यत्पूर्वमुक्तं[16] "वायोरिति चर्मण्यं प्रतिगृह्णीयात्"[c] इत्यादि[16] । तदपृथग्भूते[17] रथावयवे मन्त्रविशेषविधायकं । अत्र तु पृथग्भूतं व्रीहियवादिकं रथ्यमित्युच्यत इति ॥

"अन्नस्य"[d] इति प्राग्वारुणादवेः[18][e] ॥ २१ ॥

अवेः प्रतिग्रहे क्रियमाणे "वरुणस्त्वा नयतु देवि" इत्यतः प्राक् "अन्नस्यान्नपतिः" इति मन्त्रं जपेदिति ॥

[1] द्रायोच्चद्य॰ TG. [2] यद्यचं G. [3] पृष्ठं Tg. [4] पृष्ठ्ये D. [5] ॰नेन C.
[6] शिच्यत C. [7] G begins: पृष्ठ्यं चेद्दद्यत् पृष्ठ्यं यदि लक्षणयुक्तं श्रेष्ठमश्वं दद्यात्. [8] इत्यर्थः D.
[9] G om. this passage; C reads द्वितीयो द्यश्वः पृष्टे etc. [10] ॰ज्जपेद्वा G. [11] ॰नामजपं कुर्य्युः G.
[12] तत्प्रगृ॰ TG; G om. तत्. [13] ॰न्त्रेष्वेव G. [14] G adds एव. [15] ॰कपरिग्रहः G.
[16] G om. this passage. [17] तदापृथ॰ G. [18] ॰णां जपेत् G; ॰णा जपेत् TG; ॰णादश्वनामानि जपेत् Tg.

[a] Āpast. S'r. 20, 2, 10. [b] The correct reading would probably, notwithstanding Dhanvin's Comm., be ऽदान्तेषु. Cf. Rudraskanda's Comm. on this Sūtra: अशिक्षितेषु चेति । सिद्धे तथेति । किशोराणामपि ग्रहणार्थं. Cf. also Agnisvāmin on Lāṭy. 2, 8, 19. [c] 5, 4, 2. [d] PV. Br. 1, 8, 7.
[e] Cf. PV. Br. 1, 8, 8.

पुरस्ताज्जपाद्वा[1] ॥ २२ ॥

स्पष्टमिति ॥

"ग्रास्त्वा[2] ऽकृन्तन्"[a] इति वसनस्य ॥ २३ ॥

वस्त्रस्य प्रतिग्रहे "ग्रास्त्वा ऽकृन्तन्" इति मन्त्रं प्रावरणाज्जपेत् । पुरस्ताज्जपाद्वेति[3] ॥

तदुदस्येदतान्तवे ॥ २४ ॥

कार्पासतन्तुविकारस्तान्तवं[4] । अतान्तवे[5] वल्कलादौ[5] वस्त्रे "ग्रास्त्वा ऽकृन्तन्" इति मन्त्रं त्यजेदिति[6] ॥

हिरण्यमल्पीयो[b] भोगादागच्छेदौदुम्बर्यामाश्लेषयेत्[7] ॥ २५ ॥

उपभोगायापर्याप्तं[8] हिरण्यमेकमानं द्विमानं वागच्छेत्सदसः[9] स्थूणायामौदुम्बर्यामाश्लेषयेदिति[10] ॥

आग्नीध्रीये वा जुहुयात् ॥ २६ ॥

तूष्णीमग्निमुद्दिश्य[11] त्यजेदिति ॥

समस्तान्व्रीहियवानेकक्रतौ[c] प्रतिगृह्णीयात् ॥ २७ ॥

ये व्रीहियवा एकस्मिन्क्रतौ स्युः । एककाले दत्ता[12] इत्यर्थः । तानुभयान्समस्यैव[13] तन्त्रेण[14] "प्रजापतये व्रीहियवान्" इति मन्त्रेण प्रतिगृह्णीयात् । न पृथक्पृथक् "प्रजापतये व्रीहियवान्" इति । समस्यैव मन्त्राम्नानात् । अन्यथा[15] "प्रजापतये व्रीहीन्प्रजापतये यवान्" इति व्यत्यस्यैवाम्नानं स्यात्[15] । यत्र पुनर्व्रीहियवयोरेक एव दीयते । तत्र मन्त्रो व्यत्यासेन[16] प्रयोज्यः । "प्रजापतये व्रीहीन्प्रजापतये यवान्" इति । एकक्रताविति वचनं क्रतुभेदेन दत्तानां व्रीहियवानां समस्य प्रतिग्रहनिवृत्त्यर्थमिति ॥

[1] ०पेद्वा G. [2] स्त्वात्वा G. [3] ०पेद्वा G. [4] कार्पासस्तु विकारस्तावन्तं G. [5] अतान्तवादौ G; ०वे बल्कदौ C. [6] जपेत् G. [7] भागा० G; ०दायच्छे० TG. [8] ०य पर्याप्तं D. [9] ०दस्य G; ०द C. [10] ०या औ० G. [11] तूर्णीं मथिनमु० (or मग्निमु०) G. [12] सहवृत्ता D. [13] G begins: एकस्मिन् क्रतौ ये व्रीहियवा दत्ताः तानुभ०. [14] तन्मन्त्रेण G. [15] G om. अन्यथा—स्यात्. [16] वासेन G.

[a] PV. Br. 1, 8, 9. [b] Cf. PV. Br. 1, 8, 5. [c] Cf. PV. Br. 1, 8, 14.

तथा तिलमाषान्[a] ॥ २८ ॥

तथा[1] तिलमाषानपि "क्षेत्रपतये तिलमाषान्" इति मन्त्रेण समस्यैव[2] प्रतिगृह्णीयादिति ॥

प्राजापत्येनानादिष्टदेवताः[3] प्रतिगृह्णीयात् ॥ २९ ॥

अनादिष्टदेवता दक्षिणाः प्राजापत्येन प्रतिगृह्णीयाद्गर्दभादिकं । "प्रजापतये गर्दभं प्रजापतये महिषं" इति ॥

तूष्णीमयज्ञे[4] दक्षिणा[5] इति[6] धानंजय्यः ॥ ३० ॥

श्रौताग्निसंबन्धं यत्कर्म स[7] यज्ञः । तस्मादन्यत्र स्मार्तादिषु तूष्णीमेव दक्षिणाप्रतिग्रह इति धानंजय्यः । तथा चापस्तम्बः । "त इमे तान्त्राणां[8] दक्षिणानां प्रतिग्रहणाः[9] स्युः"[b] इति ॥

भूर्भुवः स्वरिति गौतमः[10] ॥ ३१ ॥

ओमिति वोमिति[11] वा ॥ ३२ ॥

व्याहृतिभिः प्रणवेन वा स्मार्तादौ प्रतिग्रह[12] इति[12] मतान्तरमिति ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ ८ ॥

पञ्चमः पटलः ॥ ५ ॥

इति च्छन्दोगसूत्रस्य पञ्चमः पटलोऽधुना ।
व्याख्यातो धन्विना सम्यगनुगृह्णन्तु[13] सूरयः ॥

[1] यथा G. [2] समसैव्य D. [3] °दिष्टा दे° TD, TG. [4] तूष्णीं यज्ञे TG.
[5] यक्षिणा G. [6] सति Tg. [7] G om. [8] नानामन्त्राणां G. [9] प्रतिप्रग्र° C.
[10] गौतममिति D. [11] G om. वा. [12] °हमिति G. [13] °नुग्रहंतु G.

[a] Cf. PV. Br. 1, 8, 15. [b] Āpast. S'r. 14, 12, 5.

पूर्वं[1] नाराशंसं भक्षयित्वाहवनीये प्रस्तोता पृष्ठहोमं जुहुयाद्यत्पृष्ठं स्यात्तदादिश्य[2] "अदः[2] पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतमिमं[3] यज्ञमभिसंवसाना[4] होत्रास्तृप्यन्तु सुमनस्यमानाः[5] स्वाहा"[a] इति[6] पूर्वाम्[6] ॥ १ ॥

मरुत्वतीयशस्त्रानन्तरं प्रथमं[7] नाराशंसं[8] भक्षयित्वा तस्याप्यायनं च कृत्वा होतृमैत्रावरुणधिष्ण्ययोरन्तरेण पूर्वया द्वारा निष्क्रम्य दक्षिणेनाग्नीध्रीयमाहवनीयं[b] गत्वा[9] "अदः पिबतु" इति मन्त्रेण पृष्ठहोमं जुहुयात्[9]। तद्यथा। "रथन्तरं पिबतु सोम्यं" "बृहत्पिबतु सोम्यं" इत्यादि ॥

स्वाहाकारेणोत्तराम् ॥ २ ॥

केवलं स्वाहेति द्वितीयाहुतिः कार्येति ॥

द्वैधं जुहुयादिति धानंजय्यः ॥ ३ ॥

"अदः[10] पिबतु" इति मन्त्रं द्वेधा विभज्य जुहुयादित्यर्थः ॥ तं विभागमेवाह ॥

"अदः पिबतु सोम्यं[11] मध्वायुर्दधद्यज्ञपतावविहुतं[11] स्वाहा" इति पूर्वाम् ॥ ४ ॥

[1] पूर्वान् TG. [2] °दिश्यात् अदः Tg; °दिश्यान्दः TG. [3] °पदावबृहत° Tg; °पादावविहृत° TG; °हृत° G; TD corr. to °हुत°; D and C °हुत°. [4] °संवसन्य D; संवसानं Tg. [5] °नां D, TD, G. [6] Tg om. [7] °मां G; D om. [8] D om. [9] For गत्वा—जुहुयात् G substitutes गत्वार्द्धं पिबं द्वितीयमन्त्रेण पृष्ठहोमं जुहुयात्। यत्साम रथन्तरं बृहद्वा पृष्ठस्तुतिसाधनं स्यात् अदः पिबत्विति तदादिश्य जुहुयात्। [10] अतः G. [11] सोम्यमध्वर्य्युर्द्दधद्यज्ञपताविवविहृतं G (corr. to °हुतं); °पदावविहृतं TG; °पदावबृहुतं TG; °विहृतं TD, TG.

[a] Cf. RV. 10, 170, 1. SV. II, 6, 3, 5, 1. MS. 1, 2, 8. [b] Cf. 4, 2, 6.

"इमं यज्ञम" इत्युत्तरां होतृकपृष्ठेभ्य[1] इति ॥ ५ ॥

"इमं यज्ञं" इति मन्त्रखण्डेनोत्तरां[2] जुहुयात्। होतृकपृष्ठेभ्यो[3] वामदेव्यादिभ्य इति होतृकैर्मैत्रावरुणादिभिर्वामदेव्यादीनामनुशंसनाद्धोतृकपृष्ठव्यपदेशः[4]। चत्वारि हि[5] पृष्ठसामानि। होतुः पृष्ठं प्रथममिति ॥

"रेवतीषु[6] वारवन्तीयम्" इति षष्ठे पृष्ठादेशं गौतमः ॥ ६ ॥

पृष्ठ्यषडहस्य षष्ठेऽहनि "रेवतीषु वारवन्तीयं पृष्ठं भवति"[a] इति ब्राह्मणं। तत्र "रेवतीषु वारवन्तीयं पिबतु" इति पृष्ठादेशः कार्यः। ननु च। "वारवन्तीयं पिबतु" इति साममात्रमादेष्टव्यं[7]। किमर्थं रेवतीष्वित्यृचामादेशः[8] क्रियते। उच्यते। नैवायमृगादेशः किंतु सामादेश[9] एवायं निमित्तसप्तमी चेयं[10]। रेवतीसाम्नि निमित्ते[11] रेवतीसामार्थं वारवन्तीयं पिबत्वित्यर्थः। कुत एतत्। वारवन्तीयमेव[12] पृष्ठं तत् किमन्यार्थमिति[13]। नैवं[12]। रेवतीसाम्न[14] एव[14] पृष्ठत्वात्। तथा च रथंतरादिपृष्ठसाम्नां सृष्टिवर्णने "स रेवतीरसृजत तद्वां घोषोऽन्वसृज्यत"[b] इति ब्राह्मणं रेवतीनामेव[15] पृष्ठत्वमाह[15]। तथा निदानकारेणापि योनिद्वारेण रेवतीनामेव[16] पृष्ठत्वमिति वर्णितं। केनचित्तु[17] दोषेण पृष्ठस्थानात्प्रच्याव्य[18] पवमाने स्थापिताः "आपो वै रेवत्यस्ता यत्पृष्ठं कुर्युरपशुर्यजमानः स्यात्तस्मात्पवमाने कुर्वन्ति"[c] इति ब्राह्मणेन[19] पवमानस्थिता[20] अपि योनिद्वारेण[21] पृष्ठकार्यं[21] कुर्वन्तीति[22]। यथा राजा स्वयमसंनिहित[23] एव स्वकीयैः पुरुषैर्लोकरक्षणं[24] करोति गृह्णाति च निर्वेशं[25]। तद्वत्तेन[25] वारवन्तीयद्वारेण "रेवत्यः पिबन्तु" इत्यादेशस्यार्थ[26] इति ॥

"महाव्रतम्" इति व्रते ॥ ७ ॥

महाव्रते[27]ऽहनि "महाव्रतं पिबतु" इत्यादेशः। गायत्रबृहद्रथंतरराजनानां[28] समुदायो महाव्रतमिति ॥

[1] होत्रपृष्ठे TG; होतृहपृ॰ Tg. [2] उत्तरखण्डेनोत्त॰ G. [3] होत्रक॰ D. [4] ॰द्धोत्र॰ D; ॰द्धोतृकपृष्ठे व्य॰ C; द्धोतृकस्य पृ॰ G. [5] D om.; G reads भिः; C हि भि. [6] मेव॰ G. [7] सममत्र समादे॰ G. [8] रेवतीष्वानृचमा॰ G. [9] समादेश G. [10] वेयं G. [11] ॰त्तं D. [12] For वारवन्ती॰—नैवं G substitutes षष्ठे हनि. [13] ॰र्थमपीति C. [14] रेवतीसाम्नाविव G. [15] G om. [16] G om. एव. [17] केचित्तु G. [18] पृष्ठ्यात्प्राच्याव्य G; ॰त्प्रव्याव्य C. [19] G om. [20] ॰ने स्थित्वा G. [21] स्तोत्रीयमुखेनापृष्ठकार्यं G. [22] G om. इति. [23] स्वयं संनि॰ G. [24] ॰लक्षणं G. [25] निर्वेशमा तेन G. [26] पिबत्वि॰ MSS. [27] G om. महा. [28] ॰द्रथंतरभद्रा॰ C.

[a] PV. Br. 13, 10, 4. [b] PV. Br. 7, 8, 13. [c] PV. Br. 13, 9, 16.

रेवत्यश्च वारवन्तीयं चेति[1] धानंजय्यः ॥ ८ ॥

यद्यपि रेवतीसामैव[2] स्वयोनिमुखेन पृष्ठं । तथाऽपि वारवन्तीयमपि साक्षात्तत्र भवतीति द्वयमप्यादेष्टव्यमिति ॥

यावन्ति पृष्ठस्थानानि[3] स्युः सर्वाण्येव प्रसंचक्षीत ॥ ९ ॥

यावन्ति पृष्ठस्तुतौ सामानि भवन्ति । तानि सर्वाणि स्वरूपेणैव[4] निर्दिशेत् । यथाऽप्तोर्यामे गर्भकारस्तवने "इन्द्रदेराजे पिबतां" इति ॥

"पिबतु" "दधत्"[5] इति[5] च यथार्थमूहेत् ॥ १० ॥

"पिबतां"[6] "पिबन्तु"[7] "दधतौ" "दधन्ति" इति ॥

बृहता रथंतरेण वा स्तोष्यमाणः प्राक्स्तोमयोगाद्दश व्याहृतीर्मनसा ध्यायेत् "ऐरम्"[a] इति ॥ ११ ॥

"ऐरं इन्द्रदेवं रथंतरं" इत्यादि "असौ वै लोको इन्द्रदयं रथंतरं" इत्येवमन्तं ब्राह्मणपठिता[8] दश व्याहृतयः। तत्र रथंतरस्य पञ्च व्याहृतयो इहतः पञ्च। उभयोरपि व्यतिषक्तास्ताः सर्वा अप्युभयोर्गाने[9] मनसा ध्यायेदिति ॥

रथंतरमेवर्चं "यस्ते गोषु"[b] इति ॥ १२ ॥

"यस्ते गोषु" इत्यृचं रथंतरगान एव व्याहृत्यनन्तरं ब्रूयादिति ॥

युक्ता[10] स्तोममेतद्ब्रूयादिति शाण्डिल्य[11] ऋचं पूर्वं व्याहृतिभ्य[12] इति[11] ॥ १३ ॥

स्तोमयोगानन्तरं "यस्ते गोषु" इत्येतद्ब्रूयात्। तत्रापि व्याहृतिभ्यः[13] पूर्वमेवर्चं ब्रूयात्। तत उत्तरं व्याहृतीर्मनसैवेति[14] शाण्डिल्य इति ॥

[1] चेदिति TG. [2] °साममेव D, C. [3] °स्थानि G, Tg, R 1; R 2 corr. to °स्थानानि. [4] G ins. अप्तोर्यामादौ. [5] तदिति TG; दधति Tg. [6] G om. [7] °तु MSS. [8] °तं G. [9] D adds न in marg.; G ins. प्रत्येकं. [10] उक्त्वा Tg. [11] G om. शाण्डिल्य—इति. [12] °तीभ्य TD, TG, Tg. [13] °तीभ्यः D. [14] °तीभिर्मनसो वेति G.

[a] PV. Br. 7, 6, 17. [b] PV. Br. 7, 7, 19.

इतरद्धानंजय्यः[1] ॥ १४ ॥

इतरत्पूर्वोक्तं धानंजय्यस्य मतमिति ॥

रथंतरे प्रस्तूयमाने[2] सर्वत्र संमीलेत्[3] ॥ १५ ॥

सर्वास्वपि स्तोत्रीयासु रथंतरप्रस्तावे संमीलनमुद्गात्रा कार्यं । "स्वर्दृशं प्रतिवीक्षेत"[a] इति ब्राह्मणात् । प्रथमायामेवर्चि[4] संमीलनं स्यादित्याशङ्क्य तन्निवृत्त्यर्थं सर्वत्रेति वचनमिति ॥

एकैकं मनसाऽक्षरं स्तोभैर्वाचा युगपत्संयुञ्ज्याद्भकारादिभिरकारान्तैरक्रान्तैः[5] प्रथमस्वरैरुत्तमो[6] द्वितीयस्वरः प्राक्प्रतिहाराच्चतुरक्षरं शिष्ट्वा ॥ १६ ॥

प्रस्तावानन्तरमार्चिकमेकैकमक्षरं[7] मनसा स्मरन्[8] तत्तत्स्थाने[8] वाचोच्चार्यमाणैः स्तोभैर्युगपदेव संयुञ्ज्यात्[9] । कीदृशैः स्तोभैरित्याह । भकारादिभिरकारान्तैरिति[10] । भ भेत्येवंरूपैः । अक्रान्तैः[11] असंक्रान्तैः[12] अविलम्बितैरित्यर्थः । कुतः पुनर्विलम्बाशङ्का[13] । रथंतरमधिकृत्य[14] "अक्षरेणाक्षरेण[14] प्रतिष्ठापयतोद्गेयं"[b] इति सामान्यवचनात्[15] प्रत्यक्षरं प्रतिष्ठाप्य गाने[16] विलम्बः स्यात् । तन्निवृत्त्यर्थमक्रान्तैरिति वचनं । तेषामुत्तमः स्तोभो द्वितीयस्वरः । अन्ये[17] प्रथमस्वराः । प्राक्प्रतिहारभक्तेश्चतुरक्षरं[18] शिष्ट्वा ततः पूर्वमेव स्तोभप्रयोग इति ॥

तत्सर्वत्र प्रतिवीक्षेत ॥ १७ ॥

चतुरक्षरं[19] गीयमानं प्रतिवीक्षेत । तदानीं संमीलनं[20] न कार्यमित्यर्थः । "स्वर्दृशं प्रतिवीक्षेत" इत्युपलक्षणमिति दर्शयितुं सर्वत्रेति वचनमिति ॥

[1] °य्यम् C, D; इतरन्धा° G, TG. [2] °स्तू° TG. [3] लयेत् TG. [4] °र्चा D, C. [5] °रान्ताभिराक्रान्तैः G. [6] °रो D. [7] प्रस्तरानंतर° C; प्रस्तावनान्तर° G. [8] संरक्तस्थाने G. [9] संमृज्यात् C. [10] G om. अकारान्तैः. [11] आ° G. [12] G om. [13] विलंबशंका G. [14] रथन्तरास्तुत्याक्षरे° G. [15] साम्यवचनात् G. [16] गामे C. [17] अन्यैः G. [18] °भक्ते च° D. [19] तच्चतु° G. [20] °ने G.

[a] PV. Br. 7, 7, 15.   [b] PV. Br. 7, 7, 13.

स्तुत्वा वरं चोदयेत् ॥ १८ ॥

रथंतरेण स्तुत्वा यजमानं वरं चोदयेत् "वरो मे देयः" इति[1] ॥

तस्यापृष्ठस्य सतो निवर्तेरन्धर्माः सह स्तोभैरिति[2] गौतमः ॥ १९ ॥

तस्य रथंतरस्य[3] पृष्ठादन्यत्र पवमानादौ स्थितस्य स्तोभैः सह धर्माः पृष्ठहोमादयो[a] वरचोदनान्ता न कार्याः । तथा ब्राह्मणोक्ताश्च धर्माः "वागित्यादेयं"[4 b] "क्षिप्रं गेयं"[c] इत्येवमादयो न स्युरिति ॥

स्तोभा एवान्वियुरिति[5] धानंजय्यः ॥ २० ॥

पृष्ठादन्यत्र स्तोभा एव प्रवर्तेरन् । अन्ये[6] निवर्तेरन्निति धानंजय्य इति ॥

अग्निष्टोमसंधिषाम्णोरेवापृष्ठं[7] स्तोभेदिति शाण्डिल्यः ॥ २१ ॥

अपृष्ठभूतं[8] रथंतरमग्निष्टोमसंधिस्तोत्रयोरेव[8] स्तोभेत् । न पवमानगतमिति शाण्डिल्य इति ॥

सर्वत्रास्वस्तोचीयं[9] न स्तोभेदिति स्थविरो गौतमः ॥ २२ ॥

सर्वत्र पृष्ठस्थाने ततोऽन्यत्रापि स्वस्तोचीयविधुरं[10] रथंतरं न स्तोभेदिति स्थविरो गौतमः । तन्मते "कया नश्चित्र आभुवत्" इत्येतासु पृष्ठस्थाने[11]ऽपि[12] रथंतरस्य स्तोभनिवृत्तिरिति ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ८ ॥

[1] G has only वरो मे देयमिति (!). [2] स्तोभैनेति G. [3] G om. [4] ०गेयं G. [5] ०न्वीयु० D, TD. [6] इतरे G. [7] ०ष्टोमसामसंधिषाम्णोरेवमपृष्ठं TG, G; Tg also inserts साम. [8] अत्र पृष्ठभुतंमग्निष्टोमरथन्तरमग्नि० G; अपृष्टभुतं रथंतरंमग्निष्ठोमरथंतरं स्तोत्र० C. [9] ०त्रासुस्तोचियिरण् TG; ०स्तोचीया G. [10] स्वस्तोचीयासु G. [11] ०स्था G. [12] G om.

[a] Cf. 6, 1, 1. [b] PV. Br. 7, 7, 9. [c] PV. Br. 7, 7, 12.

वामदेव्येन स्तोष्यमाणः[1] प्राक्स्तोमयोगात् "गावो ऽश्वा[2] अजावयो व्रीहयो यवाः" इति मनसा ध्यायेत् ॥ १ ॥

वामदेव्येन स्तोष्यमाणो "गावो ऽश्वाः" इति मन्त्रं मनसा ध्यायेत्। अत्र "अनिरुक्तं गेयं"[a] इति ब्राह्मणं। तत् "कया नश्चित्र आभुवत्" इति स्तोत्रीयस्यानिरुक्तदेवता[3] ऽस्य[3] प्रशंसार्थं[3]। तद्व्यतिरिक्तानि त्रीण्यपि पृष्ठस्तोत्रीयाणि[4] निरुक्तानि। तेषु प्रत्यक्षमिन्द्रपदश्रवणात्। तलवकारस्तु[5] गायत्रसामवत्। प्रणवेनैवानिरुक्तं वामदेव्यं गेयमित्याहुरिति[6] ॥

ब्रह्मसाम्नि यः कामो यजमानस्य स्यात्स "सिध्यतु" इति ध्यायन्नुपासीत ॥ २ ॥

ब्राह्मणाच्छंसी यत्सामानुशंसति। तद्ब्रह्मसाम[7]। तृतीयं पृष्ठं नौधसश्यैतादीति[8]। तस्मिन्गीयमाने यजमानः स्वाभिलषितं[9] "सिध्यतु" इत्युपासीतेति ॥

तथेतर उद्गायन् ॥ ३ ॥

इतरो[10] ऽप्युद्गाता[10] तथैवोपासीतेति ॥

आर्भवेण स्तुत्वा पुरोडाशादेकैकं पिण्डं त्रींस्त्रीन्वा ऽपरया द्वारा हविर्धानं प्रपद्याधस्तात्स्वस्य चमसस्य कुर्युर्यदासन्नः स्यात् "अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्"[b] इति ॥ ४ ॥

तृतीयसवन आर्भवेण[11] पवमानेन[11] स्तुत्वा नाराशंससादनादनन्तरमुत्थाय[12] पुरो-

[1] °णाः Tg. [2] अश्वो Tg. [3] °स्यं निरुक्तस्य वदेतस्य प्रशंसनार्थं G. [4] °स्तोत्राणि G.
[5] तल्लव° C. [6] G om. गेयं. [7] °म्नि G. [8] °तादिति D; °तादि G; °तमिति C.
[9] सर्वाभि° G. [10] इतरावप्यु° G. [11] आर्भवे पवमाने G. [12] °सादनानन्तर° G.

[a] PV. Br. 7, 9, 17. [b] Mantrabr. 2, 3, 6. VS. 2, 31. Gobh. Gr. 4, 3, 11. Āśv. Śr. 2, 7, 1. Cf. Drāhy. 7, 2, 13.

डाग्रादेकैकं शकलं[1] चीर्स्त्वोत्वा गृहीत्वाऽपरया द्वारा हविर्धानं प्रविश्य स्वस्य चमसस्याधस्तान्निवपेयुः। यदाऽसन्नः[2] स्यादिति। यदा[3] स्त्रीयश्चमसो भक्षणानन्तरं सन्नः[4] सादितः स्यात्। तदेत्यर्थः॥

तमाह्रियमाणं प्रतिमन्त्रयेरन्[5] "अमीमदन्त पितरो यथाभागमावृषायिषत"[a] इति॥ ५॥

तं नाराशंसं स्वीयं चमसं भक्षायाह्रियमाणमित्यर्थः[6]॥

सौम्यमाहृतमुद्गाताऽवेक्षेत "आयुर्मे प्राणे"[b] इति॥ ६॥

सौम्यं चरुमध्वर्युभिराहृतमिति॥

"पुनरस्मासु दधमसि" इत्यन्तः[7]॥ ७॥

"आयुर्मे प्राणे" इत्यस्य मन्त्रस्य "पुनरस्मासु दधमसि" इत्यवसानं। ननु किमर्थं मन्त्रान्तोपादानं। उत्तरसूत्रे[c] तच्छब्देन[8] तत्परामर्शार्थं। किं च। अनुक्ते मन्त्रान्ते "एनाह्वाजिं" इत्युत्तरमन्त्रोपादानात्ततः प्राक्सर्वमेको[9] मन्त्रः[9] स्यात्[9]। तन्निवृत्त्यर्थं वचनं। ननु एवं "यन्मे यमं वैवस्वतं"[d] इत्युत्तरमन्त्राम्नानं[10]। किमर्थं। उच्यते। "यन्मे मनो यमं गतं"[b] इति पूर्वेण मन्त्रेण सह तुल्यार्थत्वादिकल्पते। आम्नानबलादित्यभिप्रायः[11]॥

तं दशमेऽहन्यभ्यस्येत्[12]॥ ८॥

तं "पुनरस्मासु दधमसि" इति मन्त्रान्तं दशमेऽहन्यभ्यस्येत्। प्रत्यक्षानुष्टुप्त्वनिवृत्त्यर्थं[13]। दशमेऽहनि परोक्षमनुष्टुभमुपयन्ति। "यत्प्रत्यक्षमुपेयुः प्रजापतिमृच्छेयुः"[e] इति ब्राह्मणात्प्रत्यक्षानुष्टुभो वर्जनीया इति॥

[1] G om. [2] यथासन्न G. [3] यथा G. [4] आसन्नः G; C ins. स्यात्. [5] अनुमन्त्रये° TG.
[6] भक्षणाया° G. [7] °न्तं C. [8] तस्य शब्देन G. [9] °मेकमंत्रस्य D. [10] °मात्राम्नानं C.
[11] °बलादिभिरित्य° G. [12] °स्येयुः Tg. [13] °ष्टुप् नि° G.

[a] Mantrabr. 2, 3, 7. VS. 2, 31. Gobh. Gr. 4, 3, 12. Āśv. S'r. 2, 7, 4. Cf. Drāhy. 7, 2, 14.
[b] PV. Br. 1, 5, 17. [c] 6, 2, 11. [d] PV. Br. 1, 5, 18. [e] PV. Br. 4, 8, 9.

यन्मे मादेः[1] [a] स्थाने[2] "यन्मे यमम्"[b] इत्येके ॥ ९ ॥

दशमेऽहनीत्यनुवर्तते । दशमेऽहनि "यन्मे मनो यमं गतं" इति पूर्वमन्त्रस्य स्थाने "यन्मे यमं वैवस्वतं" इत्येवं[3] कुर्यात् । न विकल्पः कार्य इत्येके । कुतः । उत्तरो हि[4] मन्त्रः स्वरूपत एवानुष्टुब्न भवति पञ्चपदत्वात् । पूर्वस्तु स्वरूपतोऽनुष्टुप् । स किमर्थमभ्यासेनान्यथाकृत्य[5] प्रयुज्यत इति ॥

पूर्वेण त्वेवावेक्षेत ॥ १० ॥

तुशब्दः पूर्वमतनिरासार्थः । एवकारो भिन्नक्रमः । दशमेऽहनि पूर्वयाऽनुष्टुभाऽप्यवेक्षणं विकल्पेन कार्यमेवेत्यर्थः । कुतः । तस्मिन्नहनि दधिघर्मभक्षणादावभ्यासेनैव प्रत्यक्षानुष्टुभं[c] परिहृत्य प्रयोगदर्शनादिति ॥

तस्मिन्नङ्गुली[6] अवधायाङ्गुष्ठानामिके[7] इत्येके[7] ऽक्षिणी[7] विमृजीत "येनाह्वाजिम्"[d] इति ॥ ११ ॥

तस्मिन् सौम्ये[8] चरौ द्वे[9] अङ्गुली वाऽङ्गुष्ठानामिके वाऽवधाय ताभ्यामक्षिणी विमृजीतेति ॥

एवमितरौ कुर्यातां प्रतिहर्ता पश्चात् ॥ १२ ॥

अवेक्षणमक्षिविमार्जनं[10] च[11] कुर्यातामिति ॥

तमुत्तरेण प्रतिहर्तारं हरेयुः ॥ १३ ॥

तं सौम्यं चरुं प्रतिहर्तारमुत्तरेण हरेयुरिति ॥

द्रव्येप्सुर्भुञ्जीतैनं गच्छत्यन्यतरां रोगार्तो[12] वा[13] ऽहतेन[13] वाससा प्रच्छाद्य[14] दक्षिणार्धं सदसो गत्वा ॥ १४ ॥

यद्यर्थलिप्सुरुद्गाता स्यात् । तदैव चरुं भुञ्जीत रोगार्तो वा भुञ्जीत । अन्यतरामसौ

[1] आदे C. [2] G and Tg om. यन्मे मादेः स्थाने (as in Lāṭy.). [3] °त्येवमेव G. [4] भि D. [5] G om. अर्थ. [6] °लीन् Tg. [7] °के इत्येतेनाक्षिणो TG; °केत्येके अक्षणी Tg; °केत्येकेऽक्षिणी G. [8] सोम्ये D; सोमे C. [9] द्वौ G. [10] °क्षिणीवि° C. [11] C om. [12] चात्गातो G. [13] व आहतेन Tg. [14] TD om. प्र.

[a] PV. Br. 1, 5, 17. [b] PV. Br. 1, 5, 18. [c] Cf. 5, 3, 11. 12, and Comm. [d] PV. Br. 1, 5, 19.

गतिं गच्छति। अरोगो[1] वा स्यात् म्रियेत वा न पुनर्व्याधिनाऽभिभूयत इत्यर्थः। उभयोरपि सदसो दक्षिणार्धं गत्वाऽहतेन वाससा प्रच्छाद्य भोजनं यथाऽन्यो न पश्येदिति[2] ॥

यज्ञायज्ञीयस्य[3] हिङ्कारं[4] प्रति पत्नीमुद्गातेक्षेत[5] ॥ १५ ॥

अथ[6] यज्ञायज्ञीयस्तुतिकाले सामावयवभूतं हिङ्कारं प्रति पत्नीमुद्गातेक्षेत[6]। न पुनः पर्यायादिभूतं हिङ्कारं प्रति। कुत एतत्। "हिङ्कारं प्रति संख्यापयन्ति" "आ द्वितीयायाः संख्यापयन्ति"[a] इति ब्राह्मणे तिसृषु स्तोत्रीयासु तत्र[7] हिङ्कारे वीक्षणविधानात्। यद्येवं तेनैव सिद्धे किमर्थं सूत्रं। उच्यते। "उद्गात्रा संख्यापयन्ति"[b] इति ब्राह्मणमध्वर्यूणामवेक्षणं प्रतिप्रयोजकव्यापारं[8] विधत्त[8] इति गम्यते। तन्मा भूदिति सूत्रं न प्रयोजकव्यापारविधौ तात्पर्यं किं तूद्गातुरवेक्षणमिति[9] भावः ॥

निधनं प्रति पत्नी दक्षिणमूरुमभिषिञ्चेत[c] ॥ १६ ॥

स्पष्टमिति ॥

तृतीयायां स्तोत्रीयायां प्रस्तुतायां सर्वं तदुदकं निनयेत् ॥ १७ ॥

प्रथमे पर्याये "यज्ञा यज्ञा वो अग्नये"[d] इत्यस्या ऋचस्तृतीयाभ्यास[10] इत्यर्थः ॥

उत्तमायां स्तोत्रीयायां[11] "भुवद्वाजायि भुवद्वाजेषु"[e] इत्यभ्यस्येत "नाम्" इति च निधनम् "अनुष्टुभमुत्तमाम्"[f] "अक्षरेणान्ततः"[g] इति ह्याहेति ॥ १८ ॥

एकविंशतिकृत्वो यज्ञायज्ञीयमभ्यस्यते। तत्रोत्तमेऽभ्यासे "भुवद्वाजा" इति चतुरक्षरमभ्यस्येत्। अनुष्टुप्सिद्ध्यर्थं[12]। तथा "उत त्राता तनूनां" इत्यृगन्तमक्षरं[13] "नां" इत्येतन्निधनं[13] कुर्यात्। न पुनर्यथाधीतं वाङ्निधनं। उभयत्रापि प्रमाणमाह। "अनुष्टुभमुत्तमां

[1] अरोगा C; आरोगो D. [2] In G the Comm. runs somewhat differently: यदि द्रव्येप्सुरुत्गाता स्यात्तदिदं चरुं भुंजीत अन्यतरां यां कांचित् समृद्धिं प्राप्नोति स रोगार्त्तो वा भुंजीत अरोगो भवति उभयोरदसो दक्षिणार्धे गत्वाहतेन वाससा etc. [3] C ins. वानु. [4] भिंकारं TD. [5] °ता वेक्षेत Tg, TD. [6] G om. अथ—°क्षेत. [7] G repeats तत्र. [8] प्रतियोजनकं व्यापारं धत्त G. [9] °क्षण इति D; °तुरेव दक्षिणविधान इति G. [10] °तीयायाभ्यास C. [11] Tg om. [12] °ष्ट्वसिद्ध्यर्थं G. [13] °गन्त्यक्षराणामित्ये° G.

[a] PV. Br. 8, 7, 13. 14. [b] PV. Br. 8, 7, 12. [c] Cf. PV. Br. 8, 7, 10.
[d] RV. 6, 48, 1. SV. I, 1, 4, 1; II, 1, 1, 20, 1. PV. Br. 8, 6, 5. 6. 8, 7, 1. 11, 5, 2.
[e] RV. 6, 48, 2. SV. II, 1, 1, 20, 2. [f] PV. Br. 8, 7, 2. [g] PV. Br. 8, 6, 13.

संपादयति"। "अक्षरेणान्ततः प्रतिष्ठाप्यं" इति ब्राह्मणमाहेति[1]। "इतो वै प्रातरूर्ध्वानि छन्दांसि"[a] इत्यारभ्य "अनुष्टुभमुत्तमां संपादयति" इति ब्राह्मणं। तस्यायमर्थः। "गायत्रं प्रातःसवनं त्रैष्टुभं माध्यन्दिनं सवनं जागतं तृतीयसवनं"[b] इति। एवं[2] प्रातःसवनमारभ्यारूढानां[2] छन्दसां यज्ञायज्ञीयस्तोत्रे[3] प्रथमायामृचि प्रत्यवरोहादुत्तमायां[4] चानुष्टुप्संपादनादस्मिंल्लोके यजमानः प्रतिष्ठितो भवति। इतरथा छन्दसामारोहात्स्वर्ग[4] एव स्थितः स्यात्। नेमं लोकमागच्छेदिति[5]। तथा "यस्य[6] वै[6] यज्ञा वागन्ता भवन्ति" इत्युपक्रम्य "अक्षरेणान्ततः प्रतिष्ठाप्यं" इत्येवमन्तं ब्राह्मणं। तस्यायमर्थः। यज्ञायज्ञीयस्य वाग्विधनत्वात्तदन्तः[7] क्रतुर्वागन्तो भवेत्। तदानीमनृतवदनाद्यज्ञो[8] नश्येत्। किं पुनरनृतं। गकाररहितवाक्शब्दस्य[9] प्रयोगः। वागिति[10] प्रयोक्तव्ये गकाररहितं वाक्शब्दं प्रयुञ्जानः शब्दानृतं करोति[c]। तथा च किमनृतं किमक्षरमिति प्रस्तुत्य निदानकारः। गकारलोपं ब्राह्मणं क्षिपतीति[11]। तत्परिहारार्थं[12] वागिति कृत्स्नमेवाक्षरमन्ततः कार्यमित्येके। सूत्रकारस्तु आर्चिकमेवान्त्यमक्षरमक्षरेणेत्युक्तं मन्यते। "अष्टाक्षरेण प्रथमाया ऋचः प्रस्तौति"[d] इत्यादावक्षरशब्दस्यार्चिकविषयत्वादिति॥

अनभ्यासं त्वाचार्याः॥ १९॥

तुशब्दः पक्षनिवृत्त्यर्थः। अभ्यासमकृत्वा[13] यथाधीतमेव गायेत्। कुतः। "अनुष्टुभं" इत्येतद्ब्राह्मणं[14] "यज्ञा यज्ञा वो अग्नये" इत्येतामृचं स्वरूपतो बृहतीमनुष्टुभं कृत्वा प्रशंसति। तथा हि। "यज्ञा वो अग्नये गिरा च दक्ष इति द्वादशाक्षरं"[e] इत्यादिना "यज्ञा गिरा प्र"[15] इत्यक्षरपञ्चकं[15] केवलमभ्यस्यते नाक्षरान्तराण्यधिकानीति। अनुष्टुभेवेयमिति प्रशंसा क्रियते। यद्यप्येकमक्षरमूनं। तथाऽपि "न वा एकेनाक्षरेण[16] छन्दांसि वियन्ति न द्वाभ्यां"[f] इति श्रुतेः। अनुष्टुभेवेयमिति। अथ वा वागिति निधनाक्षरेण सह

[1] ब्राह्मणादिशदिति G. [2] एवमारूढानां G. [3] °यीयस्य स्तोत्रे G. [4] प्रत्यवरोहात स्वर्ग G (om. उत्तमायां—छन्दसामारोहात्). [5] °च्छेयुरिति C. [6] यज्ञस्य D. [7] °धनत्वात ततः G. [8] °वदनान्यज्ञो G. [9] °रहितस्य वा° G; रहितं वा° C. [10] C ins. तत्परिहारार्थं वागिति कृत्स्नमेवाक्षर. [11] क्षिप्रगति G. [12] G om. तत्. [13] °सं कृत्वा G. [14] अनुष्टुभमुत्तमामि° G. [15] प्रत्यक्षपंचकं G. [16] एतेना° G.

[a] PV. Br. 8, 7, 1. [b] PV. Br. 7, 4, 6. [c] Cf. PV. Br. 8, 6, 13, and Sāyaṇa's Comm. [d] PV. Br. 7, 7, 1. [e] PV. Br. 8, 7, 1. [f] Ait. Br. 1, 6, 2.

द्वात्रिंशदक्षरा । तथा च निदानकारः । कथं द्वादशस्तोत्रेष्वानुष्टुभो[1] भागः[2] स्यादित्युपक्रम्याह यथैतद्ब्राह्मणं[a] द्वादशाक्षरमेकादशाक्षरमष्टाक्षरं[3] वा द्वात्रिंशेति । उत्तमामित्यस्यायमर्थः । द्वादशस्तोत्रेषूत्तमस्तोत्रगतं । "यज्ञा[4] वो अग्नये" इत्येतामृचमिति ॥

निधनं च[5] यथाम्नायं शाण्डिल्यः ॥ २० ॥

निधनमपि यथाधीतमेवेति शाण्डिल्यः । "अक्षरेणान्ततः प्रतिष्ठाप्यं" इत्यत्राक्षरशब्दस्वरमाह । अष्टाक्षरं द्वादशाक्षरमित्यादौ स्वरैरेवाक्षरगणनात् । तेनायमर्थः । यद्यपि वागिति प्रयोक्तव्ये गकारलोपादनृतापत्तिः[6] । तथा[7] ऽप्याकारेणाक्षरेण[8] समापनान्नाशौ[8] दोष इति । यथा[9] इडानिधने[10] सामन्यर्धेडाप्रयोगे[11][b] सर्वथा[12] ऽनृतपरिहारो[12] नास्ति व्यञ्जनेन समापनात् । नैवं तत्र[13] स्वरेण समापनादिति । यथाधीतमेव निधनं ब्राह्मणमभिनिन्दतीति । तथा च निदानकारः । स्वरतन्त्राण्यक्षराणि[14] भवन्ति स्वरान्ततामेवाक्षरस्येत्येतद्ब्राह्मणमेवमवोचदिति[15] ॥

तद्यदा[16] ऽनुशंसन्[17] होतापोहिष्ठीयां ब्रूयात्तदेनमन्वालभेरन्नपावृत्वानाः ॥ २१ ॥

यज्ञायज्ञीयं स्तोत्रमनुशंसन् होता यदापोहिष्ठीयां शंसति । तदा तमन्वालभेरन् शिरःप्रावरणमपावृत्योद्गातारः[18] । ततः पूर्वं स्तोत्रोपाकरणप्रभृति कर्णवर्जं शिरो वेष्टयितव्यं । "आ कर्णाभ्यां प्रावृत्यं"[c] इति वचनादिति ॥

अन्यस्थानगतस्य[19] सतो निवर्तेरन्धर्माः ॥ २२ ॥

अग्निष्टोमस्तोत्रादन्यत्र पवमानादौ गतस्य यज्ञायज्ञीयस्य शिरःप्रावरणादयो धर्मा निवर्तेरन् । स्तोत्रप्रयुक्ता धर्मा न सामप्रयुक्ता इत्यर्थः ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ १० ॥

[1] द्वात्रिंशत्स्तोत्रे अनुष्टुभो G; अनु॰ C. [2] वाग C. [3] ॰ष्टादशाक्षरं G. [4] G repeats यज्ञा. [5] G om. [6] ॰नृतोक्तिः. [7] पथा G. [8] ॰णासमाप॰ D; ॰ण स्वरेण समाप॰ G. [9] तथा G. [10] इतोत निधने G. [11] सामान्यर्थे सांप्रयोगे G. [12] सर्वानृतप॰ G. [13] मंत्र C, D. [14] स्वतन्त्रा॰ C, D. [15] ॰क्षरस्येस्येत्यत्रा॰ D; ॰क्षरमस्येप्सित् । ब्रा॰ G; G om. एवं. [16] ॰था TG, Tg. [17] नुशंसां G; rest of the Sūtra and beginning of Comm. missing. [18] ॰वरणानि अपा॰ G; ॰वरणापा॰ D; ॰वरणामवा॰ C. [19] अन्यतस्था॰ C, R 1.

[a] Cf. PV. Br. 8, 7, 1. [b] Cf. 21, 1, 4. [c] PV. Br. 8, 7, 7.

यदन्यदग्निष्टोमसाम स्यात्तस्य स्युः ॥ १ ॥

यत्र[1] यज्ञायज्ञीयादन्यद्बृहदाद्यग्निष्टोमसाम स्यात् । तस्यापि पत्न्यवेक्षणशिरःप्रावरणादिधर्माः स्युरिति ॥

अहिङ्कारेऽपि[2] प्रतिहारवेलायां पत्नीमुद्गातेक्षेत[3] ॥ २ ॥

तत्र[4] हिङ्काराभावेऽपि तत्तत्साम्नः प्रतिहारवेलायां पत्न्यवेक्षणं । सत्यपि हिङ्कारे तमनादृत्य[5] प्रतिहारवेलायामवेक्षणं[6] प्रतिहारवेलायामिति वचनादिति ॥

अनु ब्राह्मणमार्चिकान्संनामान्सर्वत्र[7] कुर्युरप्यन्यस्मिन्साम्नि[8] ॥ ३ ॥

"ऐरं कृत्वोद्गेयं" "पर्श्रीं वयमिति वक्तव्यं" "सुश्रंसिषमिति वक्तव्यं"[a] इत्येवमादिनार्चिकान्संनामान्यथाब्राह्मणं कुर्युः । सर्वत्रेति वचनं रथंतरादावपि[9] "अस्युष[9] इति वक्तव्यं सुस्युष[10] इति वा"[b] इत्यादि ब्राह्मणोक्तविकारपरिग्रहार्थं । अप्यन्यस्मिन्साम्नीति[11] । पृष्ठस्थाने[11]ऽग्निष्टोमस्थाने च[12] यद्यपि रथंतरादेरन्यत्साम[13] स्यात् । तदाऽपि विकारसिद्ध्यर्थं तेनाग्निष्टोमस्तोत्रे "यज्ञा यज्ञा वो अग्नये" इत्यत्र सामान्तरगानेऽप्यार्चिकसंनामसिद्धिः । स्थानप्रयुक्तः संनामो[14] न[14] सामप्रयुक्त इत्युक्तं भवतीति ॥

तृतीयसवने सर्वेषु स्तोत्रेषु समाप्तेषु भक्षयित्वा स्तोमं विमुञ्चेयुः "ऋतस्य त्वा"[c] इति[15] ॥ ४ ॥

तृतीयसवने सर्वस्तोत्रेषु समाप्तेषु सोमभक्षणानन्तरं स्तोमविमोचनं कुर्युः । "ऋतस्य त्वा" इति मन्त्रजप एव स्तोमविमोचकः । तत्र " विमुञ्चामि" इति पदसमन्वयादिति ॥

[1] G om.; अत्र C. [2] TG om. [3] °तैक्षत TG; °तावेक्षेत Tg. [4] C om.
[5] °नावृत्य D; °नादृत्य C. [6] °यामिवेक्षणां D. [7] प्राणमा° G; °र्चिकानान्सं° Tg.
[8] कुर्यादप्य° TD. [9] °रादवस्युष G. [10] संस्युष G. [11] G reads अप्यन्यस्मिन् संस्थाने.
[12] G om. [13] G om. आदेः. [14] संनाम न (or संनाम्न ?) G. [15] G om. this Sūtra.

[a] PV. Br. 8, 6, 10. 11. 12. [b] PV. Br. 7, 7, 16. [c] PV. Br. 1, 6, 5.

दक्षिणैः पाणिभिः कुशाः संलोभयेयुः ॥ ५ ॥

स्तोमविमोचनानन्तरं[1] संलोभनं कुशानां समाहरणमेकीकरणं[2] । अनेनैतज्ज्ञायते प्रथमस्तोत्रे यत्रस्थाने[3] या[4] कुशा विहिता । सैव तत्रावधार्य स्तोत्रान्तरेऽपि प्रयोज्येति[a] ॥

प्रति योजनमेके[4] यजमानवाचनादनन्तरम् ॥ ६ ॥

प्रति स्तोमयोगं प्रति स्तोत्रमित्यर्थः । प्रति स्तोत्रं "स्तुतस्य स्तुतं"[b] इति यजमानवाचनादनन्तरं स्तोमविमोचनं कुशासंलोभनं च कुर्यादित्येक इति ॥

अच वा ॥ ७ ॥

यजमानवाचनादनन्तरमित्यनुवर्तते[5] । अत्र वा सर्वस्तोत्रसमाप्तौ[6] वा यजमानवाचनादनन्तरं सोमभक्षणात्पूर्वमेव द्वयमपि कुर्यादिति ॥

यजमानं वाचयेत् "तन्तवे मा ज्योतिषा" इति ॥ ८ ॥

तृतीयसवने संलोभनानन्तरं[7] "तन्तवे मा ज्योतिषा" इति यजमानं वाचयेदिति ॥

"असावनु मा तनुहि ज्योतिषा" इति यथाज्येष्ठं पुत्रान् ॥ ९ ॥

"असावनु मा तनुहि ज्योतिषा" इति यथाज्येष्ठं पुत्रानादिश्य यजमानं वाचयेत् । यथा "नारायणशर्मन्ननु मा तनुहि" इति ॥

"जनिष्यमाणाः" इत्यजातेषु[8] ॥ १० ॥

अजातेषु जनिष्यमाणेषु पुत्रेषु "जनिष्यमाणा अनु मा तनुत[9] ज्योतिषा" इति बहुवचनं कृत्वा वाचयेदिति ॥

जातेष्वजातेषु[10] च[10] "पुत्राः" इत्येव[11] सत्त्वेषु ॥ ११ ॥

सत्त्वविषये जातेषु जनिष्यमानेषु च "पुत्रा अनु मा तनुत ज्योतिषा" इति तन्त्रेण सकृद्वाचयेत् । न यथाज्येष्ठं पृथक्पृथगिति ॥

[1] For these words G substitutes सर्वेषु स्तोत्रेष्वित्यनुवर्तते. [2] G om. एकीकरणं. [3] यत्रस्थानीया C. [4] प्रयो° G. [5] °वाचनातदंतर° D. [6] सर्वत्र स्तो° G. [7] °भनादनन्तरं G. [8] Tg om. अजातेषु. [9] तनुहि G. [10] TG om. [11] इत्येच TG.

[a] Cf. 5, 2, 9. [b] Cf. 5, 2, 19.

वषट्कृते[1] हारियोजनस्य[2] यथेतमपरया[3] द्वारा निष्क्रामन्तो जपेयुः[4] "सोमेहि"[5a] इति[5] ॥ १२ ॥

"सुभूरसि"[b] इत्यादित्यमुपतिष्ठेरन् ॥ १३ ॥

स्पष्टे इति ॥

अस्तमितश्चेद्गार्हपत्यं चन्द्रमसं[6] नक्षत्राणि वा ॥ १४ ॥

गार्हपत्यः शालामुखीय इति ॥

आग्नीध्रीये द्वे आहुती[7] जुहुयुः "अपां पुष्पम्"[8c] इति[8] पूर्वां स्वाहाकारेणोत्तराम् ॥ १५ ॥

स्पष्टमिति ॥

हारियोजन्यो[9] नाम धाना द्रोणकलशे भवन्ति तासामुन्नाता प्रथम आददानः "समुपहूता[10] भक्षयिष्यामः"[11] इति ब्रूयात् ॥ १६ ॥

तासां धानानामेकदेश[12] आददान[12] उन्नातेत्यर्थः ॥

तथेतरौ[13] ॥ १७ ॥

स्पष्टमिति ॥

उन्नेतर्युपहवमिष्ट्वा "हारियोजनस्य[14] ते"[15d] इति "तिरोह्नयस्य"[16e] इत्यतिरात्रे सर्वत्र[17] वा[17] यथाधीतं[17] द्विरुपघ्राय पश्चादाहवनीयस्यान्तःपरिधि[18] निवपेयुः ॥ १८ ॥

"उन्नेतरुपह्वयस्व" इत्येवमनुज्ञाप्य "हारियोजनस्य[19] ते" इति धाना[20] द्विरुपघ्राय

[1] षट्कृतो TG. [2] हार्यो॰ TD, TG, Tg, G. [3] यथेत॰ D, C, G; यथेतं परया TG (cf. Sāyaṇa's quotation of this Sūtra in the Comm. on PV. Br. 1, 6, 6). [4] C ins. स्वोः. [5] सोमेह्यनु मेहीति TD, TG. [6] ॰सा D. [7] ॰तिं D. [8] पुष्पमसीति TD. [9] हार्यो॰ TD, TG, Tg, G; हारियोजन्यो R 1. [10] ॰तो G; ॰त Tg; समुद्रपर्वता TG. [11] भक्षयिष्याम Tg; भक्षयिष्यस्य TG. [12] ॰देशमाद॰ G. [13] ॰र Tg; ॰रादि TG. [14] हार्यो॰ TD, TG, Tg, G. [15] TG, Tg, R 1 om. [16] तिरोह्नयकस्य TD; D adds क in marg.; तिरोन्नस्य Tg; तिरोभ्यस्य TG; तिरोह्नस्य C. [17] यथाधीतं वा सर्वत्र R. [18] ॰धिं D; ॰धी TG. [19] हार्यो॰ G. [20] धानंजय्य G.

[a] PV. Br. 1, 6, 6. [b] PV. Br. 1, 6, 7. [c] PV. Br. 1, 6, 8. [d] PV. Br. 1, 6, 9. [e] PV. Br. 1, 6, 4.

पश्चादौत्तरवेदिकस्याग्नेरन्तःपरिधि धाना निवपेयुः । अथ यद्यतिरात्रः स्यात् ' तदा "हारियोजनस्य ते"[1] इति मन्त्रे "स्तुतस्तोमस्य शस्तोक्थस्य" इत्यस्यानन्तरं "तिरो-अह्नयस्य" इति पदं प्रक्षेप्तव्यं संधिचमसभक्षणमन्त्रे[a] तथैवाम्नानात् । तत उत्तरेषु सर्वेष्वपि भक्षेषु तत्पदं प्रयोक्तव्यं तेषां सर्वेषां तिरो-अह्नयत्वात्[2] । पूर्वेद्युरभिषुतः सोमोऽपरेद्युर्हूय-मानो रात्र्या तिरोहितोऽह्नि हूयमानत्वात्तिरो-अह्नय[3] इत्युच्यते । अथवा सर्वत्र[4] यथाधीतमेव हारियोजनभक्षणमन्त्रः[5] । यद्यप्यतिरात्रे हारियोजनस्तिरो[6]-अह्नयः[7] ' तथाऽपि तद्भक्षणमन्त्रे "तिरो अह्नयस्य" इत्यनाम्नानान्न प्रयोग इति ॥

अनुप्रहृतेषु[8] भस्मान्ते ॥ १९ ॥

यदि[9] पूर्वमेवाग्नौ परिधयोऽनुप्रहृताः[9] ' तेषामभावे भस्मान्ते धाना निवपेयुरिति ॥

अथ उपस्पृश्याष्टावष्टौ शकलान्याहवनीयेऽनुप्रहरेयुः[10] "देवकृतस्य"[b] इत्येतत्प्रभृतिभिरिकारान्तैः[11] ॥ २० ॥

इकारान्तैरिति[12] "अवयजनमसि" इत्येवमन्तैः[13] । नात्र स्वाहाकारः पाठाभावात् । केचित्तु बोधायनसूत्रे पाठात्स्वाहाकारं कुर्वन्तीति ॥

सकृदेव सर्वाण्युत्तमेनेति शौचिवृक्षिः[14] ॥ २१ ॥

अष्टावपि शकलानि सकृदेव मन्त्राष्टकमुक्त्वोत्तममन्त्रान्ते[15]ऽनुप्रहरेयुरिति शौचिवृक्षिराचार्यः । केचित्तु व्याचक्षते । उत्तमेनैव मन्त्रेण पूर्वैरिति । तदयुक्तं । इतरमन्त्राम्नान-वैयर्थ्यादिति ॥

[1] C om. [2] अहन्यत्वात् C; अहायत्वात् D. [3] अहन्य C. [4] G adds वा. [5] G om. हारिय्योजन. [6] हार्यो° G. [7] अहन्यः C. [8] D ins. तु (or नु). [9] G reads अन्तःपरिधि निवपनं । पूर्वमुत्तमं । अथ यदि परिधिषु प्रहृतेषु । The rest of the Comm. is left out. [10] R 1 om. ऽनु; R 2 adds नु in marg. [11] °न्ते TG; G om. this Sūtra. [12] °न्त इति G. [13] °न्ते G. [14] शौच° Tg. [15] मन्त्राः । अष्टक° G.

[a] Cf. 7, 1, 28. [b] PV. Br. 1, 6, 10.

अप्सुषोमा[1] नाम चमसाश्चात्वालदेशेऽद्भिः[2] पूर्णाः[2] ॥ २२ ॥

अप्सुषोमा नाम चमसाश्चात्वालदेश एकधनावशिष्टाभिरद्भिः[3] पूर्णा अध्वर्युणा स्थापिता भवन्तीति ॥

तेषु हरितानि तृणानि प्रास्तानि[4] भवन्ति ॥ २३ ॥

हरितानि तृणानि पूर्वादीनि अध्वर्युणेति शेषः ॥ ततः किमित्याह[5] ॥

ते स्वं चमसं पर्युपविश्य "अप्सु धौतस्य"[6a] इत्यवमृश्य[6] जपेयुः ॥ २४ ॥

स्पष्टमिति ॥

"मधुमत्तम"[b] इति पाणीनुपजिघ्रेरन् ॥ २५ ॥

स्पष्टमिति ॥

"शमद्भ्यः"[7c] इत्युदञ्चं[7] चमसं निनयेयुः ॥ २६ ॥

निनयेयुः परासिञ्चेयुरित्यर्थः[8] ॥

"काम"[d] इत्यध्यात्ममावर्तयेरन्[9] ॥ २७ ॥

आत्माभिमुखं चमसमावर्तयेरन्निति ॥

"ऊर्क्"[e] इत्युरःसु पाणीन्निदधीरन्[10] ॥ २८ ॥

"प्राण[11] सोम"[f] इति मुख्यान्प्राणानभिमृशेरन् ॥ २९ ॥

आग्नीध्रीयं गत्वा दधिभक्षं भक्षयेयुरसमुपहूय "दधिक्राव्णः"[12g] इति ॥ ३० ॥

स्पष्टानीति[13] ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ११ ॥

[1] अप्सुसोमा TD, D, C, Tg. [2] अभिपूर्णाः Tg. [3] एकधावशि° G. [4] प्राप्तानि G. [5] G reads तेषु हरितानि तृणानि पूर्वाः तेनैवाध्वर्युणा प्रस्थापितानि ततः etc. [6] धौतेत्यव° R, and in Sāyaṇa's quotation in his Comm. on PV. Br. 1, 6, 11. [7] चमसत्युदंचं Tg; चमभ्यसस्य TG. [8] परं सि° G. [9] °भ्यात्ममा° C, R; °वर्त्तेरन् Tg, R 2, and, orig., TD. [10] पाणीनुदधीरन् TG; पाणी नि° C, R 2. [11] प्राणि TG. [12] °क्राविण G. [13] स्पष्टमिति D; G om.

[a] PV. Br. 1, 6, 11. [b] PV. Br. 1, 6, 12. [c] PV. Br. 1, 6, 13. [d] PV. Br. 1, 6, 14. [e] PV. Br. 1, 6, 15. PV. Br. 1, 6, 16. [g] PV. Br. 1, 6, 17.

"अग्निष्टपति"[a] इत्यवभृथसाम ॥ १ ॥

अवभृथं गच्छतां रक्षोविनाशार्थं यत्साम । तदवभृथसाम[1] । तत्काले गायेदिति ॥ कथमित्याह ॥

तस्यावृद्यथा[2] प्रथमस्य प्रवर्ग्यसाम्नः ॥ २ ॥

तस्य स[3] एव गानप्रकारः[4] । यथा प्रथमविहितप्रवर्ग्योद्वासनसाम्नो[5] गानं । "पश्चान्तिष्ठन्नध्वर्युप्रेषितस्त्रयश्मायिरिति[6] गायेत्"[b] इत्यादिना यदुक्तं । तत्सर्वमत्र[7] कार्यमिति ॥

सर्व[8] ऋत्विजो[8] निधनमुपेयुः ॥ ३ ॥

तत्र प्रवर्ग्योद्वासनसाम्नि प्रवर्ग्योपयुक्तानामेव निधनवचनं[c] । इह तु सर्व एव षोडशर्त्विजो यजमानः पत्नी च निधनमुपेयुः । "पुरुषः पुरुषो निधनमुपैति"[d] इति श्रुतेरिति[9] ॥

इष्टाहोत्रीयमभिषेचनीये "समस्य"[10e] इति[10] वा ॥ ४ ॥

राजसूये ऽभिषेचनीये ऽहनि[11] इष्टाहोत्रीयमवभृथसाम "समस्य" इति वा साम[12] "समस्य मन्यवे विशः"[13] इत्येतस्यां गीयमान इति ॥

अश्वत्रिरात्रे नानावभृथान्यहानि ॥ ५ ॥

अश्वमेधो[14] ऽश्वत्रिरात्रः[14] । तस्मिंस्त्रीण्यप्यहानि पृथक्पृथगावभृथानि[15] भवन्तीति केषांचिदध्वर्यूणां सूत्रमिति ॥

[1] G om. [2] तथावृ° Tg. [3] G om. [4] °रं C. [5] °विहितस्य प्र° G. [6] °यीरिति D. [7] तत्सर्वंच अत्र G. [8] सर्वर्त्विजो TD, Tg. [9] G om. [10] समास्वे TG. [11] C om. [12] G ends here. [13] विशवि C; वीश D. [14] अश्वमेधयोश्च त्रिरात्रः G; °धो त्रिरात्रः C. [15] °गवभृ° MSS.

[a] ṢV. Br. 3, 1. [b] 2, 2, 1. [c] Cf. 2, 2, 4. [d] Cf. Pāṇ. 8, 1, 4, Schol. [e] RV. 8, 6, 4. SV. I, 2, 1, 5, 3; II, 8, 1, 13, 1.

तेषां प्रथमस्य "सनादग्ने"[a] इत्यवभृथसाम ॥ ६ ॥

तेषां प्रथमस्याङ्कः "सनादग्ने" इत्यवभृथसामेति ॥

"यद्वा उ विश्पतिः"[1b] इति द्वितीयस्य त्यग्नायिरिति[2] वा ॥ ७ ॥

स्पष्टमिति । तृतीयस्याङ्कः प्राकृतमेव साम विशेषावचनादिति ॥

अवभृथेष्टौ[3] संस्थितायाम्[4] "अवभृथ निचुम्पुण[5] निचेरुरसि निचुम्पुणाव[6] देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो[7] देव[8] रिषस्पाहि"[8c] इत्यप उपस्पृश्य त्रिरभ्युक्षेरन् ॥ ८ ॥

उपस्पर्शनं स्नानं तत्समन्त्रकं तूष्णीमञ्जलिना त्रिरभ्युक्षेरन् । केचित्तु विपरीतमाहुरिति ॥

आदित्यमुपतिष्ठेरन् ।
"उद्वयं तमसः[9] परि[9] ।
ज्योतिः पश्यन्त उत्तरं ।
स्वः पश्यन्त उत्तरं ।
देवं देवत्रा सूर्यं ।
अगन्म ज्योतिरुत्तमम्"[d] ॥ इति ॥ ९ ॥

स्पष्टमिति ॥

अस्तमितश्चेदाहवनीयम् ॥ १० ॥

आहवनीयमौत्तरवेदिकमिति ॥

[1] विश्पति Tg; वश्पति TG. [2] त्यग्ना इरिति TD, Tg, G; त्यग्ना इति TG. [3] °ष्या उभ Tg; G om. [4] G om. [5] °णा Tg; निचुंवुण TG, G. [6] निचुंपुणोव G; निचंपुणप TD; D corr. from निचुंवुणोव. [7] पुरू° TD. [8] देवर्षस्पा° C, D, Tg; देवर्षिस्पाहि G; देवरिषयस्पाहि TD; देवर्षयस्पाहि TG. [9] तमसस्परि C.

[a] RV. 10, 87, 19. SV. I, 1, 2, 3, 8. [b] RV. 8, 23, 13. SV. I, 2, 1, 2, 8. [c] Cf. VS. 3, 48; 8, 27. Taitt. S. 1, 4, 45, 2. Taitt. Br. 2, 6, 6, 3. [d] Cf. RV. 1, 50, 10 (T. Br. 2, 6, 6, 4; MS. 2, 12, 5), and VS. 20, 21.

तस्मिन्समिध[1] आदध्युः[1] "एधो ऽस्येधिषीमहि"[a] इति प्रथमां[2] "समिदसि[3] समेधिषीमहि"[4 b] इति द्वितीयां ।
"यदेनश्चकृमा वयं यद्वा ऽन्यकृतमारिमा[5] ।
अनया[5] समिधा वयं सर्वं तदपमृज्महे"[6] ॥ इति तृतीयाम् ॥ ११ ॥

स्पष्टमिति[7] ॥

तमेवोपतिष्ठेरन् ।
"अपो ऽद्यान्वचारिषं रसेन समसृक्ष्महि[8] ।
पयस्वानग्न आगमं[9] तं[9] मा संसृज वर्चसा"[c] ॥ इति ॥ १२ ॥

स्पष्टमिति ॥

प्रागुदयनीयादतिरात्रादप्सुषोमान्तमहः सत्त्रेषु ॥ १३ ॥

सत्त्रेष्वन्त्यवर्जं सर्वाण्यहान्यप्सुषोमान्तान्येव[10] स्युः । अन्त्ये[11] ऽहनि प्रकृतिवदाहवनीयोपस्थानं[12] तं[12] सर्वं[13] कुर्युरिति ॥

दधिभक्षान्तमहीनेषु[14] ॥ १४ ॥

अहीनेषु अन्त्यवर्जं[15] दधिभक्षान्तान्येवाहानि स्युरिति ॥

यावन्त्यहानि राजानं भक्षयेयुस्तावत्स्वब्राह्मणायोच्छिष्टं न दद्युः ॥ १५ ॥

सोमपानदिवसेषु सर्वे ऽप्यृत्विजो[16] ब्राह्मणव्यतिरिक्तायोच्छिष्टं न दद्युरिति ॥

अद्भिर्वा[17] प्रोक्ष्य दद्युः ॥ १६ ॥

यद्यवश्यमब्राह्मणाय[18] देयं । तदा प्रोक्ष्य दद्युरिति[18] ॥ अदानमेव सर्वथा श्रेय इत्यभिप्रायेणाह ॥

[1] °धमाद्° Tg (and C?); ध न द्° TG; G om. समिध आदध्युः. [2] G om. [3] G om.; °सीति TD. [4] समीधि° TG; G om. [5] °कृतमामानया G. [6] °मृ॰ह TD; °मृजमह D; °मृज्यह Tg; मृज्महेति TG. [7] G has सर्वत्रोत्गाता प्रथमस्य मुख्यत्वात्. [8] °सृक्षमहि TD, D; °सृज्महि TG; समगन्महि G, C; R 2 adds in marg. सृक्ष मूलसूत्रे; समगंस्महि R 1. [9] आगतं TD; आगमन्तम TG. [10] °प्सुषोमान्वान्यहानि G. [11] अन्ये G. [12] G has only प्रकृतिवत् and om. तं; °सानांतं C. [13] सर्वं G. [14] °क्षणान्तमभिन्नेषु G. [15] त्वन्त्यवर्जे G; D om. अन्त्य. [16] G om. अपि. [17] अत्भ्युर्वा Tg. [18] Conjecture for °श्यं ब्रा° (D) and °श्यां ब्रा° (G); C om. यद्यव°—दद्युरिति.

[a] VS. 20, 23; 38, 25. Taitt. S. 1, 4, 45, 3. Taitt. Br. 2, 6, 6, 4. [b] Cf. l. c.
[c] Taitt. S. 1, 4, 45, 3; 46, 2. Taitt. Br. 2, 6, 6, 5. VS. 20, 22. Cf. RV. 1, 23, 23; 10, 9, 9.

तदेष श्लोकः ।

"सोममेतत्पिबत यत्किंचाश्नीत[1] ब्राह्मणाः ।
मा ब्राह्मणायोच्छिष्टं दात[2] मा पात्सोममसोमपः"[3] ॥ इति ॥ १७ ॥

हे ब्राह्मणा ऋत्विजः सुत्यादिवसेषु यत्किंचान्नं[4] भुञ्जीध्वं[5] तत्सर्वं सोममेव यूयं पिबत[6] सोमपानमेव तदित्यर्थः । तस्मादब्राह्मणेभ्यः क्षत्रियादिभ्य उच्छिष्टं मा दत्त । किमर्थमिति चेत् तत्रोक्तं "मा पात्सोममसोमपः"[7] इति । असोमपः[8] सोमपानानर्हः[9] क्षत्रियादिर्मा[10] सोमं पिबत्वित्येवमर्थमिति दाननिषेधोऽयं प्रकरणात्क्रत्वर्थ इति ॥

एवं परिक्रामं[11] सर्वक्रतुषु विद्यात् ॥ १८ ॥

"ऋत्विगार्षेयोऽनूचानः"[a] इत्युपक्रम्य यावदेतदनुक्रान्तं तत्सर्वक्रतुषु[12] विद्यादित्यतिदेशोऽयमिति ॥

एष[13] ज्योतिः ॥ १९ ॥

एष सर्वक्रतूनां प्रकृतिभूतो ज्योतिष्टोमोऽस्माभिरनुक्रान्त[14] इति ॥

सर्वे कामाः सर्वे कामाः ॥ २० ॥

अस्य ज्योतिष्टोमस्य फलं स्वर्गपुत्रपश्वन्नादयः सर्वे कामा इति । नित्यस्यैवर्णसंस्तुतस्य[15] ज्योतिष्टोमस्य कामसंयोगो[16]ऽयमिति[16] ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ १२ ॥

षष्ठः पटलः ॥ ६ ॥

इति छन्दोगसूत्रस्य दीपे धन्विविनिर्मिते ।
समाप्तः पटलः षष्ठः प्रीयतां देवकीसुतः ॥

॥ इति द्वितीयोऽध्यायः समाप्तः ॥

॥ हरिः ओ३म् ॥

[1] यत्किंचिदश्नीत TG. [2] दत्त TG; दातव्यं Tg. [3] पात्सोममपा Tg; G has only तदेष स्रोक इत्यादि. [4] °चान D. [5] भुंजध्वं C; भुन्द्ध्वं G; भूर्द्ध्व D. [6] °थ G. [7] पात्सोमं सो G. [8] G om. [9] सोमपानार्हः G; सोमपानानां र्हः D; सोमपानानार्हः C. [10] °यादिदं मा G. [11] °क्रमं R, G. [12] G ins. कर्तव्यं. [13] देष C. [14] °स्मपक्रान्तः G [15] °स्यैवमृण° C. [16] °योगमिति G.

[a] 1, 1, 7.

षोडशिसाम्ना[1] स्तोष्यमाणो यथासनमुपविश्य हविर्धानं गत्वा षोडशिग्रहमवेक्षेतोद्गाता "यस्मादन्यः"[a] इति ॥ १ ॥

ननु च। अग्निष्टोमादनन्तरमुक्थ्ये[2]ऽभिधातव्ये[3] कथं षोडशिनः प्रस्तावः[4]। उच्यते। उक्थ्ये[5] विशेषतो वक्तव्याभावात् षोडशिनि[6] तत्संभवाच्च[7] प्रस्तावः। अत्र[8] केचिदाहुः। अग्निष्टोमादनन्तरमत्यग्निष्टोमो[9] नाम द्वितीया संस्था सा च ब्राह्मणस्यानित्या[10]। तत्र यज्ञायज्ञीयस्तोत्रानन्तरं[11] षोडशिस्तोत्रमिति। तदनन्तरं प्रस्ताव इति। तदयुक्तं। तदानीं यथासनमुपविश्येत्यनुवादासंभवात्। तथा हि उक्थ्यानन्तरो[12]ऽयं[13] षोडशी[13]। तस्यैव पृथग्धिष्ण्योपस्थानं यथासनमुपवेशनं च न पुनरुक्थ्यात्पूर्वभूतस्य[14] षोडशिनः। कुत एतत्। "समस्तेनोपतिष्ठेरन्यान्यूर्ध्वमुक्थ्येभ्यः"[15 b] इति वचनात्। तस्माद्यथोक्त एव प्रस्तावहेतुरिति। किं च। न वयमत्यग्निष्टोमं[16] कल्पब्राह्मणयोरधीमहे[17] येन तदभिप्रायेण[18] प्रस्तावः[19] स्यात्[19]। न च स्वशाखाधीते[20] षोडशिनि मन्त्रविनियोगसंभवे शाखान्तरीयमत्यग्निष्टोममभिप्रेत्य मन्त्रविनियोगो युक्तः। न चासौ[21] नित्यः। कुतः। "स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पा आग्निष्टोम्यमुक्थ्यतातिरात्र्यं"[22 c] इति संस्थानुक्रमेण[23] सूत्रकारेण तस्यानुपादानात्[24]। त्रयो वर्णकल्पा[25] इत्यत्र कल्पकारेणापि नित्येष्वनुपादानात्। ननु च।

[1] षोड्सिनाम्ना TD; TG om. साम्ना. [2] °ष्टोमानन्तर° G; °कथे C. [3] वक्तव्ये G.
[4] °व्य: G. [5] उकथे C. [6] °नी G. [7] सत् भावाच्च G. [8] G and C om.
[9] °ष्टोमानन्तरमन्यदत्यग्नि° G. [10] °णस्य नित्या G. [11] यज्ञायज्ञीयस्य स्तो° G; °स्तोत्रानंतं C; °स्तोत्रीयानंतरं D. [12] उकथा° C. [13] यष्षो° G. [14] °रुकथा° C.
[15] G om. यानि; °कथे° C. [16] G om. अति; च अयमत्यग्नि° C. [17] °ब्राह्मयो° D.
[18] तदधिप्रा° C. [19] प्रस्तावस्य G. [20] G ins. चतुर्थोत्पदे. [21] G ins. ब्राह्मणस्य.
[22] अग्निष्टोम्यमुकथ्यमात्रिरात्रीयं D; °मुकथ्यतिरात्र° C; अग्निष्टोममुकथ्यमतिरात्रं G. [23] °क्रमणे C.
[24] °पादात् C. [25] वर्णः कल्पा G.

[a] PV. Br. 12, 13, 32. [b] 5, 3, 5. [c] 22, 1, 17.

ब्रह्मत्वविधाने सूत्रकारः सप्त संस्थास्वेतमप्यनुक्रामति[1a]। सत्यं। नानुक्रमणमात्रान्नित्यत्वसिद्धिः[2b]। अनुक्रमणस्य ब्रह्मत्वविषयप्रदर्शनार्थत्वात्। ननु च[3]। गौतमेन[3] चत्वारिंशत्संस्कारेषु पाठान्नित्यः स्यात्। नैवं। राजन्यविषयतयाऽपि पाठोपपत्तेः। राजन्यस्याप्यसौ[4] वैकल्पिक एवास्माकमनध्ययनात्। "अप्यग्निष्टोमे[5] राजन्यस्य[6] गृह्णीयात्"[c] इति शाखान्तरेऽपि वाक्यशेषात् विकल्पावगतेरित्यलमनेन[4]। अचरार्थस्तु उक्थ्यचमसभक्षणानन्तरं[7] निष्क्रम्य धिष्ण्योपस्थानोपवेशने कृत्वा पुनर्निष्क्रम्य षोडशिग्रहमवेक्षेतेति[8] ॥

एवमेव प्रातःसवने ॥ २ ॥

प्रातःसवनेऽप्येवमेवोपवेशनानन्तरं पूर्वया द्वारा निष्क्रम्यावेक्षेतेति ॥

यदि चोत्तरयोरपि गृह्णीयुः ॥ ३ ॥

उत्तरयोरपि सवनयोर्यदि षोडशिनमध्वर्यवो गृह्णीयुः तदाऽप्यवेक्षणं। तत्र[9] तत्रोपवेशनानन्तरं कार्यं। प्रातःसवने वा प्रतिसवनं[10] वा[10] धाराग्रहाणामन्ते षोडशिनं गृह्णीयादित्यध्वर्युभिरुक्तामति[d] ॥

अश्वः कृष्णः पूर्वस्यां सदसो द्वारि प्रत्यङ्मुखस्तिष्ठेदिति शाण्डिल्यः[e] ॥ ४ ॥

अपरस्यां प्राङ्मुख इति धानंजय्यः ॥ ५ ॥

स्तुतिकाल[11] इति शेषः ॥

कृष्णाभावे श्यावः ॥ ६ ॥

तदभावे यः कश्चाश्वः[12] ॥ ७ ॥

[1] ०नमप्यनु० G. [2] ०मात्रनित्य० G. [3] G om. [4] G reads here राजन्यस्याप्या वैकहिक एक वास्माकमनध्ययनतैत्तिरीय्यकश्रुतौ स एनं यज्ञो भूत्वा इन्धेति निर्वादं भवतीति[e] पाक्षिकदोषश्रवणाच्चेत्यलमनेन। [5] अत्यग्निष्टोमे C. [6] D om. स्य. [7] उक्थ० C. [8] C om. षोडशिग्रहं. [9] Obliterated in D. [10] C and G om. [11] इतिकाल G. [12] कश्चनाश्वः G.

[a] 13, 4, 17. [b] Cf. Comm. to 13, 4, 17. [c] Taitt. S. 6, 6, 11, 4. [d] Kāty. S'r. 12, 5, 2-4.
[e] Cf. PV. Br. 12, 13, 26.

गौर्वाऽजो वाऽश्वाभावे ॥ ८ ॥

स्पष्टानि ॥

योयः सामाङ्गं[1] ब्रूयात् स हिरण्यं धारयेत् ॥ ९ ॥

यो यः प्रस्तोतोद्गाता प्रतिहर्ता वा सामाङ्गं स्वां स्वां भक्तिं ब्रूयात्[2] स हिरण्यं धारयित्वा[3] गायेत् । अनेकमेव हिरण्यमन्योऽन्यस्मै प्रदाय गायेत् । कुत एतत् । "हिरण्यं संप्रदायं षोडशिना स्तुवते"[a] इति श्रुतेः । संप्रदायमिति णमुल्प्रत्ययान्त इति ॥

उद्गाता निधनमुपयत्सु ॥ १० ॥

तेषु[4] निधनमुपयत्सु[4] हिरण्यमुद्गातैव धारयेदिति ॥

सर्वे वाऽभिमृशेयुः ॥ ११ ॥

अथवा निधनकालेऽपि तद्धिरण्यं सर्वेऽभिमृशेयुरिति ॥

अपसर्पति प्रथमं पर्यायं गायेच्छन्नम् ॥ १२ ॥

अस्तमयार्थमादित्येऽपसर्पति[5] सति[6] षोडशिनः प्रथमं पर्यायं छन्नमस्पष्टं गायेदिति ॥

विषिते[7] द्वितीयं मध्यमेन ॥ १३ ॥

विषिते[8] समयाविषिते[9] अर्धास्तमिते[10] सूर्ये द्वितीयं पर्यायं मध्यमेन स्वरेण गायेदिति ॥

अस्तमिते तृतीयमाविः[11] ॥ १४ ॥

अस्तमिते सूर्ये तृतीयं पर्यायमाविः[12] प्रकाशमुच्चैःस्वरेण[13] गायेत् । षोडशिनः संधिस्तोत्रत्वादेवमुक्तं । अत्र तैत्तिरीयकं । "समयाविषिते[9] सूर्ये षोडशिनः स्तोत्रमुपाकरोति"[14 b] इति । व्याख्यातं चैतद्बोधायनेन । अर्धास्तमित इत्येवेदमुक्तं[15] भवतीति ॥

[1] सामागं TD, D, TG. [2] °यु: G. [3] ग्राहयित्वा G. [4] G om. [5] ऽवस° D. [6] G om. [7] विषुते G. [8] G om. [9] °विषुते G. [10] अर्धा° D. [11] °माप: G. [12] °मापि: G. [13] प्रकाश उ° G. [14] G om. स्तोत्रं. [15] G om. इदं.

[a] PV. Br. 12, 13, 25. [b] Taitt. S. 6, 6, 11, 6.

यदोपाकुर्युः स्तुवीरन्नेवाहनि[1] छन्नं रात्रावाविः ॥ १५ ॥

अथवा यदा ऽध्वर्यवः षोडशिनः[2] स्तोत्रमुपाकुर्वन्ति[3] । तदानीमेव स्तुवीरन् । न पुनर्यथोक्तकालः प्रतीक्ष्य इत्यर्थः । तदा चाह्नि चेदुपाकरणं । तदा छन्नं । रात्रौ चेत् । प्रकाशं गेयमिति ॥

उद्गात्रे दद्यादश्वहिरण्ये[4] दक्षिणावत्सु ॥ १६ ॥

दक्षिणावत्सु सत्रव्यतिरिक्तेषु क्रतुषु[5] स्तुत्यङ्गभूतमश्वं[6] च[6] हिरण्यं[6] चोद्गात्रे दद्यादिति ॥

एवं पञ्चविंशब्राह्मणे दशरात्रस्य चतुर्थे ऽहन्युत्पादितस्य[7] षोडशिनः स्तुतिप्रकार उक्तः[a] । दशरात्रस्य[8] द्विविधः[8] । सत्रमहीनं[9] चेति[9] । तत्र षोडशिग्रहचमसभक्षे[10] विशेषमाह ॥

सत्र एव ग्रहस्य भक्षयेयुः "ऐन्द्रं सहः"[b] इति ॥ १७ ॥

"ऐन्द्रं[11] सहः"[11] इति मन्त्रेण षोडशिग्रहणं[12] तच्च सत्र एवेत्यर्थः ॥

उदस्य हरिवदहरिकासु चेत्स्तुवीरन् ॥ १८ ॥

यदि[13] हरिशब्दवर्जितासृक्षु षोडशिना स्तुवीरन् । तदानीं "ऐन्द्रं सहः" इति भक्षण-मन्त्रे[14] ऽपि हरिवत्पदमुदस्य अपोह्य ब्रूयुः । अहरिकास्विति[15] हरिशब्दरहितास्वित्यर्थः ॥

अनुष्टुप्छन्दसा चमसस्य ॥ १९ ॥

सत्र इत्यनुवर्तते । "इन्द्वविन्द्रपीतस्य त इन्द्रियावतो ऽनुष्टुप्छन्दसः"[c] इति षोड-शिचमसं[16] भक्षयेयुरिति ॥

पूर्वेण वा[17] ॥ २० ॥

सत्र इत्येव । "ऐन्द्रं सहः" इत्यनेन वा चमसं भक्षयेयुरिति ॥

[1] °हवनि TG. [2] °शि G. [3] °मुपकु° D. [4] °एयं D. [5] G om. [6] °श्वहिरण्यं C. [7] °त्पादिति तस्य G. [8] °त्रं च द्विविधं G. [9] सूत्रमहीनश्चेति G. [10] °भक्षण G; भक्षणे C. [11] G om. [12] °ग्रहं भक्षयेत् G. [13] D corr. to यदा. [14] G om. भक्षण; °मंत्रेण C. [15] हरिका° D, C. [16] °सस्य सत्रे G. [17] This Sūtra, and the larger portion of the Comm., are wanting in G.

[a] PV. Br. 12, 13. [b] PV. Br. 1, 6, 1. [c] PV. Br. 1, 6, 2.

तथा कुर्वन् "इन्द्रश्च सम्राड् वरुणश्च[1] राजा तौ ते भक्षं चक्रतुरग्र[2] एतं तयोरहमनुभक्षं[3] भक्षयामि[4] वाग्जुषाणा सोमस्य तृप्यतु"[a] इति ग्रहस्य[5] ॥ २१ ॥

तथा कुर्वन्निति सत्त्रे[6] पूर्वेण चमसभक्षणं कुर्वन्नित्यर्थः। तदानीं "इन्द्रश्च[7] सम्राट्" इति ग्रहस्य भक्षणमिति ॥

"इन्द्रमिद्धरी"[b] इति शाण्डिल्यो "वाग्देवी सोमस्य पिबतु"[8] इत्येतदधिकया ॥ २२ ॥

सत्त्र इति ग्रहस्य चेति द्वयमप्यनुवर्तते[9]। "इन्द्रमिद्धरी" इत्यनयर्चा "वाग्देवी" इति[10] यजुरन्तरया[11] ग्रहभक्षणं सत्त्र इति ॥ एवं सत्त्रे ग्रहचमसयोर्भक्षणप्रकार उक्तः। अथ[12] सत्त्रव्यतिरिक्त[13] आह[13] ॥

"ऐन्द्रं सहः" इति चमसस्यासत्त्रे[14] ॥ २३ ॥

"ऐन्द्रं सहः" इत्यनेनैव मन्त्रेण सत्त्रव्यतिरिक्तेषु[15] चमसभक्षणं[16] नानुष्टुप्छन्दसेति मन्त्रेणेति। एवं चतुर्थोत्पन्नः षोडशी सहैव[17] धर्मैरन्यत्र प्रवर्तते। द्वादशाहस्य षोडशिमन्तावतिरात्रावित्यादाविति मन्तव्यं ॥

त्रिष्टुप्छन्दसा[c] वाजपेयसाम्नि भक्षयेयुरिति[18] गौतमः ॥ २४ ॥

अनुष्टुप्छन्दसेति[19] धानंजय्यशाण्डिल्यौ[20] ॥ २५ ॥

स्पष्टे[21] इति[21] ॥

अनुष्टुप्छन्दसा रात्रौ ॥ २६ ॥

रात्रिपर्यायेष्वनुष्टुप्छन्दसेति[22] चमसभक्षणं सर्वत्रेति ॥

[1] °णस्य C. [2] चतुरग्र C. [3] TD om. अहं. [4] TG ins. इति. [5] The beginning of this Sūtra (तथा—तौ) is wanting in G. [6] C om. [7] °न्द्रं C. [8] तृप्यतु G. [9] द्वयमित्यनु° G. [10] C om. [11] °यजुरधिकया G. [12] अत्र D, C. [13] °क्तमाह C; D adds in margin प्रकार after °क्त. [14] G om. this Sūtra. [15] °रिक्ते G. [16] °क्षणान् G. [17] G om. सह. [18] °येदिति G. [19] ऽप्यनुष्टु° TG. [20] °ण्डिल्यायनौ G. [21] G reads चमसस्येत्येव. [22] G ins. स.

[a] Cf. VS. 8, 37. [b] RV. 1, 84, 2. SV. II, 3, 2, 23, 3. VS. 8, 35. [c] Cf. PV. Br. 1, 5, 13.

पृथक्तृचेभ्यः संधौ[1] हिङ्कुर्युः ॥ २७ ॥

[2]संधेरनावृत्तिस्तोत्रत्वादेकहिङ्कारत्वे प्राप्त इदं वचनं[3]। तृचानां[3] नानादेवतत्वात्पृथग्घिङ्कारः कार्य इत्यभिप्रायः। सामभेदो वा देवताभेदो वा हिङ्कारस्य प्रयोजक इति ॥

"इष्टयजुषः"[4][a] इति[4] भक्षः ॥ २८ ॥

संधिस्तोत्रे "इष्टयजुषः" इति चमसभक्षणमिति[5] ॥

गायत्रच्छन्दसा[b]ऽतिरिक्तस्तोत्रेष्विति गौतमः ॥ २९ ॥

अप्तोर्यामेऽतिरात्रस्तोत्रेषु गायत्रच्छन्दसा चमसभक्ष इति गौतम इति ॥

पृथग्भक्षश्छन्दोभिरनुपूर्वमिति[6] धानंजय्यशाण्डिल्यौ ॥ ३० ॥

चत्वारि तावदतिरिक्तस्तोत्राणि तेषु क्रमेण गायत्र्यादीनि चत्वारि भक्षच्छन्दांसि पृथग्भक्षयेयुरित्यर्थः ॥

अनुष्टुप्छन्दसा वा ॥ ३१ ॥

चतुर्ष्वपि स्तोत्रेषु रात्रिवदनुष्टुप्छन्दसेति[c] भक्षणं। तेषां रात्रिविवृद्धिमात्रत्वादिति[7] ॥

अच्छन्दसा[8] वा ॥ ३२ ॥

अथवा छन्दःशब्दरहितेन मन्त्रेण चमसभक्षणमिति ॥

संधिवद्वा ॥ ३३ ॥

यद्वा संधिस्तोत्रवत् "इष्टयजुषः" इति भक्षणं। तदेवमतिरिक्तस्तोत्रेषु चमसभक्षणे पञ्चभक्षणा उक्ता इति ॥

प्रथमः खण्डः ॥ १ ॥

[1] संध्याभि TG. [2] The Comm. begins in G रात्रौ सन्धिस्तोत्रे पृथगेव तृचानामुपक्रमे हिंकुर्यात्। संधेरना° etc. [3] वचनतृचां G; C om. वचनं, and reads तृचं. [4] °षेति G. [5] °ण इति G. [6] °रानुपूर्व्य इति G. [7] रात्रिवृ° G. [8] अथ छंदसा C.

[a] PV. Br. 1, 6, 4. [b] Cf. PV. Br. 1, 5, 4. [c] Cf. 7, 1, 26.

एवं तावत्सप्तानां[1] सोमसंस्थानामौद्गात्रमुक्तं। "[2]महन्मे वोचः"[a] इत्यादिमन्त्रविनियोगश्चोक्तः॥ "रश्मिरसि" इत्यनुवाकद्वयं[3][b] ब्रह्मत्वविधाने[4] विनियोक्ष्यते। अथ याजकस्य प्रसङ्गात्प्रायश्चित्तमाह[5]॥

आहिताग्निरसोमयाजी[6] परं सोमेन याजयित्वा परिभक्षं कुर्वीत॥ १॥

स्वकीयानग्नीन्सोमेनानिष्ट्वा[7] परयज्ञे यत्सोमभक्षणं। स परिभक्षः[8]। वर्जनार्थे परिशब्दः। परिभक्षणनिमित्तं प्रायश्चित्तमपि लक्षणया परिभक्ष[9] इत्युच्यते[9]। यथा[10]ऽतिथिमाहूतमभोजयित्वैव[11] स्वयं परगृहे भुञ्जीत। तादृशमेतत्। यदाहिताग्नेरसोमयाजिनः परयज्ञे[12] सोमभक्षणं। तस्मान्निमित्तं[13] वक्ष्यमाणं[14] प्रायश्चित्तं कुर्यादिति॥

सोमयाज्यपीति[15] शाण्डिल्यः॥ २॥

सोमयाजिनोऽपि परयज्ञे सोमभक्षणं स्वकीयैरग्निभिर्विना दुष्टमेवेति भावः॥

हुतायां प्रातराहुतावाज्यं गार्हपत्येऽधिश्रित्योदगुद्वासयेत्॥ ३॥

हुते प्रातरग्निहोत्रे परिभक्षं[16] संकल्प्यान्यमाहवनीयं[16] प्रणीयाज्याधिश्रयणमिति॥

कंसे चमसे वा द्रप्सानवधाय दक्षिणाग्रावुपसादयेत्॥ ४॥

दारुमयश्चमसः। स च प्रणीताप्रणयणमभिप्रेतं। तस्य क्लृप्तत्वाद्दधिसंबन्धिनो[17] द्रप्सा अभिप्रेताः। आपस्तम्बकल्पे तेषामेवोपदेशात्[c]। इहापि विरोधाभावाच्चेति[18]॥

[1] तावच्छब्दानां G. [2] C ins. प्र. [3] इत्येतावनुवाकद्वयमवशिष्टं G. [4] °धाय G.
[5] G om. प्रायश्चित्तमाह. [6] अहि° D. [7] °न्सोमेना° G. [8] °क्षणं G. [9] °क्षणमित्युच्यते G.
[10] यद् G. [11] °माहूतं। मभो° D; °माहूतमभो° C; °माहूय तं भो° G. [12] °ज्ञ G.
[13] तस्मात्तंनि° G. [14] °णा G. [15] G om. इति. [16] °क्षसंकल्पं प्रणयनपक्षे न्यमाह° G.
[17] क्लृप्ताद्° G. [18] G reads °च्चेतीति ह क्वचिदत्तद्दधिद्रप्सानीत्येव पाठः।

[a] 1, 1, 10. [b] Cf. 15, 3, 1. [c] Āpast. S'r. 13, 18, 1.

स्फ्यदर्भमुष्टी[1] च[1] ॥ ५ ॥

दक्षिणाग्नावुपसादयेदित्येवेति[2] ॥

पश्चिमेन गार्हपत्यं गत्वा पश्चादाहवनीयस्योपविश्य स्रुवेण स्रुच्याज्यं गृह्णीयाद्यावद्गृहीती स्यात्[3] ॥ ६ ॥

यावन्ति गृहीतान्यस्येति यावद्गृहीती यजमानः । स यदि पञ्चावत्ती स्यात् । पञ्चगृहीतमाज्यं गृह्णीयात् । यदि चतुरवत्ती चतुर्गृहीतमिति ॥

तज्जुहुयात् ।
"इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात्[4] ।
आपिः[5] पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानां[6][a] ॥
स्वाहा" इति ॥ ७ ॥

स्पष्टमिति ॥

एवमेव गृहीत्वा "अपां पुष्पमस्योषधीनां रसोऽग्नेः प्रियतमा तनूरिन्द्रस्य[7] प्रियतमं हविः स्वाहा"[b] इति ॥ ८ ॥

एवमेवेति स्रुवेण स्रुचि[8] चतुर्गृहीतं पञ्चगृहीतं वा गृहीत्वेत्यर्थः ॥

आज्यस्य पूर्वान्ग्रहान्गृहीत्वा दध्न उत्तमं "विश्वेभ्यो देवेभ्यः स्वाहा" इति ॥ ९ ॥

जुहुयादित्येवमाज्यस्य[9] पूर्वांस्त्रीन्ग्रहान्गृहीत्वा दध्नश्चतुर्थं ग्रहं गृह्णीयाच्चतुरवत्ती । पञ्चावत्ती पञ्चमं ग्रहमिति ॥

दधिशेषं स्रुच्यानीयोदङ्ङावृत्य प्राश्नीयात् ।
"तव सोम[10] व्रते वयं । मनस्तनूषु[11] पिप्रतः[12] । प्रजावन्तो अशीमहि"[c] ॥
इति ॥ १० ॥

स्पष्टमिति ॥

[1] °ष्टिश्च TG. [2] Wanting in G. [3] This Sūtra, and part of the Comm., up to °स्येति, are wanting in G. [4] °रम् C. [5] आविः D. [6] भृमरसुषिकर्मत्यानां TG; °क्कर्म्मर्त्यानां D; G om. भृमि°—र्त्यानां. [7] नभूरि° C. [8] G om. [9] °त्येवाज्यस्य D. [10] नस्सोम TG. [11] °नूंषि TG. [12] विभ्रतः TG; प्रिप्रितः G; प्रियतः C.

[a] RV. 1, 31, 16. [b] Cf. Taitt. Br. 3, 7, 14, 2. 3. [c] Cf. Taitt. Br. 3, 7, 14, 3.

प्रक्षाल्य स्रुचं यथेतं[1] प्रत्याव्रज्य प्राचीनावीती भूत्वाऽप उपस्पृश्य दक्षिणा[2] दक्षिणाग्नेः स्थण्डिलं समूह्याद्भिः[3] संप्रोक्ष्य स्फ्येन सकृदुल्लिख्योल्मुकमुपनिधाय दर्भानुपस्तीर्याप उपनिनीय "अमीषां द्रप्सानां निपृणुयादवमेभ्यः[4] पितृभ्यः स्वधा सह भक्षेभ्यः" इति प्रथमम् ॥ ११ ॥

निपृणीयान्निर्वपेदित्यर्थः[5] ॥

"और्वेभ्यः काव्येभ्यः" इत्येवमेव दक्षिणा पृथक् ॥ १२ ॥

पूर्वन्युप्तस्य[6] दर्भो दक्षिणतः "और्वेभ्यः पितृभ्यः स्वधा" इति निवरणं तस्य दक्षिणतः "काव्येभ्यः पितृभ्यः स्वधा" इति ॥

"अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्"[a] इत्युक्त्वोदङ्ङावृत्यासित्वा[7] यावन्मन्येत तावत् ॥ १३ ॥

यावन्तं कालं लोके पुरुषस्य दध्यशनाय पर्याप्तं मन्यते[8]। तावन्तं कालं पितृनपश्यन्नासित्वेत्यर्थः[9]। यदि पश्येल्लज्जया पितरो नाश्नीयुरिति तैत्तिरीयकैराम्नातं। "पराङावर्तते[10]। ह्रीका हि पितरः"[b] इति ॥

अभिपर्यावर्तमानो जपेत् "अमीमदन्त पितरो यथाभागमनन्तरिताः पितरः सोमपीथात्"[11][c] इति ॥ १४ ॥

तत आभिमुख्येन दधिद्रप्सान्पर्यावर्तमानो जपेदिति ॥

तान्दर्भान्द्रप्सांश्च दक्षिणाग्नौ प्रहरेत् ॥ १५ ॥

येषु दर्भेषु ये दधिद्रप्साः पितृभ्यो दत्ताः। तानुभयानपि प्रहरेदिति ॥

द्वितीयः खण्डः ॥ २ ॥

[1] यथेतं TG. [2] TG om.; obliterated in TD. [3] समुह्या° C. [4] निवृणीयाद° C, TG, G; so also originally D. [5] निवृ° C, G. [6] पूर्वे न्यु° C. [7] °धित्वा (or °यित्वा) TG. [8] मन्येते C; D is uncertain. [9] पितृपरपनासि° C. [10] परादा° C. [11] °पीथा TG, G.

[a] Cf. 6, 2, 4. [b] Taitt. Br. 1, 3, 10, 5. 6. [c] Cf. 6, 2, 5. Taitt. Br. 3, 7, 14, 4.

यज्ञोपवीती भूत्वाऽप उपस्पृश्य गृहान्व्रजञ्जपेत्।

"उप शिवेन[1] मनसा गृहानैमि[2] मानुषान्।
गृहा मा बिभीत[3] मा वेपिढ्वमूर्जं[4] बिभ्रत एवमस्यूर्जं[5] बिभ्रद्वः॥
सुमनाः सुमेधा गृहानैमि[6] मनसा[7] दैवेन।
येषामध्येति प्रवसन्येषु[8] सौमनसो[9] बहुर्गृहानुपह्वयामहे[10]॥
ते[11] नो जानन्तु जानतः उपहूता[12] इह[12] गावः[12]।
उपहूता अजावयो[13]ऽथो अन्नस्य यो रस उपहूतो गृहेषु नः"[a] ॥ इति ॥ १ ॥

अग्न्यगारान्निक्रम्य स्वीयान्गृहान्व्रजञ्जपेदिति ॥

पश्चाच्छालाग्नेरुपविश्य जपेत्।

"इह गावः प्रजायध्वमिहाश्वा इह पुरुषाः[14]।
इहो सहस्रदक्षिणोऽपि पूषा[15] निषीदतु"[16][b] ॥ इति ॥ २ ॥

शालाग्निरौपासन इतीति ॥

अग्नेस्तृणानि[17] प्रत्यूह्य यः सुहृत्तमभिभाषेत ॥ ३ ॥

औपासनाग्नेः परिस्तरणान्यपचित्य[18] सुहृद्भाषणं कार्यमिति ॥

[1] विश्येयेन TG. [2] ॰नैम D, TD; ॰नेमि G. [3] विहात TG. [4] मेपि॰ G; वेपिवमू॰ TG. [5] मेवमतिस्युज्ज TG. [6] गृहामेमि G; गुहामैमि C. [7] C ins. सुमेधे. [8] प्रवसन्नेषु G. [9] सोमरसो G. [10] ॰ह्वया॰ TG. [11] तेनैव G. [12] G om. [13] अयावयो G. [14] पू॰ C. [15] पुरुषा G. [16] ॰षीदन्त्विति G. [17] आ॰ D. [18] परिस्तरणापचित्य G; परिस्तरणात्तृणा॰ C.

[a] Cf. VS. 3, 41. 42. 43. [b] Cf. AV. 20, 127, 12. Cf. Ait. Br. 8, 11, 5.

गोषु गा अपिसृजेत् ।
"उपेदमुपपर्चनमासु गोषूपपृच्यताम् ।
उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये"[a] ॥ इति ॥ ४ ॥

अथ स्वीयानां[1] गवां ग्रामगवीष्वपिसर्गमन्ततः[2] कुर्यादिति ॥

"मेमा[3] इन्द्र[4] गावो[5] रिषन्मो[5] आसां गोपती रिषत्[6] ।
मासाममित्रयुर्जन[7] इन्द्र मा स्तेन ईशत"[b] ॥ इति ॥ ५ ॥

गा[8] निरीक्ष्य[8] जपेदिति शेषः । एतदन्तं प्रायश्चित्तमिति ॥ अथ कल्पकारेण प्रथमक्लृप्तं गवामयनमनुसंधास्यन् सर्वेषु सत्त्रेषु सत्त्रिणां तावद्धर्मानाह ॥

सत्त्राय दीक्षिष्यमाणाः[9] संवदेरन् "सह नः साधुकृत्या नाना पापकृत्या यदस्मिन्सत्त्रेऽथ यत्पुरा चकृम कर्ता[10] स्मश्च यथोपस्थितमेव नस्तत्"[c] इति ॥ ६ ॥

अस्मिन्सत्त्रे अस्माकमन्यतमेन यत्क्रियते तद्यदि साधु तत्सहैवास्माकमस्तु । यद्यसाधु तन्नानैव[11] तस्यैवेत्यर्थः । अथ यत्सत्त्रस्य पुरस्तादुपरिष्टाच्च वयं कृतवन्तः करिष्यामश्च तद्यथोपस्थितं यथा प्राप्तमेवास्तु । येन यत्साध्वसाधु वा कृतं तत्तस्यैवेत्येकः[12] संवाद इति ॥ संवादान्तरमाह ॥

"यो नो[13] ऽव्रत्यं[14] चरेद्दीक्षितो नः[15] स दीक्षितान्याजयेत्"[16] इति ॥ ७ ॥

संवदेरन्नित्यनुषङ्गः । दीक्षाङ्गभूतसत्यवदनब्रह्मचर्यादिनियमो[17] व्रतं[18] । तद्विरुद्धमव्रत्यं[19] । तद्यदि कश्चित्कुर्यात् सो दीक्षित एवास्तु । केवलं सत्यमस्माकमितरेषां याजकमात्र[20] ।

[1] °यनं C. [2] ग्रामगतेष गवेष्वपिसर्गमन्ततः G. [3] मा मे G. [4] इन्द्रा TG.
[5] गवोर्षभो C; गावो ऋषन्मे रा G; गावो रिरिषन्मो TG; D and TD corr. रि to ऋ.
[6] D and TD corr. रि to ऋ. [7] मासां मि° G. [8] गौर्नि° G. [9] दीक्ष्यमाणाः D, TG.
[10] कर्तारः TG. [11] तस्मान्नैव G; G ins. तत्. [12] न सेवेति एकः G; C om. तत्.
[13] नौ G, TG. [14] प्रत्यं TG; D and TD corr. व्रत्यं to वृतिं; no MS. has avagraha.
[15] न C. [16] दीक्षितोन् या° TD; °ता° is in D corr. to °तो°. [17] °भूतसत्यवचन° G.
[18] G om. तं; D corr. to वृत्तं. [19] °द्धंव्रत्यं G. [20] याजतमात्रं D; याजकमात्रः G.

[a] RV. 6, 28, 8. Taitt. Br. 2, 8, 8, 12. Cf. AV. 9, 4, 23. [b] AV. 20, 127, 13.
[c] Cf. S'. Br. 4, 6, 8, 13. 15. Kāty. S'r. 12, 2, 8.

नासौ सत्त्वफलभागीत्यर्थ[1] इति। यद्येवं संवादादेव[2] परकीयदोषास्पर्शः[3]। तर्ह्यविज्ञानवृत्तेनापि[4] पुरुषेण सह दीक्षायां न दोषः स्यात्। नेत्याह॥

संवत्सरं ह[5] स्म पूर्वे ऽन्यो ऽन्यस्य क्रोधमाक्राशं[6] निभृतं शीलमिति संविज्ञाय दीक्षन्ते ॥ ८ ॥

ऋषयः[7] पूर्वे[7] संवत्सरमेकमन्योऽन्यगुणदोषौ परीक्ष्यैवादीक्षन्त[8]। तस्मात्परीक्षणगुणेन[9] सुवृत्तेनैव सह दीक्षितव्यमिति। क्रोधाक्रोशौ[10] प्रसिद्धौ[11]। निभृतं दमः[12]। शीलमनसूयादीति[13]॥

तेषां दीक्षाप्रभृति पत्नीशालायां भोजनसंवेशने स्याताम् ॥ ९ ॥

उपवसथ्यप्रभृत्याग्नीध्रीये ॥ १० ॥

संधिवेलयोर्वाचं यच्छेयुः ॥ ११ ॥

स्पष्टानीति॥

विचक्षणान्तां वाचं भाषेरन् ॥ १२ ॥

अत्रापस्तम्बः[14]। "चनसितं[15] विचक्षणमिति नामधेयान्तेषु निदधाति"[16 a] इति। यथा "हे देवदत्त[17] विचक्षण" इत्येवमादीति[18]॥

न कंचनाभिवादयेरन्[19] ॥ १३ ॥

न शूद्रेण संभाषेरन् ॥ १४ ॥

स्पष्टे इति॥

[1] °भागि° D. [2] संपादा° D. [3] °दोषस्पर्शः G. [4] तस्य वि° G; D corr. तर्ह्य° to तर्हि. [5] भ D, C, G; ह्र TG. [6] G om. आक्रोशं. [7] C om. [8] परीक्ष्य वादिष्यन्त G. [9] °क्षितगुणेन G; °क्षगुणेन C. [10] क्रोधमाक्रोधह G. [11] प्रसिम C. [12] दमम् D (corr. from दमम); दम G; दमन C. [13] °नसूयादि G; °नुसूयादिति D, C. [14] °वसतंबः D. [15] °सीतं C; D corr. from °सीतिं. [16] दधाति C, D. [17] C om. [18] °दीनि G. [19] कश्च° G.

[a] Āpast. S'r. 10, 12, 7.

नाधिष्ण्य उत्तपेरन् ॥ १५ ॥

आहवनीयादयो धिष्ण्याः । तद्व्यतिरिक्ते लौकिकेऽग्नौ नोत्तपेरन् । भेषजार्थानां[1] हरीतकीलाजादीनां भर्जनं[2] । अथवा शीतवातनोदनार्थं[3] हस्तादिप्रतितपनमुत्तपनमिति[4] ॥

न प्रतीच्या द्वारा पत्नीशालाया[5] निष्क्रामेयुः ॥ १६ ॥

स्पष्टमिति ॥

प्राञ्चमुदञ्चं वोच्चारं कुर्वीरन् ॥ १७ ॥

देवयजनात्प्राग्देशे उदग्देशे वा मूत्रपुरीषोत्सर्गं कुर्युः । प्राङ्मुख उदङ्मुखो वेति केचिद्व्याचक्षत इति ॥

न बहु वदेयुः ॥ १८ ॥

गतमिति ॥

न दन्तान्दर्शयेयुः ॥ १९ ॥

न हासादौ दन्तान्दर्शयेयुरिति[6] ॥

नोच्चैर्जक्षुः ॥ २० ॥

उच्चैर्भक्षो[7] न कार्य[8] इति[8] ॥

नाहुतस्याश्नीयुः ॥ २१ ॥

आहुतशिष्टं[9] न[9] कदाचिदश्नीयुः । शरीरधारणाशक्तौ त्वैन्द्रं पञ्चशरावमोदनं निर्वपेरन्यद्योदनीयन्तीति[10] वाजसनेयकसूत्रमिति[a] ॥

[1] भेषजानां C. [2] G adds उत्तपनमिति [3] धितापनो° G. [4] °प्रतप° G; G adds तापन्. [5] TD om.; °शालां TG. [6] C and D om. the Comm.; न is not in G. [7] उच्चैर्हासो C. [8] कार्यमिति C. [9] °शिष्टान्न C; हुते शिष्टं न G. [10] °नीयंनिति C; °न्यदोदनं न दीयन्निति G.

[a] Kāty. S'r. 12, 2, 12.

नैनानन्योऽश्नतः[1] पश्येत् ॥ २२ ॥

अन्येनादर्शनं[2] सत्त्रिणामेव साद्गुण्यार्थं प्रकरणात्[3] यथा आद्धस्यापरपात्रैरदर्शनमिति[4] ॥

सर्वेषां सवनानां प्राश्नीयुः ॥ २३ ॥

त्रिष्वपि सवनेषु प्राश्नीयुरनुष्ठानशक्त्य[5] इति ॥

क्रोधानृते वर्जयेयुः ॥ २४ ॥

स्पष्टमिति ॥

एतानि व्रतानि[6] दीक्षासु[7] ॥ २५ ॥

दीक्षादिवसेष्वेवैतानि न ततः परमित्यर्थः[8] ॥

दीक्षोपसत्सु वा ॥ २६ ॥

वा[9] सत्त्रान्तात् ॥ २७ ॥

अथवा आ सत्त्रसमाप्तेरेतानि व्रतानि स्युरिति[10] ॥

उदयास्तमयावभ्याश्रावणं[11] च बहिर्वेदि प्रसृते वर्जयेयुः ॥ २८ ॥

बहिर्वेदि[12] प्रसृते[12] निर्गमने[13] सतीत्यर्थः । उदयास्तमयवेलायां न बहिर्वेदि गच्छेयुः[14] । तथा बहिर्वेदि गते आश्रावणं[15] च न कुर्युरित्यर्थ[16] इति[16] ॥

तृतीयः खण्डः ॥ ३ ॥

[1] श्नन्तः TG. [2] G has अन्यो नादर्शनं मतं । [3] °रणं G. [4] आद्धं स्यापपात्रै° D. [5] °नुष्ठानाशक्त G; °निष्ठानशक्त्य C. [6] प्रनानि TD; व्रतासु G. [7] D om. Sūtras 25, 26, 27, and 28, and Comm. to Sūtras 26-27. [8] C om. this Comm. [9] आ G; चा TD; अथ वा C. [10] C om. this Comm. [11] °श्रवणं G; °स्तमयाभ्या आ° TD. [12] G om. [13] गमने G. [14] वर्जयेयुरिति G. [15] °श्र° G. [16] कुर्यादिति G.

तेषां चेदेनांस्त्रयाणां[1] किंचिदेयाद्गृहपतावुपहवमिच्छेरन्[2] ॥ १ ॥

तेषामुद्यास्त्वमयाश्रावणानां त्रयाणां मध्ये किंचिदेकमेनान् सत्त्रिणो बहिर्वेदि गतानवर्जनीयमुपनमेत्[3] । तदा गृहपतावनुज्ञानमिच्छेयुः[4] । "गृहपत[5] उपह्वयस्व" इति ॥

तं चेदुद्गातरि ॥ २ ॥

गृहपतिश्चेत्त्रयाणां किंचिदुपनमेत् । तदाऽसौ गृहपतिरुद्गातर्युपहवमिच्छेदिति[6] ॥ कुत इत्याह ॥

"एष वै यजमानस्य प्रजापतिर्यदुद्गाता"[7][a] इति ह्याह ॥ ३ ॥

गतमिति ॥

दीक्षानुपूर्व्येण[8] वा सत्त्रेषु ॥ ४ ॥

अथवा सर्वेषु सत्त्रिषु प्रत्येकं दीक्षाक्रमेणोपहवमिच्छेदिति ॥

परिहृतासु वसतीवरीषु संविशेयुः ॥ ५ ॥

स्पष्टमिति ॥

तेषां चेत्कश्चित्प्रेयादतीर्थेन[9] निर्हृत्याहार्येणानाहिताग्निं[10] दहेयुः पत्नीं चैवम् ॥ ६ ॥

तेषां सत्त्रिणां मध्ये यदि कश्चिन्म्रियेत । स यद्यनाहिताग्निः स्यात् । तमाम्नानतीर्थादन्येन मार्गेण वेदेर्निर्हृत्य[11] आहार्येण लौकिकमग्निमाहृत्य तेन दहेयुः । तथैव तत्पत्नीमपीति ॥

[1] चेद्देवानां च॰ G; ॰नांसचयमा TG. [2] किंचिद्देया॰ G; ॰गृहपातासु॰ TG. [3] गतान्वर्ज॰ C. [4] ॰नुज्ञामि॰ D. [5] ॰पतय D. [6] गृहपतिर्युतगातुरुप॰ G. [7] ॰पतिर्युतगा॰ TG. [8] ॰पूर्वेण TG. [9] ॰त्प्रेयान्ती॰ TG. [10] निह्वत्या॰ TG, G. [11] वेदं नि॰ G.

[a] PV. Br. 7, 10, 16.

अरण्योरग्नीन्समारोप्यत आग्नानेन[1] निर्ह्त्य निर्मथ्येनाहिताग्निम् ॥ ७ ॥

यद्याहिताग्निः स्यात् । तस्याग्नीनरण्योः समारोप्यते । अरण्यावाग्नानेन तीर्थेन निर्ह्त्य निर्मथ्येन तं[2] दहेयुरिति[2] ॥ एवं सत्त्रधर्मा[3] उक्ताः । अथ गवामयनमनुसंधत्ते ॥

मध्यमस्य रात्रिपर्यायस्य दैवोदासं होतृषाम स्यादौर्ध्वसद्मनं[4] वा[5] ॥ ८ ॥

अत्र कल्पकारेण क्लृप्तो ज्योतिष्टोमोऽतिरात्रषोडशिक[6] इत्युक्तं । ब्राह्मणेनैव क्लृप्त इत्यर्थः । ब्राह्मणे च मध्यमे रात्रिपर्याये दैवोदासमौर्ध्वसद्मनं वेति[5] सामद्वयं[7] होतृषामत्वेन विहितं[a] । तत्राहीनगतेऽतिरात्रे[8] दैवोदासं । सत्त्रगते त्वौर्ध्वसद्मनमिति[9] निदानकारः[b] । तत्र सूत्रकारोऽग्निच्छन्नविशेषादिकल्पमाह[10] । ननु च । "और्ध्वसद्मनमपिशर्वरीषु[11] प्रोहन्ति"[c] इति ब्राह्मणं । सत्त्रविषयमेवं प्रोहन्तीति बहुवचनात्सत्त्रविषयत्वम्[12] "ऐडेन बृहतीमारभन्ते"[d] इतिवत्सत्त्रव्यतिरिक्तेऽपि बहुवचनतोपपत्तेः । न चापिशर्वरीशब्दः सत्त्रवचनो[13] रात्रिगतस्तोत्रीयावचनत्वात् । याभिः स्तोत्रीयाभिर्देवाः[14] शर्वर्याः अप्यसुरानपानुदन्त[15] न[16] केवलमह्नस्ता अपिशर्वर्य[17] इति बह्वृचब्राह्मणमुक्तं । "अपि शर्वर्या अनु स्मसीत्यब्रुवन्[18] तदपिशर्वराणामपिशर्वरत्वम्"[19][e] इति[20] । तेनायमर्थः । और्ध्वसद्मनं "पुरोजिती वो अन्धसः"[f] इति पावमान्यामुत्पन्नमपि पवमानस्थानमतिलङ्घ्यापिशर्वरीषु रात्रिस्तोत्रीयासु असुरनिरासार्थं[21] प्रोहन्ति ब्रह्मवादिन इति । तेन सत्त्रविषयमेतद्वचनं । ननु च । "स्व आयतने सत्त्रमास्ते"[g] इति वाक्यशेषात् सत्त्रविषयः[22] स्यात् । तदपि तस्य प्रशंसार्थत्वात् । कथं दीर्घसत्त्रेष्वप्यौर्ध्वसद्मनेनैव विघ्नकाराञ्छत्रून्निहन्ति[23] किं पुनरन्यत्रेति[24] ॥ अथाभिप्लवस्य[25] द्वितीयेऽहनि कल्पकारः "परीतो षिञ्चता सुतम्"[h] इति माधुच्छन्दसं च भर्गस्य यशो[26] वेति भर्गयशसी[27] कल्पयति[28] ॥ तत्र सूत्रकारो मतभेदानाह ॥

[1] अग्ना° D. [2] तद्दहे° C. [3] सत्रिणा ध° C. [4] °सत्मनं TG. [5] चेति G.
[6] °रात्रो षो° C. [7] G om. [8] त्रि° G. [9] °सद्मन इति G. [10] यो निच्छन्न° G; भिविच्छन्न° C. [11] °द्मनमिति श° G. [12] °षयं D; C om. the passage एवं—°षयत्वं.
[13] सत्यव° G. [14] G inserts स. [15] °रानुपन्त G. [16] G om. तदपि. [17] °र्या C, D.
[18] त्वमसी° G. [19] ददपि C, D. [20] इत्यादि G. [21] भ्रातृव्यनि° G. [22] °यत्वं G; °यं C.
[23] हघ्नका° D. [24] न्यसत्रेति G. [25] कथमभि° G. [26] यशसो G. [27] °यशस्वो D. [28] विक° G.

[a] Cf. PV. Br. 9, 1, 12; 2, 8. [b] Cf. Sāyaṇa's Comm. on PV. Br. 9, 2, 12. [c] PV. Br. 9, 2, 10.
[d] PV. Br. 7, 3, 14. [e] Ait. Br. 4, 5, 5. [f] RV. 9, 101, 1. SV. I, 6, 2, 1, 1; II, 1, 1, 18, 1.
[g] PV. Br. 9, 2, 12. [h] RV. 9, 107, 1. SV. I, 6, 1, 3, 2; II, 5, 2, 12, 1.

अभिप्लवस्य द्वितीयेऽहनि भर्गो यश इति प्राग्विषुवतो व्यत्यासं स्यातामिति गौतमः ॥ ९ ॥

विषुवतः प्राक् त्रयोविंशतिरभिप्लवाः। तेषां प्रथमेऽहनि[1] भर्गो द्वितीये यशः पुनस्तृतीये भर्गस्तुर्ये यश इत्येवं व्यत्यस्येदिति ॥

ऊर्ध्वं च[2] त्रिष्वभिप्लवेषु[2] ॥ १० ॥

विषुवत ऊर्ध्वमपि त्रिष्वभिप्लवेषु भर्गो यश इति व्यत्यस्येदिति ॥

यशो भर्ग इति परेषु ॥ ११ ॥

ततः परेष्वष्टममासप्रभृति यशो भर्ग इति[3] व्यत्यासः[4] स्यात् ॥ एवं गौतममतमिति। मतान्तरमाह ॥

सकृद्द्विर्वा यशः पुरस्तादथोपरिष्टाद्भर्ग[5] इतरेष्वित्यपरम् ॥ १२ ॥

विषुवतः[6] पुरस्तात्सकृद्द्विर्वा यशः स्यात्। विषुवत उपरिष्टादपि[7] सकृद्द्विर्वा यशः[8] स्यात् ॥ अन्यत्र सर्वत्र एव[9] भर्ग एव स्यादिति मतान्तरमाह ॥

भर्गः पूर्वस्मिन्पक्षसि यश उत्तरस्मिन्नित्यपरम् ॥ १३ ॥

स्पष्टमिति ॥ अथाभिप्लवस्य चतुर्थेऽहनि वीङ्कं शुद्धाशुद्धीयं वेति कल्पकारः तत्राह ॥

एताभ्यामुक्ते वीङ्कशुद्धाशुद्धीये ॥ १४ ॥

भर्गयशो द्वयः[10] तत्राप्यनुसंधेय इत्यर्थः ॥

विषुवत ऊर्ध्वं वीङ्कमेव स्यादिति धानंजय्यः ॥ १५ ॥

गतमिति[11] ॥ अथाभिप्लवस्य[12] पञ्चमेऽहनि कल्पकारः। "अर्षा सोम द्युमत्तमः"[13][a] इति गायत्रं च यशं चापत्यसंतनिशाक्षरवर्णान्तान्युत्तरेष्वभिप्लवेष्विति। तस्यायमर्थः।

[1] G om. [2] चतुर्ष्वभि° G. [3] D and C om. [4] °सं G. [5] पुरस्तात्तथो° TG, G. [6] इतः G. [7] °रिष्टात G. [8] यं G. [9] G om. [10] द्वायः D; द्वयो C; न्यायः G. [11] G om. [12] अथ वा अभि° G. [13] द्युमन G.

[a] RV. 9, 65, 19. SV. I, 6, 1, 2, 7; II, 3, 2, 11, 1.

गायत्रादूर्ध्वं यण्वमुत्तरेषु द्वितीयादिष्वभिप्लवेषु यण्वस्थाने अपत्यादयः क्रमेण स्युरिति। तत्र प्रथमो यण्वयुक्तः स्यात्। द्वितीयोऽपत्ययुग्भवेत्। तृतीयः संतनिस्थानं। चतुर्थः[1] शाक्करवर्णयुक्[2] ॥ तत्र सूत्रकार आह ॥

पञ्चमेऽहनि यदहर्ग्रामेगेयं संतनिः स्यान्मानवात्पूर्वं वाम्रं[3] स्यात् ॥ १६ ॥

यदहरिति[4] यदा तृतीयेऽभिप्लवे पञ्चमेऽहनि ग्रामेगेयं संतनिः स्यात्। तदा बृहत्यां मानवात्पूर्वं वाम्रं[3] स्यात्। अन्यथा संतनिमानवयोस्तुल्यान्तयोः संनिपाते जामिदोषः स्यात्। तथा च वक्ष्यति। "सर्वेषां[5] तुल्यान्तसंनिपाते जामि"[a] इति। नन्वेवमानूपमपि पूर्वं स्यात्। न केवलं वाम्रं[3]। नैवं। "ऐडेन[6] बृहतीमारभन्ते"[b] इति। प्राकृतशास्त्रार्थसंपत्तये[7] वाम्रेणैव बृहत्यारम्भः। तस्येडानिधनत्वादिति। अत्र यण्वादिसामचतुष्टयं संतानगुणयोगात्संतनीति[8] व्यपदेष्टुं[9] शक्यं। तत्र "एष स्य धारया सुतः"[c] इत्यत्रोत्पन्नस्य[10] संतनिनः परिग्रहार्थं ग्रामेगेयमिति। विशेषणं[11] विस्पष्टार्थमिति[12] ॥ अथाभिप्लवस्य षष्ठेऽहनि कल्पकारः। "इन्द्रायेन्दो मरुत्वते"[d] इति गायत्रं चास्वसूक्तं च सकृदिषोवृधीयं[13] कुर्यात्। "मृज्यमानः सुहस्त्या"[e] इत्यौक्ष्णोरन्ध्रं[14] त्रिणिधनं चायास्यं सकृत्समन्तं कुर्यादिति। प्रतिमासं सकृत्सकृदित्यर्थः। कदा पुनस्तदिति चेत्। अत आह सूत्रकारः॥

इषोवृधीयसमन्ते पृष्ठ्यानन्तर्ये षष्ठे ॥ १७ ॥

षष्ठेऽहनीषोवृधीयसमन्ते पृष्ठ्यानन्तर्ये[15] सति कुर्यात्। पृष्ठ्यषडहात्पूर्वस्मिन्नभिप्लव[16] इत्यर्थः। एवं तावद्यण्वादिसंतनिभेदात् सामान्तराणां केषांचिद्भेदाच्चत्वारोऽभिप्लवाः

[1] तुर्यः D. [2] G reads after तस्यायमर्थः as follows: गायत्र्यादूर्ध्वं यण्वयुत्तरे द्वितिय्ये त्रितिय्यचतुर्थे भिप्लवेषु यण्वस्थाने पत्यं संतनिशक्करवर्णमिति क्रमेण स्यादिति प्रथमो यण्वं युक्त स्याद्वितियो पत्ययुक्त स्यात्त्रितिय्यसन्तनियुक्त स्यात्तुरिय्य शाक्करवर्णभाक्. [3] वामस्रं G. [4] यदाऊरिति G. [5] G ins. च. [6] ऐडे C. [7] प्र° G. [8] °गुणयोगेर्तसं° G. [9] पदेष्टुं D; पदेराशं C. [10] °त्रोपपन्नस्य G. [11] G ins. इति. [12] G om. वि. [13] संस्कृतीषो° G. [14] °न्ध्रे G. [15] पृष्ठ्या° G. [16] पृष्ठ्यात् ष° G; पृष्ठ्यः ष° D.

[a] 18, 1, 8. [b] PV. Br. 7, 3, 14. [c] RV. 9, 108, 5. SV. I, 6, 2, 4, 7. [d] RV. 9, 64, 22. SV. I, 5, 2, 4, 6; II, 4, 1, 11, 1. [e] RV. 9, 107, 21; SV. I, 6, 1, 3, 7; II, 4, 1, 12, 1.

परस्परभिन्नाः[1] । तत्र चतुर्थो योक्ताश्वयशःश्रुद्धाश्रुद्धीयशाक्करवर्णैषोवृधीयसमन्तैः[2] षड्भिः सामभिः प्रथमादभिप्लवाद्भिद्यते[3] । प्रथमस्य[4] द्वाविंशतभर्गोवीङ्क्यज्ञैश्चतुर्भिस्तस्माद्भिद्यते[4] ॥ एवं मध्यमावाह[5] । तत्र पूर्वस्मिन्पक्षसि षष्ठे मासे त्रिष्वेवाभिप्लवेषु[6] कर्तव्येषु सत्सु एकोऽभिप्लवो[7] लोपनीयः ॥ पुनरसाविति चेत् । अत आह[8] ॥

पूर्वस्मिन्पक्षसि[9] त्रिषु चतुर्थोऽभिप्लवो लुप्येत ॥ १८ ॥

अन्तालोपो[10] विवृद्धिर्वेति[11] न्यायादिति[12] ॥

एत[13] एवावृत्ता ऊर्ध्वं विषुवतोऽभिप्लवाः ॥ १९ ॥

एत एव चत्वारोऽभिप्लवाः उत्तरस्मिन्पक्षस्यावृत्ताः[14] स्युः । कथं । प्रथमः शाक्करवर्णयुक्तः स्यात् । द्वितीयः संतनियुक्तः स्यात् । तृतीयोऽपत्ययुक्तः । चतुर्थो यख्वयुक्त इति ॥

तेषां प्रतिलोममहान्युपेयुः ॥ २० ॥

तेषामभिप्लवानामहान्यपि प्रतिलोमानि कुर्युः । न केवलं[15] तानेवेति[15] ॥

पृष्ठ्यस्वरसाम्नां च ॥ २१ ॥

प्रतिलोममहान्युपेयुरित्यनुवर्तत इति ॥

दशरात्रसमीपे[16] त्रिषु चतुर्णामावृत्तानां प्रथमो लुप्येतेति[17] धानंजय्यः ॥ २२ ॥

दशरात्रसमीपे द्वादशे मास इत्यर्थः । तत्र त्रिष्वेवाभिप्लवेष्वावृत्तेषु कर्तव्येषु प्रथमः[18] शाक्करवर्णयुक्तो लुप्येतेति[19] ॥

उत्तम इषोवृधीयसमन्ते स्यातामिति ॥ २३ ॥

उत्तमे[20] यख्वयुक्ते[20] इषोवृधीयसमन्त स्यातामिति धानंजय्य इति ॥

[1] परस्परं भि॰ D. [2] ॰शुद्धियशाक्क॰ G; ॰वर्णेष्विषो॰ D. [3] प्रथमाभिप्लवात् भिद्यन्ते G. [4] प्रथमस्याह । विषुवतभर्गो॰ G; ॰द्यन्ते G. [5] ॰मावपि G. [6] G om. एव. [7] ॰व C, G. [8] G reads कः पुनरसौ चेदत आह. [9] G om. [10] अन्तलोपो G. [11] G om. वि. [12] G adds चतुर्थशाक्करवर्ण लुप्येतेति. [13] अत D. [14] ॰स्यावृत्तस्यावृत्ता G. [15] केवलतामेवेति C. [16] ॰पेषु TG. [17] लुप्यतेति TG. [18] ॰म D, C. [19] लुप्यतेति G. [20] उत्तमं च युक्ते G.

विपरीतमेतच्छाण्डिल्यायनस्य ॥ २४ ॥

स्पष्टमिति ॥

विषुवत्समीपे च त्रिषु ॥ २५ ॥

चकारो मतद्वयानुकर्षणार्थः । विषुवत्समीपे सप्तमे मासे च त्रिष्वेवाभिप्लवेषु कर्तव्येषु मतभेदेन प्रथम उत्तमो वाऽभिप्लवो लुप्यत इत्यर्थः ॥

अभाव इषोवृधीयसमन्तयोः ॥ २६ ॥

"सकृदिषोवृधीयं कुर्यात्"[a] इति वचनात्प्रथम एव मासे सकृत्करणं नान्यत्रेति स्वमतमेतदिति[1] ॥

भावस्त्वाचार्याणां भावस्त्वाचार्याणाम् ॥ २७ ॥

प्रतिमासं भावः स्यात्[2] प्रयोगः स्यादिषोवृधीयसमन्तयोरित्याचार्या इति ॥

चतुर्थः खण्डः ॥ ४ ॥

सप्तमः पटलः ॥ ७ ॥

इति च्छन्दोगसूत्रस्य दीपे धन्विविनिर्मिते ।
सप्तमे पटले स्पष्टं षोडश्यादि निरूपितं॥

[1] तदिति G [2] G. om.

[a] Cf. Comm. Introd. to 7, 4, 17.

अथातो गवामयनविकल्पाः[1] ॥ १ ॥

वक्ष्यन्त इति शेषः ॥

सर्वं ज्योतिष्टोमेनैके ॥ २ ॥

कृत्स्नमपि गवामयनमेकैकेनैव ज्योतिष्टोमेन पुनः पुनरभ्यस्तेन कार्यमित्येक इति ॥

अतिरात्रचतुर्विंशनवाहव्रतातिरात्रा[2] वा यथास्थानं स्युः शेषो ज्योतिष्टोमेन ॥ ३ ॥

चतुर्विंशं[3] द्वितीयमहः । अभिजित्स्वरसामानो[4] विषुवान् पुनरावृत्तास्त्रयः[5] स्वरसामानो विश्वजिदिति[6] नवाहः । व्रतं महाव्रतं[7] । एतानि त्रयोदशाहानि यथास्थानं स्युः[a] । अन्यत्सर्वं ज्योतिष्टोम इति ॥

अत्र वा गोआयुषी दशरात्रमित्युपाहरेत्[8] स[9] संवत्सरप्रबर्हः[10] शङ्खाहतमिति[11] च[12] ॥ ४ ॥

अत्रैव कल्पे गोआयुषी[13] दशरात्रं चावपेत् । तस्य संवत्सरप्रबर्ह[14] इति शाखान्तरे संज्ञा शङ्खाहतमिति[15] चेति ॥

नाना ऽहोभिर्वयं कल्पयामो[16] यथैतद्ब्राह्मणम् ॥ ५ ॥

पृष्ठ्याभिप्लवादीनां[17] नानाभूतैरहोभिर्वयं[18] कल्पयामः । यथैतत्पञ्चविंशब्राह्मणमधीमह इति[b] ॥

[1] ॰ल्प्यं G. [2] ॰रात्रं च॰ TD; ॰रात्रश्च॰ G; ॰रात्रच्छ॰ TG; ॰र्विंशं न॰ G, TG, Tg, C; ॰व्रतात्रि॰ D, TD; ॰व्रतानि॰ G. [3] C reads अतिरात्रचतु॰. [4] अभिजिदतिरात्रत्स्वर॰ C; अभिजित्तृतियस्वर॰ G. [5] ॰श्चावृत्या त्रय G. [6] ॰जिति C, D. [7] G ins. अतिरात्रं. [8] ॰पहरेत् TD, G. [9] G om. [10] ॰प्रवहः D, TD; प्रव्रहः G, TG. [11] शाखा॰ G. [12] चेत् TG. [13] गौआ॰ C. [14] ॰प्रवह D, G; प्रवर्हर्ष C. [15] ॰शाखाहत॰ G; शंखाऊत॰ D. [16] विकल्प॰ TG. [17] ॰स्रवादि C, G. [18] ॰भूतो ऽहो॰ C, D.

[a] Cf. ṢV. Br. 3, 12. [b] Cf. PV. Br. 24, 20, 1.

अतिरात्रमुभयसामानं[1] कुर्वन्नान्धीगवादुत्तरे औदलबृहती ॥ ६ ॥

अत्र शाखान्तरे अतिरात्र[2] उभयसामा[3] स्यादिति ब्राह्मणं। तस्य क्लृप्तिरेतेनोच्यते[4]। उभयसामानं बृहद्रथंतरसामानं कर्तुमिच्छन्नान्धीगवस्योपरिष्टादौदलबृहती[5] कुर्यादिति[6] ॥

षोडशिमांश्चेदौदलस्थाने नानदम्[7] ॥ ७ ॥

यदि षोडशिमानुभयसामा[8] चातिरात्रः[9] स्यात्। तदानीमौदलस्थाने नानदं कुर्यादिति। ननु[10]। एवमार्भवे[10] पवमाने सप्तदशस्तोमोऽतिरेकः स्यात्। अधिकसामा[11] वा[11] स्यात्[11]। अत आह ॥

पूर्वो बृहतः सामतृचः ॥ ८ ॥

यदा तृचे सामत्रयमेकैकस्यामृचि पृथगानन्तर्येण[12] गीयते। तदा तत्सामतृच इत्युच्यते। बृहतः पूर्वः सामतृचः कार्यः। तद्यथा "पुरोजिती वो अन्धसः"[a] इति श्यावाश्वं[13] प्रथमायामान्धीगवं द्वितीयायामौदलं तृतीयायां बृहन्तिसृष्विति[14]। एवं बृहतः पूर्वाणि त्रीणि सामान्येकर्चानि[15] कुर्यादित्यर्थः ॥

चतुर्विंशमरथंतरमेके[16] ॥ ९ ॥

चतुर्विंशं द्वितीयमहः। तद्रथंतररहितमेक[17] इति ॥

रथंतरपृष्ठं वा बृहदनुष्टुप्कम् ॥ १० ॥

अथवा चतुर्विंशं रथंतरपृष्ठं कृत्वा बृहदनुष्टुप्कं कुर्यात्। "पुरोजिती वो अन्धसः" इत्यनुष्टुभि बृहत्साम यस्य। तद्बृहदनुष्टुप्कमिति। तत्र क्रौञ्चस्थाने[18] बृहत्कार्यं न[19] पुनरधिकस्तोमविरोधात्[20]। अथ चतुर्विंशमहरग्निष्टोम उक्थ्यो[21] वेति ब्राह्मणे विकल्पितं[b] ॥ तत्राग्निष्टोमपक्षे यथा स्तोत्रीयाभिरन्तर्भवितोक्थ्यमहः[22] स्यात्। तथा दर्शयति ॥

[1] °मुभयतःसामानं D, TD. [2] रात्रा G. [3] °साम C, G. [4] क्लृप्तिकरणेनो° C. [5] कर्त्तव्यमिच्छ° D. [6] G reads कुर्यात्। औदलक्लृप्तिस्तोमसंख्याविधार्था अविरोधार्था अविरोधश्च दर्शयिष्यतीति. [7] नानादं TG. [8] °सामानि G. [9] वाति° G. [10] न त्वेवमा° G. [11] °सामावापात् G; °सामान्यात् C. [12] C om. ण. [13] श्यावाश्वयं G. [14] बृहत् मूर्तिष्विति G. [15] सामानि शुकर्चानि G. [16] °विंशं र° TD. [17] तद्रथन्तरमेक G; °थंतरसहि° C. [18] क्रौञ्चस्य स्थाने G. [19] G om. [20] °कं स्तो° D, G; °विधानात् G. [21] उकथ्या D, G. [22] °कथ्यमभाव G.

[a] RV. 9, 101, 1-3. SV. II, 1, 1, 18, 1-3. [b] Cf. PV. Br. 4, 2, 11. 13.

अग्निष्टोमसंस्थं चेत्त्रिंशान्याज्यानि षट्त्रिंशानि[1] पृष्ठानि ॥ ११ ॥

उक्थ्यपक्षे त्रीणि शतानि[2] षष्टिश्च स्तोत्रीया भवन्ति। अग्निष्टोमेऽपि तथैव ताः संपादयेत्। कथं। त्रिंशान्याज्यानि स्युः। षट्त्रिंशानि पृष्ठानि स्युः। इतराणि चत्वारि चतुर्विंशान्येवेति ॥ पुनरपि प्रकारचतुष्टयं चतुर्भिः[3] सूत्रैराह ॥

षट्त्रिंशानि वा होतृकसामानि[4] ॥ १२ ॥

होत्रका मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकाः। तेषामनुशंसनीयानि[5] सामानि। पूर्वयोः सवनयोस्तोत्राणि त्रीणि तानि षट्त्रिंशानि स्युः। इतराणि षट्चतुर्विंशान्येवेति[6] ॥

पृष्ठानां वाऽष्टाचत्वारिंशानि[7] ॥ १३ ॥

होत्रकसामानीत्यनुवर्तते। चतुर्णां पृष्ठानां मध्ये यानि होत्रकसामानि तान्यष्टाचत्वारिंशानि स्युः। इतराणि नव स्तोत्राणि चतुर्विंशान्येवेति ॥

सर्वाणि वा त्रिंशानि स्तोत्राणि ॥ १४ ॥

सर्वाणि वा द्वादश स्तोत्राणीति ॥

व्यत्यासं वा त्रिणवत्रयस्त्रिंशौ ॥ १५ ॥

द्वादशस्वपि स्तोत्रेष्वादित आरभ्य[8] त्रिणवत्रयस्त्रिंशौ[9] व्यत्यासं स्यातामिति ॥

एतदन्तरुक्थ्यम[10] ॥ १६ ॥

एतच्चतुर्विंशमहरग्निष्टोमसंस्थं यथोक्तैः पञ्चभिः प्रकारैरन्तरुक्थ्यं। अन्तरुक्थ्यं[11] अन्तर्भावितोक्थ्यमित्याचक्षत इति ॥

अभिप्लवं[12] स्वरसाम्नश्च[13] ज्योतिष्टोमे[14] तन्त्र[14] एके कल्पयन्ति ॥ १७ ॥

ज्योतिष्टोमिकान्येव सामानि[15] गृहीत्वा तत्रैव[16] विशेषाम्नाने[17] निबन्धनं। विकारं कुर्वन्त्यभिप्लवस्वरसाम्नामिति। अभिप्लवस्य पृष्ठ्यः प्रकृतिः। षडहत्वसामान्यात्पूर्वोपदेशाच्चेति[18] कल्पकार इति ॥

[1] षट्षट्त्रिंशानि G. [2] शतानीति उक्थ्यपक्षे त्रीणि शतानि G. [3] त्रिभिः C. [4] होतृकानि सामानि TG. [5] °यानीति यानि G. [6] G om. षड्. [7] G om. this Sūtra and its Comm. [8] आरभ्य G. [9] त्रीणि व° G. [10] एतद° C; एदन्तदन्तरु° TG; °कथं TD. [11] C om.; °कथं D. [12] °प्लव G. [13] स्वरा° D. [14] °ष्टोमतत्र TG. [15] शृक्सामानि G. [16] C om. [17] °म्नान G; C om. [18] °त्पूर्णोप° C.

तथा सतां शाण्डिल्यायनिनः षडहविभक्तीरनुकल्पयन्ति ॥ १८ ॥

तथा सतां ज्योतिष्टोमिकतन्त्राणामेव सतां केचित् षडहविभक्तीरनुकल्पयन्तीति[1]। अग्निविभक्तिरिन्द्रविभक्तिः स्वरविभक्तिर्निधनविभक्तिरिडाविभक्तिरित्येवं[2] विभक्तिपञ्चकं[3] पृष्ठ्ये[3] षडहे[3] ब्राह्मणे क्लृप्तमिति[a] ॥

द्विविधमभिप्लवमेके ॥ १९ ॥

राथंतरी बार्हती च द्वे विधे यस्य। स द्विविध[4] इति ॥ तमेव दर्शयति ॥

उपवत्यग्न्यवती[5] च व्यत्यासं प्रतिपदौ[6] राथंतरबार्हतानि[7] चाज्यानि[8] ॥ २० ॥

"अग्न आयाहि वीतये"[b] "अग्निं दूतं वृणीमहे"[c] इत्येतानि व्यत्यासं स्युरिति[9] ॥

आज्यप्रतिपदौ[10] वा ॥ २१ ॥

आज्यप्रतिपद[11] इति[11] षष्ठीसमासोऽयं[12]। आज्यानां याः[13] प्रतिपदः। प्रथमान्याज्यस्तोत्राणि[14] तानि वा व्यत्यासं[15] राथंतरबार्हतानि स्युः। उत्तराणि[16] त्रीणि[17] आज्यानि[18] कल्पोक्तानि[19] षाडहिकान्येव[19] स्युरिति। "आज्यप्रतिपदा[20] वा" इति क्वचित्पाठः[d]। आज्यानि[21] प्रतिपदश्चेत्याज्यप्रतिपत्समाहारद्वन्द्वे तृतीयैकवचनं। आज्यप्रतिपदा वा कल्पयेदिति सूत्रशेषः। अर्थस्तु पूर्वोक्त एवेति। अथो ह्रवविधस्य साधारणमाह ॥

[1] °भक्तिमनु° G. [2] G om. निधनविभक्तिः; C repeats स्वरविभक्तिः for इडावि°; °त्येकं D. [3] °पञ्चमक्रमपृष्ठ्यष्षडहे G. [4] द्विध D. [5] °ग्रवती G; उपवदग्न्या इति TG; °वतीं TD. [6] °पा° G. [7] राथारं बा° TD; राथंतरं बा° D. [8] वाज्यानि TG; चान्याज्यप्रतिपदावेति G (cf. Sūtra 21). [9] In G the Comm. runs as follows: "उपास्मै गायता नरः" इत्युपवती "पवस्व वाचो अग्रियः" इत्यग्न्यवती [the MS. has अग्न्यवतीत्यग्न्यवती] बार्हती एते बहिष्पवमानप्रतिपदौ व्यत्यासौ स्यातां। तथा राथन्तराणि "अग्न आ याहि वीतये" इत्याज्यानि "अग्निं दूतं वृणीमहे" इति च बार्हतानि व्यत्यासं स्युरिति. [10] अज्य° D; °पदा G, TG; °पदौ D, TD. [11] G om. [12] वेति यं G. [13] G om. [14] °त्राणीत्यर्थः G. [15] G om. [16] इतराणि G. [17] G om. [18] अज्यानि D. [19] कल्पोक्तान्येव G. [20] अज्ये प्र° D; the rest of the Comm. runs in G thus: केचिदाज्यप्रतिपदा वेति तृतीयान्तं [त्रितिया°] पठन्ति तदानीं कथेदित्याज्याहारः जातावेकवचनं पूर्वोक्त एवार्थ इति अथो etc. [21] अज्यानि D.

[a] PV. Br. 10, 7-11. [b] RV. 6, 16, 10. SV. I, 1, 1, 1, 1; II, 1, 1, 4, 1. [c] RV. 1, 12, 1. SV. I, 1, 1, 1, 3; II, 2, 1, 6, 1. [d] Cf. *v.l.* in G and TG, and Lāṭy. 4, 5, 20 (corresponding to Drāhy. 8, 1, 21-25). Agnisvāmin, in his Comm. on this Sūtra, explains आज्यप्रतिपदावौशनकावे as °पदौ औ°, and not as °पदा वा औ°.

औशनकावे अन्त्ये ॥ २२ ॥

औशनकावे पवमानयोरन्त्यसामनी[1] षट्स्वपि दिवसेषु स्यातामिति ॥

पार्थयामे वा[2] बार्हतानाम् ॥ २३ ॥

अथवा बृहत्पृष्ठानामह्नां पार्थयामे[3] सामनी पवमानयोरन्त्ये[4] स्यातामिति ॥

स्वयोन्यभीवर्तौ[5] रथंतरपृष्ठेषु ॥ २४ ॥

"तं वो दस्ममृतीषहम्"[a] इत्येतासु स्वयोनिष्वभीवर्तः स्यात् ॥

श्यैतर्क्षु[6] बृहत्पृष्ठेषु ॥ २५ ॥

"अभि प्र वः सुराधसम्"[b] इत्येतास्विति[7]। एवंविधा द्वयमुक्तं ॥ अथ पृष्ठ्यषडहम-धिकृत्याह ॥

व्यूढं पृष्ठ्यमेके[8] ॥ २६ ॥

कल्पकारास्तु समूढमेवेच्छन्ति। छन्दोमसंयोगाभावात्[9]। छन्दोमैरपि[10] सहैव व्यूह-स्वरूपस्य[11] ब्राह्मणे क्लृप्तत्वाच्चेति ॥

तस्य समूढात्प्रथमस्याह्नो बहिष्पवमानम्[12] ॥ २७ ॥

"अस्य प्रत्नामनु द्युतम्"[13c] इति[13] नवर्चस्य बहिष्पवमानस्य नवाहयोगकारितत्वा-च्छन्दोमैर्विच्छिन्ने[14] व्यूढषडहे समूढप्रयुक्तमेव बहिष्पवमानं युक्तमिति[15] ॥

समूढमेके रथंतरबृहत्पृष्ठम् ॥ २८ ॥

स्पष्टमिति ॥

नाना पृष्ठे वोत्तरे चतुरहे रथंतरबृहतीव्यत्यासं पवमानेषु ॥ २९ ॥

अथवा बृहद्रथंतरवैरूपवैराजशाक्वररैवतैर्नाना भूतपृष्ठे षडहे व्यूढे समूढे चोभयो-रप्युत्तरस्मिंश्चतुरहे पवमानेषु रथंतरबृहतीव्यत्यासं स्यातामिति ॥ कथमित्याह ॥

[1] °सामानि C, D. [2] TD om. [3] प्रा° C, D, G. [4] °मानांत्ये C; °माने न्त्ये G. [5] स्वर्यो° TG. [6] श्वैतत् G. [7] इत्यन्तासु G. [8] पृ४° TG. [9] छन्दोयोगकारित्वाच्छ-न्दोमानामभावाच्च G; the rest of the Comm. is missing in G. [10] छंदोमयोरपि C. [11] व्यूढस्य° C. [12] G om. this Sūtra. [13] द्युमत्रमिति D; द्युतमस्य C. [14] °मयोर्वि° C. [15] G leaves out most of this Comm., and has only व्यूढे पि षडहे षडहप्रयुक्तमेव व°.

[a] RV. 8, 88, 1. SV. I, 3, 1, 5, 4; II, 1, 1, 13, 1.

[b] RV. 8, 49, 1 (Vālakh. 1, 1). SV. I, 3, 1, 5, 3; II, 2, 1, 13, 1. [c] RV. 9, 54, 1. SV. II, 1, 2, 16, 1.

बृहतीषु[1] रथंतरमनुष्टुप्सु बृहत् ॥ ३० ॥

तृतीयपञ्चमयोरह्नोर्माध्यन्दिने पवमाने[2] बृहतीष्वृक्षु रथंतरं चतुर्थषष्ठयोरह्नोरार्भवे पवमाने अनुष्टुप्सु बृहदित्यर्थः ॥

ते द्वितीये ॥ ३१ ॥

ते बृहद्रथंतरे तत्र द्वितीये साम्नि अधिके स्यातामिति ॥

बृहदुत्तमं समूढे ॥ ३२ ॥

समूढे[3] षडहे बृहत्साम[4] द्वितीयं स्यात् । किं तु अनुष्टुभि क्रियमाणानां साम्नामुत्तमं स्यात्[5] । आगन्तूनामन्ते निवेश इति न्यायात् । ननु च । व्यूढेऽपि तुल्यो[6]ऽयं[7] न्यायो रथंतरे च । नैवं । व्यूढपक्षे पवमानान्त्यस्य[8] साम्नो निधनवत्त्वात्तेन सह[9] बृहतः संनिपाते[10] जामिदोषः स्यात् । समूढे[11] तु[11] स्वरं[11] पवमानान्त्यमिति न दोषः । तथा रथंतरस्योत्तमत्वेऽप्याष्कारनिधनेन[12] संनिपाताज्जामिदोषः । तेन द्वितीयमेव रथंतरं कार्यमिति ॥

आष्कारनिधनात्पूर्वं[13] कौल्मलबर्हिषम् ॥ ३३ ॥

तृतीयेऽह्नि बृहत्यां रथंतरागमे क्रियमाणे कौल्मलबर्हिषमप्यागमयितव्यमित्यर्थः ॥

आन्धीगवाच्छ्यावाश्वम्[14] ॥ ३४ ॥

तथा चतुर्थेऽह्नि बृहदागमेऽपि श्यावाश्वमागमयितव्यमान्धीगवात्पूर्वमिति[15] ॥

उपोत्तमं समूढे ॥ ३५ ॥

समूढे[16] बृहदुत्तमं कार्यमित्युक्तं । तस्योत्तमस्य बृहत्समीपे[17] ततः पूर्वं श्यावाश्वमित्यर्थः । अन्यथा नानदश्यावाश्वयोः स्वारत्वाज्जामिदोष[18] इति[19] ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ५ ॥

[1] बृहतीति G. [2] G om. [3] °हे D. [4] °म्नः D; °म्न C. [5] स्यादन्ते निवेश इत्यर्थः G. [6] तु उभयो C. [7] पि G. [8] G om. स्य. [9] G om. [10] G ins. न. [11] G om. [12] पि अष्का° D; °णिध° C. [13] अष्का° D. [14] अधींग° D; °गवाच्छ्या° TG; °गवाकया C. [15] °माधींग° D; °माधीगवस्य पुरस्तादिति G. [16] G om. [17] बृहत्सामीपे C. [18] स्व° G. [19] C adds भानवांतः.

आनूपोपक्रमा[1] बृहती पञ्चमे ॥ १ ॥

[2]पञ्चमेऽह्नि बृहत्यामानूपसाम्नोपक्रमः कार्यः । तत उत्तरं रथंतरं "ते द्वितीये"[a] इति वचनादिति ॥ तदनन्तरमानवे[3] प्राप्ते आह ॥

मानवात्पूर्वं हारायणम् ॥ २ ॥

जामिदोषपरिहारार्थं[4] पूर्वमित्युक्तमिति ॥

मधुश्चुन्निधनादाकूपारम्[5] ॥ ३ ॥

षष्ठेऽहनि "सोमाः पवन्त[6] इन्दवः"[b] इत्यनुष्टुभि मधुश्चुन्निधनात्पूर्वमाकूपारमागमयितव्यमिति[7] ॥

उपोत्तमं समूढे[8] ॥ ४ ॥

व्याख्यातमेतदिति ॥ ननु एवमधिकसामदयागमे स्तोत्रीयाषट्कमतिरिक्तमिति[9] स्तोमातिरेकः[9] स्यात् । अत आह ॥

बृहतः पूर्वे त्रय एकर्चाः[10] ॥ ५ ॥

बृहतः पूर्वाणि[11] त्रीणि[12] सामानि एकर्चानि कुर्यात् । तत्र स्तोत्रीयाषट्कं लुप्तमिति न स्तोमविरोध इति ॥

रथंतरादुत्तरे ॥ ६ ॥

त्रय इत्यनुवर्तते । रथंतरादुत्तरे त्रय एकर्चाः कार्या[13] इति ॥

[1] अनू॰ D, and TD (so corr. from आनू॰); ॰क्रमात् TG; ॰क्रमो G. [2] G ins. रथन्तरगमे क्रियमाणे. [3] तदंतर॰ D. [4] ॰र्थः D. [5] मधुश्च॰ TD; ॰श्चरन्नि॰ TG; ॰कूपारं D. [6] पवमान G. [7] मधूचू॰ G; C om. आकूपारं. [8] ॰ढं C. [9] ॰रिक्तस्तोमा॰ G. [10] ॰र्च्याः G. [11] पूर्वं G. [12] त्रयाणि G. [13] G om.

[a] 8, 1, 31. [b] RV. 9, 101, 10. SV. I, 6, 2, 1, 4; II, 4, 1, 20, 1.

षष्ठे च बृहतो व्यूढे ॥ ७ ॥

व्यूढे[1] षडहे षष्ठे चाहनि[2] बृहत[3] उत्तरे[3] त्रय एकर्चाः स्युः । न पूर्व इति ॥ ननु[4] च तृतीयेऽह्नि बृहत्यां षट्सामानि । तत्र त्रयाणामेवैकर्चत्वविधानादितरेषु[5] त्रिषु[6] तृचेषु क्रियमाणेषु पुनरपि स्तोमातिरेकः स्यात् । अत आह ॥

नित्यौ च[7] शशकर्णौ तृतीये ॥ ८ ॥

तृतीयेऽहनि शशकर्णौ च नित्यौ कार्यौ । शशकर्णतृचैकर्चक्लृप्तिः शशकर्ण इत्युच्यते । यथा शशकर्णस्य[8] मूलमग्रं च तनू[9] भवतः । मध्यं स्थूलं । एवं बृहत्यां सामजातस्यादितोऽन्ततश्च द्वावेकर्चौ तनू[10] भवतः[11] । मध्ये तृचे क्रियमाणं साम स्थूलं भवति । एवं क्लृप्तबृहतो शशकर्णक्लृप्तेति बहुशो व्यपदिश्यते । तेनात्र बृहत्यां पुनरप्यादितोऽन्ततश्च द्वावेकर्चौ कार्यौ । तदेवं पञ्चैकर्चाः ।रथंतरात्पूर्वमेकं[12] परस्ताच्चत्वारि रथंतरमेकं[13] मध्ये तृचे कार्यमिति । शशकर्णाविति द्विवचनं किमर्थमुच्यते कल्पकारेण तृतीयेऽहनि अभीवर्तकालेये अधिके क्लृप्ते । तद्यथा । तृतीयाह्नः "अभि सोमास आयवः"[a] इति पौरुमद्गं[14] प्रथमायां तस्यामेवाभीवर्तकालेये द्वितीयायां गौतमं तृतीयायां समानमितरमिति । तदानीमपि शशकर्णौ नित्य[15] इत्येवमर्थं द्विवचनमिति[16] ॥

पृष्ठ्ये[17] ऽभीवर्तकालेये[18] बृहतीष्वनुकल्पयेदिति गौतमः ॥ ९ ॥

"यत्सामावसृजेयुरव स्वर्गाल्लोकात्पद्येरन्"[b] इति गवामयने प्रत्यहमकरणे[19] दोषश्रुतेरभीवर्तस्तावन्नित्यः[20] । कालेयमपि तृतीयसवनसंतानार्थं[21] तथा[21] श्रवणान्नित्यमेवेति मन्यन्त[22] इति[23] ॥

[1] व्यूहे D. [2] वाहनि D. [3] बृहदुत्तरे C. [4] न G. [5] °णामेकैक° C; °वैकर्च्यविधा° G. [6] G om. [7] TG om. [8] °र्णस्य C. [9] तनु C, D. [10] तनु C. [11] भवः C. [12] D corr. कं to वं. [13] °तरेतर° C. [14] D alters पौरुमत्ग to पौरुतग. [15] °त्यं D. [16] This Comm. runs in G thus: यथा त्रिति[ये] हनि बृहत्यां ब्राह्मणविहितसामचतुष्टयपक्षे प्रथमोत्तमे सामनी शशकर्णौ शशकर्णस्य मूलाग्रसदृशौ एकर्चावित्यर्थः तद्वद्त्रापि तौ नित्यौ एकर्चावेवेत्यर्थः ॥ शशकर्णसादृश्यात् शशकर्णशब्दः यथा कर्णस्य मूलमग्रं च तनू भवतः मध्यमं स्थूलं एवं क्लृप्तानि एकर्चान्यृचस्थानि शशकर्ण इत्युच्यते । तथा च निदानकारः तृचप्रथमायां वयमेकर्चं कृत्वा तस्मिन्नेव तृचे द्वे तृचस्थे मध्ये पुनरध्यायान्तत एकर्चान्तं शशकर्णक्लृप्ता बृहतीत्याचक्षत इति तदेव पञ्चैकर्चाः रथन्तरपूर्वं एकः उत्तरे चत्वार इति । [17] पृष्टे C. [18] भिव° G, TG. [19] प्रत्यहं करणे G. [20] °भिव° MSS.; °न्नित्यर्थः G. [21] °र्थतया D. [22] मंतव्य C. [23] After कालेयमपि G reads ब्राह्मणे त्रितियसवनसंतानार्थं तथोत्पन्नत्वांनित्यमेवेति ।

[a] RV. 9, 107, 14. SV. I, 6, 1, 3, 8; II, 2, 2, 9, 1. [b] PV. Br. 4, 3, 6.

नेति धानंजय्यः ॥ १० ॥

अभीवर्तः पृष्ठ्ये[1] षडहे षडहविभक्तिनाशप्रसङ्गात्[2] ब्रह्मसामत्वेन न कर्तव्यः । नापि पवमाने श्रुत्यभावादिति[3] ॥

व्यूहन्नानुकल्पयेदिति[4] शाण्डिल्यायनः ॥ ११ ॥

व्यूहन्निति[5] शस्त्रं[6] । तं व्यूढपृष्ठं[7] कुर्वन्नभीवर्तकालेये न कुर्यात् प्रत्यक्षब्राह्मणविरोधात् । समूढे तु[8] कुर्यादेवेति । एवं पृष्ठ्याभिप्लवयोर्विशेषा उक्ताः ॥ अथाभिजित्प्रभृतिषु[9] विशेषमाह ॥

एकविंशत्यहःकारिण[10] उपरिष्टादभिजितः पृष्ठ्यमुपयन्ति[11] प्राक् च[12] विश्वजितः स्वरसाम्नश्चोक्थ्यान्[13] ॥ १२ ॥

ये मध्ये गवामयनमेकविंशतिरात्रं सत्त्रं कुर्म इति मन्वानास्तत्सदृशमभिजिदादिकं[14] कल्पयन्ति । त[15] एकविंशत्यहःकारिणः[16] । ते अभिजिदादीनां क्रमान्यथाकरणं[17] संस्थान्तरं च कल्पयन्तीत्यर्थः[18] । ननु च । अभिजिद्विश्वजितौ एकविंशतिरात्रे[19] न स्तः तत्स्थानेऽतिरात्रयोः पाठादिति कथमेकविंशत्यहःकारित्वं । सत्यं[20] । तावन्मात्रमेव भिद्यते । अन्यत्सर्वं तद्वदेव[21] भवतीत्येकविंशत्यहःकारित्वमुक्तमिति[21] ॥

अभिजिद्विश्वजितौ व्यतिहरन्त्येके ॥ १३ ॥

स्पष्टमिति ॥ अथ यदि रथंतरपृष्ठोऽभिजित्स्यात् । तदा विशेषमाह ॥

अभिजितो रथंतरपृष्ठस्य[22] राथंतरी प्रतिपद्धोतुराज्यं च ॥ १४ ॥

स्पष्टमिति ॥

[1] पृष्ठ्यः C. [2] °भक्तिनाशप्र° C. [3] G has the following reading for this Comm.: अभिवर्त्तस्तावत्पृष्ठ्ये षडहे ब्रह्मसामत्वेन कर्त्तव्यः । प्रत्यहं पृथगेव ब्रह्मसामभिष्षडहविभक्तिक्लृप्तेनापि पवमाने कार्य्याः श्रुत्यभा[वा]दिति । [4] व्यूहं ना° G; D corr. ह to ढ. [5] व्यूहमिति G. [6] यत्र C; शत्र D. [7] व्यूढः पृष्ठ्यं C, D; व्यूढं पृष्ठं G. [8] न C. [9] °तीषु D. [10] °त्यहाका° D, TD; कारिणा C. [11] G ins. इति. [12] G om. [13] °क्थान् G, TG. [14] मन्वानास्तत्र स° C. [15] G om. [16] °कारिम C, D. [17] कार्य्याः अन्यथा अन्यथाकरण G. [18] °यन्नित्य° C; °यतीत्य° G. [19] °विंशत्यतिकारिणे C. [20] G om. [21] तद्वदेवेतित्येक° G. [22] °पृष्ठ्यस्य C, D, TD.

"अभि वायुम्"[a] इत्यौशनम्[1] ॥ १५ ॥

"अभि वायुम्" इति पार्थं कल्पकारोक्तमपोह्यौशनमन्त्यं[2] कार्यमिति ॥

ज्योतिष्टोमं परम् ॥ १६ ॥

औशनात्परं पृष्ठादिकं ज्योतिष्टोमिकमेव[3] कुर्यादिति ॥ तत्रापवादमाह ॥

सुज्ञानमुष्णिहि[4] ॥ १७ ॥

पौष्कले प्राप्त इदं वचनमिति[5]। यदि[6] ज्योतिष्टोमिकं प्रवर्तते। तदा "पुरोजिती वो अन्धसः"[b] इति श्यावाश्वान्धीगवयोरेव ज्योतिष्टोमिकत्वादभिजिति[7] चार्भवस्य[8] त्रिणवस्तोमत्वात्[8] सामान्तराभावे स्तोमसंपत्तिर्न[9] स्यात् ॥ अत आह ॥

श्यावाश्वात्पूर्वे गौरीवितबृहती ॥ १८ ॥

गौरीवितबृहतोरधिकयोरनुष्टुभि[10] निवेशः कार्यः। स[11] सुज्ञाने[12] च तृचस्थे[13] "उष्णिक्ककुभोस्तृचैकर्चत्वमव्याघातेन"[c] इति वचनात्तेन त्रिणवस्तोमसंपत्तिरित्यर्थः[14] ॥ अथ[15] स्वरसामसु विशेषमाह ॥

स्वयोनिनी[16] रथंतरबृहती स्वरसामस्वेके[17] ॥ १९ ॥

अत्र कल्पकारस्तु बृहद्रथंतरयोः[18] स्वयोनिव्यतिरेकेण[18] स्तोत्रीयमकल्पयत्[19]। "यज्जायथा[20] अपूर्व्य"[d] इति रथंतरं "मत्स्यपायि[21] ते महः"[e] इति बृहदिति। एके तु स्वयोनिमेवेच्छन्तीति[20]। "यज्जायथा अपूर्व्य"[22] इत्यस्यां योनौ[23] स्वरसंज्ञकानि[23] चत्वारि[23] सामानि सन्ति[24]। तानि[25] येषु[25]। ते स्वरसामान[26] इति[27]। अत्र[27] कल्पकारस्तानि[27] स्वराण्यार्भवेषु[28] प्रत्यहं[29] पृथगेवोपकल्पयत्[30] ॥ सूत्रकारस्तु तेषां पृष्ठत्वमपीच्छन्[31] तत्प्रकारं[31] दर्शयति ॥

[1] G om. this Sūtra. [2] कल्पकारोक्तमप्यपोह्यौशन° G. [3] यत्तत् सर्वं ज्योतिष्टोमकर्मेकं G. [4] °ष्णीभि TG; °ष्णीहि C; TD alters हि to ही. [5] G om. इति. [6] G om. [7] °ष्टोमत्वात् G. [8] G om. [9] °पत्ति G (om. न). [10] °वृहतयोर° G. [11] सस्वपि G. [12] विज्ञाने (or पि°?) D. [13] G ins. कुर्यात्. [14] स्तोत्रियादशकं। सजातमिति तृणवत् स्तोमसंपत्तिरिति G. [15] G om. [16] °योनिन TG; °योनीति G. [17] °स्वैके G; °स्वेके TG. [18] °रयोरिति व्यति° G. [19] °यं कल्पयन् D. [20] यज्जायथा—°च्छन्तीति is missing in G. [21] मत्सपाद् C; मत्स्यापायि D. [22] °र्व G. [23] स्वयोनौ G; G reads चत्वारि स्वरसंज्ञिकानि. [24] भवन्ति G. [25] G om. [26] °साम्नः G. [27] G om. [28] अतिस्वरान्या° G. [29] G om. [30] °यन् C; कल्पकारेण क्लृप्तानि G. [31] पृष्ठच्छन्दस्त्वप्रकारं G.

[a] RV. 9, 97, 49. SV. II, 6, 2, 18, 1. [b] RV. 9, 101, 1. SV. I, 6, 2, 1, 1; II, 1, 1, 18, 1. [c] 16, 3, 27. [d] RV. 8, 89, 5. SV. II, 6, 2, 19, 1. [e] RV. 1, 175, 1. SV. II, 6, 2, 20, 1.

स्वरपृष्ठाश्चेत्स्वारसामिकेषु[1] पृष्ठस्तोत्रीयेषु यथास्वम् ॥ २० ॥

यदि स्वरसामानः[2] स्वरपृष्ठाश्चिकीर्षिताः[3] । तदा स्वरसामसंबन्धिषु बृहद्रथंतरपृष्ठस्तोत्रीयेषु[4] कल्पोक्तेषु[5] "यज्ञायज्ञा अपूर्व्य" "मत्स्यपायि[6] ते महः" "प्रत्यस्मै पिपीषते"[a] इत्येतेष्वेव स्वराणि पृष्ठानि कुर्यात् । यथा[7] यथास्वमिति कोऽर्थः । यस्मिन्नहनि यत्स्वरमार्भवे क्लृप्तं । तस्मिन्नहनि तत्स्वरं पृष्ठे[8] कुर्यादिति ॥ तदानीं[9] विशेषमाह[9] ॥

स्वराणि[10] चार्भवान्त्यानि ॥ २१ ॥

अत्र कल्पकारेणार्भवेष्वनुष्टुभि गौरीवितं तृचे कुर्यात् । तत्स्थाने सामतृचं वेति पचद्वयमुक्त्वा प्रथमे पक्षे ऐडं कावमन्त्यं द्वितीये पक्षे स्वारं कावमित्युक्तं । तद्यथा । ऐडं कावमन्त्यं स्वारं यदि विकल्पयेदित्यादि । तत्र स्वरपृष्ठत्वपक्षे स्वराण्येवार्भवान्त्यानि स्युः । न पुनरैडानीत्यर्थः स्वरपृष्ठत्वपक्ष एव कर्तव्यविशेषमाह[11] ॥

द्वैगतगौतमयोः स्थाने रथंतरम् ॥ २२ ॥

प्रथमोत्तमयोः स्वरसाम्नोर्माध्यन्दिने[12] पवमाने द्वैगतगौतमयोः स्थाने रथंतरं[13] कुर्यादिति[13] ॥

अन्तरिक्षस्य गौतमम्[14] ॥ २३ ॥

अन्तरिक्षस्य साम्नः स्थाने गौतममिति ॥

स्वरस्य बृहद्द्वितीये ॥ २४ ॥

द्वितीये स्वरसाम्न्यार्भवे पवमाने स्वरस्य स्थाने बृहत्कुर्यादिति ॥

[1] ०पृष्ठ्य० D, TD. [2] ०म्न: C. [3] ०पृष्ठा स्युः G. [4] ०तरस्तोत्रीयेषु G. [5] G om. [6] ०पा इ C. [7] G om. [8] पृष्ठं G. [9] ०नीमपि त्रिष्वेवमा[ह] G. [10] स्वा० C, TG, and originally TD. [11] G reads : अत्र कल्पकारेण त्रिष्वप्यहस्स्वार्भवान्त्यानि स्वराण्यैडानि वा स्युरिति कल्प उक्तः। स्वरपृष्ठत्वपक्षे तु नायं कल्पः किं तु स्वराण्येवार्भवान्त्या सुरिति स्वरपृष्ठत्वपक्षे एव कर्त्तव्यविशेषमाह । ; C has कर्तव्यशे०. [12] ०म्नोश्च मा० G. [13] G reads रथन्तरपृष्ठस्थानात् प्रच्युतं बृहत् कुर्यादिति ; the last two words belong to Comm. on Sūtra 24, the intermediate passage being left out in G. [14] ०मा TG.

[a] RV. 6, 42, 1. SV. I, 4, 2, 2, 1 ; II, 6, 3, 2, 1.

नित्यश्च[1] सामतृचः ॥ २५ ॥

द्वितीयेऽहन्यार्भवे पवमाने कल्पकारोक्तः सामतृचोऽपि नित्य एव स्यात्। न[2] वैकल्पिकः[2]। आर्भवे पवमाने ऐडमवश्यमिति। तल्लाभार्थमित्यर्थः[3]। प्रथमद्वितीययोस्तु स्वरसाम्नोर्न सामतृचः कार्य इत्यभिप्रायेणाह[4] ॥

औदलत्वाष्ट्रीसाम्नोरुद्धारः ॥ २६ ॥

सामतृचान्त्ययोरौदलत्वाष्ट्रीसाम्नोरुद्धारः कार्यः स्तोमसंपत्त्यर्थं। तेन प्रथमेऽहनि अनुष्टुभि गौरीवितगौतमयोस्तृचे[5] करणं[5]। उत्तमेऽहनि गौरीविताम्धीगवयोस्तृचे[6] करणं। अन्यथा स्तोमासंभवादिति[7] ॥ अथ विषुवति विशेषमाह ॥

विषुवतो दिवैके प्रातरनुवाकमुपाकुर्वन्ति ॥ २७ ॥

तथा चाश्वलायनः[8]। "विषुवान्[9] दिवाकीर्त्यः। उदिते प्रातरनुवाकः"[a] इति ॥

बहिरस्यैके बहिष्पवमानेन स्तुवते ॥ २८ ॥

"अहीनबहिष्पवमानैः[10] सदसि स्तुवीरन्नप्रथमादह्नोऽन्यत्र। आद्यन्तयोस्तु सत्त्रेषु"[b] इति वचनात्सदसि बहिष्पवमानं प्राप्तं तदेके[11] बहिरेवास्मिन्नहनि कुर्वन्तीत्यर्थः ॥

"अग्निरिन्द्राय"[c] "उपास्मै"[d] "पवस्व वाचः"[e] इति स्तोत्रीयं शुङ्गाः[12] ॥ २९ ॥

"अग्निरिन्द्राय"[13] इत्युपात्तास्तिस्र[13] ऋचः संहृत्य बहिष्पवमाने स्तोत्रीयं प्रतिपत्तृचं[14] कुर्वन्ति शुङ्गा[15] नाम शाखिन इति ॥

[1] नित्य G. [2] तद्वैकल्पिकः C. [3] तह्लाद्यवार्थ° C. [4] G reads: द्वितिये हन्यर्भवे [!] पवमाने यः कल्पकारोक्तो वैकल्पिकः सामतृचस्सन्निपात्य एव स्या गौरीवितेन सह कल्प्यत इत्यर्थः। किमर्थमार्भवपवमानस्यैडसामसिद्ध्यर्थं अन्यथा अप्रतिष्ठितं त्रितियसवनं स्यादिति दोष श्रुतेः। प्रथमोत्तमयोस्तु स्व°, etc. [5] गौरीवितगौतमयोर्नित्यमेव तृचकरणं G. [6] °गवयोर्नित्यमेव तृचे G. [7] स्तोमसंभ° C; स्तोमो न संभवेत्। G; G adds here आर्भवगतयो स्वरयोरभावादिति. [8] °नं G. [9] °वं D; वां C; °वति G. [10] °ने G, D. [11] D ins. च. [12] शुंभाः G. [13] C reads अग्निरिन्द्रायोपस्मै पवस्व वाच इत्येतास्तिस्र. [14] प्रतिपदृचं G. [15] शुंभा G.

[a] Āśv. S'r. 8, 6, 1. 2. [b] 4, 1, 13. 14. [c] SV. II, 9, 2, 4, 1.
[d] RV. 9, 11, 1. SV. II, 1, 1, 1, 1; II, 1, 2, 18, 3. [e] RV. 9, 62, 25. SV. II, 2, 1, 1, 1.

"वात आ वातु"[a] इति माषशरावयः[1] ॥ ३० ॥

माषशरावयो नाम केचिच्छाखिनो "वात आ वातु" इति त्वचं स्तोत्रीयमाहुरिति ॥

यज्ञायज्ञीयभासे व्यतिहरन्त्येके ॥ ३१ ॥

विषुवति यज्ञायज्ञीयभासयोरन्योन्यस्थानव्यतिहारमेक इति ॥

"बण्महां असि सूर्य"[b] "इन्द्रमिद्देवतातये"[c] "आयन्त इव सूर्यम्"[d] इति महादिवाकीर्त्यस्तोत्रीया विकल्पन्ते ॥ ३२ ॥

"विभ्राड्बृहत्पिबतु सोम्यम्"[2][e] इत्यनेन सह त्रयस्तृचाः प्रत्येकं विकल्पन्त इति ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ ६ ॥

बृहत्पृष्ठश्चेदग्न्यवती[3] प्रतिपत्[4] ॥ १ ॥

यदि[5] बृहत्पृष्ठो विषुवान् स्यात् । तदानीमग्न्यवती प्रतिपदिति ॥

तृतीयात्साहस्रादाज्यानि[6] नित्यैर्विकल्पन्ते[7] ॥ २ ॥

साहस्रा नाम चत्वार एकाहाः[8] । तेषां तृतीयात्साहस्रादाज्यानि कल्पकारोक्तैर्नित्यैर्विकल्पन्ते[9] । "अग्निं दूतं वृणीमहे"[f] इत्युभयान्याज्यानि[10] स्युरित्यर्थः[10] ॥

उत्सेधस्थाने रथंतरम्[11] ॥ ३ ॥

स्पष्टमिति ॥

[1] °शराव G. [2] सोमं C. [3] °वती G. [4] °पद्दियेति G. [5] G om.
[6] °स्रादाज्यायानि D. [7] °कल्प्यते G. [8] G reads सहस्राणामेव केचित् देकाक्रमेणास्नाताः.
[9] °कल्प्यन्ते G. [10] °ज्यानीत्यर्थः G. [11] रथन्तरस्य TG.

[a] RV. 10, 186, 1. SV. I, 2, 2, 4, 10; II, 9, 2, 11, 1. [b] RV. 8, 101, 11. SV. I, 3, 2, 4, 4; II, 9, 1, 9, 1.
[c] RV. 8, 3, 5. SV. I, 3, 2, 1, 7; II, 7, 3, 8, 1. [d] RV. 8, 99, 3. SV. I, 3, 2, 3, 5; II, 5, 2, 14, 1.
[e] RV. 10, 170, 1. SV. II, 6, 3, 5, 1. [f] RV. 1, 12, 1. SV. I, 1, 1, 1, 3; II, 2, 1, 6, 1.

तस्य[1] महादिवाकीर्त्यम् ॥ ४ ॥

विषुवति बृहत्यां पञ्च सामानि सन्ति उत्सेधं प्रथमं रथंतरं पञ्चमं। तत्र प्रथममपोह्य रथंतरं स्यात्। तत्स्थाने[2] महादिवाकीर्त्यं पञ्चममिति ॥

"अयं सोमः"[a] इति पार्थम् ॥ ५ ॥

अभिजितानि[3] पृष्ठानि ॥ ६ ॥

अभिजितो[4] यानि[4] पृष्ठानि[4], तान्यत्र[5] पृष्ठानि[5] स्युरिति ॥ तत्र विशेषमाह ॥

इन्द्रक्रतौ[6] श्यैतम्[6] ॥ ७ ॥

"इन्द्र क्रतुं न आ भर"[b] इति प्रगाथं श्यैतं स्यादिति ॥

गोः ककुबुष्णिहौ ॥ ८ ॥

गोष्टोमस्यैकाहस्य ककुबुष्णिहावाहरेदिति ॥

उद्धरति पिपीलिकमध्याम्[7] ॥ ९ ॥

"पर्यू[8] षु प्र धन्व वाजसातये"[c] इति कल्पकारोक्तां[9] पिपीलिकमध्यामनुष्टुभमुद्धरेदिति[10] ॥

श्यावाश्वविकर्णगौरीवितान्धीगवौदलभासान्यनुष्टुभि[11] ॥ १० ॥

"पुरोजिती वो अन्धसः"[d] इत्यनुष्टुभि श्यावाश्वादि सामषट्कं स्यादिति ॥

औदलस्थाने वाङ्निधनं क्रौञ्चम[12] ॥ ११ ॥

स्पष्टमिति ॥

अरण्येगेये तृचयोः ॥ १२ ॥

तेषां षण्णां साम्नां मध्ये ये अरण्येगेये भासविकर्णे, ते[13] तृचयोः स्यातां। इतराण्येकर्चानीति[14] ॥

[1] TG om. [2] तत्र स्थाने G. [3] आभि° C. [4] G om. [5] तान्यप्रतिष्ठानि G.
[6] इन्द्रश्रुतस्येतमिति G. [7] °मध्यात् TD. [8] पर्य्यु G. [9] °क्तं C; कल्पोक्तां G.
[10] °मध्या अनु° C; °ष्टुबुद्ध° G. [11] °भासाभ्यनु° TG; °भासानु° G. [12] क्रौंचम् TD, D.
[13] चेते C. [14] °कर्चामिति G.

[a] RV. 9, 88, 1. SV. II, 6, 3, 15, 1. [b] RV. 7, 32, 26. SV. I, 3, 2, 2, 7; II, 6, 3, 6, 1.
[c] RV. 9, 110, 1. SV. I, 5, 1, 5, 2; II, 6, 1, 7, 1. [d] Cf. 8, 2, 17.

व्रतात्परे[1] ॥ १३ ॥

अनुष्टुभः परे ये सामनी पवमानान्त्यमग्निष्टोमसाम[2] च[3]। ते द्वे अपि महाव्रतादाहरेत्। तद्यथा। सूर्यवतीषु कावमन्त्यं यज्ञायज्ञीयमग्निष्टोमसामेति ॥ अथ विश्वजिति विशेषमाह ॥

विश्वजिति[4] यज्ञायज्ञीयबृहतीव्यतिहरन्त्येके ॥ १४ ॥

स्पष्टमिति ॥

बृहत्पृष्ठश्चेत्तृतीयात्साहस्रात्प्रातःसवनम् ॥ १५ ॥

कालेयस्थाने[5] समन्तम् ॥ १६ ॥

"अयं सोमः" इति पार्थम्[6] ॥ १७ ॥

अभिजितानि पृष्ठानि ॥ १८ ॥

इन्द्रक्रतौ[7] श्यैतम् ॥ १९ ॥

गोः ककुबुष्णिहौ ॥ २० ॥

उद्धरति पिपीलिकमध्याम्[8][a] ॥ २१ ॥

स्पष्टानि सूत्राणीति ॥

अनुष्टुप्प्रभृति व्रतात्[9] ॥ २२ ॥

आर्भवे पवमानेऽनुष्टुप्प्रभृत्यग्निष्टोमसामान्तं महाव्रतादाहरेदिति ॥ अथोत्तरे पक्षसि अयनविकल्पान्गमनविकल्पान्दर्शयति[10] ॥

उत्तरे पक्षस्ययनविकल्पाः ॥ २३ ॥

वक्ष्यन्त इति शेषः ॥

अभिप्लवपृष्ठ्यान्प्रतिलोमानुपयन्त्यहरावृत्तकारिणः[11] ॥ २४ ॥

केवलमहोभिरावृत्तमुत्तरं पक्षं ये कुर्वन्ति। ते अहरावृत्तकारिणः। अभिप्लवपृष्ठ्यानिति[12] पूर्वनिपातोऽभिप्लवानां पूर्वानुष्ठानार्थः। यथा[13] पूर्वे[14] पक्षसि कृतं[15]। एवमुत्तर-

[1] व्रतापरे TG. [2] पवमानर्यम॰ C. [3] ते च G. [4] द्विश्व॰ TG. [5] ॰स्थान्न G; ॰स्थने TG. [6] पार्थमन्त्यम् TG. [7] ॰क्रतो TG. [8] पिपीलक॰ TD; ॰मध्या TG. [9] प्रतात् D. [10] ॰कल्पं द॰ G. [11] पृष्ठान् प्र॰ D; पृष्ठ्यात् प्र॰ TG; ॰वृत्तिका॰ C; ॰कारिणं TG. [12] ॰पृष्ठ्यानीति G. [13] G om. [14] अपूर्वे G. [15] विकृतं G.

[a] Cf. above, Sūtras 5-9.

स्मिन्नपि प्रथममभिप्लवान् कृत्वा पश्चात्पृष्ठ्यं कुर्युः[1] । केवलमहान्येव तेषां प्रतिलोमानि स्युरित्यर्थः । तथा च तैत्तिरीयकं । "उपरिष्टान्मासान्पृष्ठ्यानुपयन्ति"[2a] इति ॥

पृष्ठ्याभिप्लवाननुलोमान्मासावृत्तकारिणः[3] ॥ २५ ॥

प्रथमं पृष्ठ्यं कृत्वा पश्चादभिप्लवान्कुर्युः । तदानीमनुलोमान्यहानि स्युः । उभयावृत्तकारिणोऽयं[4] । कुतः[5] । "पृष्ठ्यः षडहः त्रयस्त्रिंशारम्भणश्चत्वारोऽभिप्लवाः षडहाः स मासः"[b] इति ब्राह्मणात्[5] । तदुक्तं सूत्रकारेण । "एत[6] एवावृत्ता ऊर्ध्वं विषुवतोऽभिप्लवाः । तेषां प्रतिलोममहान्युपेयुः"[c] इति ॥

गोआयुषो[7] च[8] व्यतिहरन्ति ॥ २६ ॥

स्पष्टमिति ॥

उत्तमं संभार्यं[9] कुर्वन् सप्तमान्मासात्पृष्ठ्याभिप्लवानुद्धरेत[10] ॥ २७ ॥

पृष्ठ्याभिप्लवैरन्यैश्च कतिपयैरहोभिर्यः संभ्रियते[11] मासः संभार्यः[12] षष्ठस्य सप्तमस्योत्तमस्य । तत्रोत्तरस्मिन्पक्षे यद्युत्तममेव मासं संभार्यं कर्तुमिच्छेत् । तदा[13] सप्तमान्मासात्पृष्ठ्याभिप्लवानुद्धरेदिति[14] ॥

पञ्चायनमासान्कृत्वा दशरात्रमिश्रादभिप्लवमुद्धरेत[15] ॥ २८ ॥

अयनमासो नाम पृष्ठ्यपञ्चमैश्चतुर्भिरभिप्लवैर्निर्मितः । तान्सप्तमप्रभृति पञ्च मासान्कृत्वा[16] दशरात्रमिश्रादुत्तमान्मासादभिप्लवमेकमुद्धरेत् । अभिप्लवमित्येकत्वं विवक्षितमिति । एवमेकसंभार्यमुत्तरपक्षः । तदानीमावृत्तैः स्वरसामभिर्विश्वजिता[17] चोत्तमो[18] मासः पूर्यत इति ॥

[1] कार्य्यः G. [2] ०ष्ठ्यान्युप० G. [3] ०न्मासान्वृत्त० TG. [4] ०णोभय G; ०णि । यं D; ०णो यं C. [5] The passage कुतः—ब्राह्मणात् is missing in G. [6] एक C, D; त G. [7] ०आयुषि G, D; ०आयूषी TG; ०अयूंषि TD. [8] G om. [9] संभाव्यं TG. [10] ०सान् पृ० D, TD, G, TG. [11] संह्रि० C. [12] संहार्य्यः G; D corr. संहा० to संभा०. [13] तदानीं G. [14] ०साग्पृ० MSS; G adds कथं तर्ह्यः(?) क्लृप्तिः अत आह. [15] ०रात्रा० TD; TG has दशरात्रमिश्रममासमुद्धरेत्, which really is the end of Sūtra 31, Sūtras 29 and 30 and the beginning of Sūtra 31 being left out in TG; G leaves out the end of the Sūtra from दश०. [16] G om. the beginning of the Comm. up to दश०. [17] ०सामभिजिता G. [18] पोत्तमो C, D.

[a] Taitt. S. 7, 5, 1, 6. [b] PV. Br. 24, 20, 1. [c] 7, 4, 19. 20.

तथा सति पूर्वे पक्षसि विकल्पः ॥ २९ ॥

तथा सति वा[1] एकसंभार्यत्वपक्ष इत्यर्थः। तदानीं पूर्वस्मिन्नपि पक्षसि षष्ठो मासः प्रथमो वा संभार्य इति विकल्पः। प्रथमस्य संभार्यत्वप्रकारं[2] दर्शयति ॥

षष्ठादभिप्लवपृष्ठ्यानुद्धृत्य[3] चतुर्विंशाद्द्वितीयादह्न[4] उत्तरान्कुर्यात्[4] ॥ ३० ॥

समौ पक्षौ चिकीर्षन्पञ्चायनमासान्कृत्वा दशरात्रमासमुद्धरेत्[5] ॥ ३१ ॥

यदि सर्वात्मना पक्षयोः साम्यमिच्छेत् । तदा सप्तमं मासमेकं संभार्यं कृत्वा ततः परानष्टमप्रभृतीन्पञ्चायनमासान्कुर्यात् । उत्तमं संभार्यं लुम्पेदिति ॥ किंचेत्याह ॥

पञ्चदशौ[6] पक्षौ व्रतस्यापरिमात्कम्[7] ॥ ३२ ॥

महाव्रतेऽहनि व्रतस्तोत्रस्य पक्षौ बृहद्रथंतरे पञ्चदशस्तोमावेव स्यातां । तयोरेकं सप्तदशं ब्राह्मणे क्लृप्तं[a]। तन्निवृत्त्यर्थं पञ्चदशावित्युक्तं। एवं च सति चतुर्विंशमहाव्रते अहनी[8] समस्तोत्रीये[9] भवत इत्युभयोरपि पक्षयोः साम्यसिद्धिः । अपरिमात्कमिति कोऽर्थः । त्रयोदश परिमादो[10] ब्राह्मणे क्लृप्ताः। "प्राणेन पुरस्तादाहवनीयमुपतिष्ठन्ते"[b] इत्यादयः। तद्रहितं[11] महाव्रतं कुर्यादित्यर्थः ॥

बृहत्पृष्ठं विश्वजितम् ॥ ३३ ॥

पक्षयोः साम्यमिच्छन्बृहत्पृष्ठं विश्वजितं कुर्यादित्यर्थः ॥ अथायुषमधिकृत्याह ॥

विश्वजित[12] आयुषमेक[13] उपयन्ति ॥ ३४ ॥

विश्वजित उत्तरं कुर्वन्तीत्यर्थः ॥

[1] C om. [2] °प्रकृतिं G. [3] षष्ठानभिप्लवपृष्ठा G. [4] °विंशादुत्तरा° G; G contains the following Comm.: षष्ठान्मासादुद्धृत्य चतुर्विंशाद्द्वितियादनु (for °दह्न?) उत्तरान् कुर्यादिति. [5] See note on Sūtra 28. [6] पाञ्च° G. [7] व्रतस्यपरि° TG; °स्यापरिमर्क्षमिति C. [8] अह्नि D; अहनि C; हनि G. [9] सप्तदशस्तोत्रीये G. [10] °दौ D, G. [11] तत्रहितं G. [12] TD om. [13] आयुष एक G.

[a] PV. Br. 5, 1, 10. [b] PV. Br. 5, 4, 1.

तथा सति गोआयुषोरैकाहिके[1] बृहत्यौ[2] ॥ ३५ ॥

तदानीं गोआयुषोर्माध्यन्दिने[3] पवमाने ऐकाहिके[4] बृहत्यौ[5] न[5] सांवत्सरिके[5] इत्यर्थः । ननु च । ऐकाहिकभूतयोः[6] सांवत्सरिके[7] च[8] गोआयुषोर्बृहतीभेदो नास्ति । सत्यं । तद्गतानि[9] सामानि[10] भिद्यन्ते तदभिप्रायो बृहतीशब्द इति ॥ अथ दशरात्रमधिकृत्याह ॥

दशरात्रमेक आवर्तयन्ति ॥ ३६ ॥

अविवाक्यमहरारभ्य[11] त्रिवृदन्तं प्रतिलोमं कुर्वन्ति । कुतः । अभिप्लवादिवद्दशरात्रस्यापि गणत्वादुत्तरस्मिन्पक्षसि गणानामावृत्तेश्चेति । अत्र निदानकारेणोक्तं । न वयमावर्तयामो[12] ऽनुपेतः पूर्वे पक्षसि दशरात्रस्तं कस्मादावर्तयामेति । ननु च मा भूत्तस्यावृत्तिः[13] । तदन्तर्गतस्य[14] पृष्ठस्यावृत्तिरस्तु[15] तस्य[16] पूर्वे पक्षसि कृतत्वात् । नैवं व्यूहसमाधिभङ्गात्[17] । तथा हि पृष्ठ्योत्तरे त्र्यहे छन्दोमेषु[18] चान्यैरव्यवहितेषु[19] व्यूहः क्लृप्तः । आवृत्तिपक्षे समूढेन[20] पूर्वत्र्यहेण[21] व्यूढानामङ्गां व्यवायः स्यादिति । अत्र दशमाहरन्ते[22] मानसं स्तोत्रं ब्राह्मणे क्लृप्तं[a] ॥ तत्र विशेषमाह ॥

तस्माद्व्रतं यदा परं व्रतान्ते मानसं सांवर्गजिता[23] गौतमाः[24] ॥ ३७ ॥

यदा येषु सत्त्रेषु दशरात्रात्परं[25] महाव्रतं क्रियते । तदा महाव्रतान्ते मानसं कार्यं । यदा पुनर्न क्रियते । तदा दशरात्रान्त एव कार्यं । कुत एषा[26] व्यवस्था ब्राह्मणे "मनसा प्रस्तौति मनसोद्गायति"[b] इत्युक्त्वा किमर्थमेवं क्रियत इत्याशङ्कासमाप्तस्य समाप्त्यै "यद्वै

[1] ०अयुषो० TD. [2] D corr. बृहत्याविति to ०त्यामिति, and TD ०त्यौ to ०त्यां; बृहच्चाविति G.
[3] गोअयु० D; गोयुषोर्मध्य० G. [4] एका० G. [5] बृहत्योरसां० G. [6] एकाहभूतयोः G.
[7] ०को D; सांवर्गो आयुषो० G. [8] D corr. च to स्य. [9] तन्नत G. [10] मासानि C.
[11] ०वाक्रम० C; अपिवाक्ये दशाममहरा० G. [12] G om. मो. [13] हृतस्या० C.
[14] दशरात्रान्तर्गतस्य G. [15] ०वृत्तिस्तु G. [16] तदन्तस्य G. [17] ०धिभङ्गप्रसङ्गात् G.
[18] ०मे C. [19] चाप्यन्यै० G. [20] समूढे G. [21] ०त्र्यहे C; त्र्यहे G (om. पूर्व).
[22] दशानामाहरन्ते G. [23] D and TD read originally ०वर्ग्य०, but correct as above.
[24] गौतम इति G. [25] दशमाचा० G. [26] एष G.

[a] PV. Br. 4, 9, 8. [b] PV. Br. 4, 9, 9.

वाचा न समाप्नुवन्ति मनसा तत्समापयन्ति"[a] इति वचनात्। तस्यायमर्थः। यत्पूर्वोक्तेन कृत्स्नेन वाचो गतेन स्तोत्रशस्त्ररूपेणावाप्तुं न[1] शक्यते। तस्य[2] प्राप्त्यर्थं[2] मानसमिति। तेन वाचो गतसमाप्तौ मानसकरणावगमाद्वाचा[3] कृत्यं महाव्रतमपि[4] समाप्यैव मानसं कार्यं। व्रताभावे दशमान्त एवेति। ननु एवमुदयनीयान्ते मानसप्रसङ्गः[5]। नैवं। प्रायणीयोदयनीययोर्मध्यवर्ति[6] यदसाधारणं वाचो गतं। तस्य सर्वस्य समाप्तौ मानसं कार्यमिति भावः। किं च प्रायणीयोदयनीययोरेकत्वात्प्रायणीयकृतेनोदयनीयः[7] कृत एवेत्येष गौतमानामभिप्रायः॥

तृतीयः खण्डः॥ ३॥ ॥ ७॥

ज्योतिष्टोमायनविकल्पाः[8]॥ १॥

ज्योतिषां सोमसूर्यनक्षत्राणां यदयनं[9] नानारूपं[9] गमनं। तन्निमित्ताः संवत्सरविकल्पा गवामयने वक्ष्यन्त इति॥

तत्र यदादितोऽन्ततः तदूर्ध्वं[10] विषुवतः[11]॥ २॥

तत्र[12] यन्मासानामादितो[12] वक्ष्यामः[13]। तद्विषुवत ऊर्ध्वमन्ततः[14] स्यादिति॥

मासि मास्याद्याभिप्लवस्य[15] स्थाने त्रिकद्रुकाः स[16] षट्त्रिंशदूनो नाक्षत्रः॥ ३॥

गवामयनस्य पूर्वे पक्षसि प्रतिमाससमाद्याभिप्लवस्थाने त्रिकद्रुका[17] एव स्युः। उत्तरस्मिन्पक्षसि प्रतिमाससमन्त्यस्याभिप्लवस्य[18] स्थाने त्रिकद्रुका एव स्युः। "तत्र[19] यदादितोऽन्ततस्तत्" इति वचनात्। स नाक्षत्रः संवत्सरो भवति। षट्त्रिंशदहोभिरूनः[20]॥ कुत इत्याह॥

[1] यन्न G. [2] तत्प्रा॰ G. [3] ॰गमात्वाचा C. [4] ॰तमित्यपि G. [5] ॰प्रसंगं C, D.
[6] ॰वर्तो C; D corr. वर्त्तो to वर्त्ति; मध्ये वृत्तिवदसा॰ G. [7] प्रायणीय्योक्तत्वात् प्रायणीर्य्येन कृतेनोदयनीयेन G. [8] ॰मयनवि॰ G, TG, and originally T and TD. [9] यदयनरूपं G.
[10] तत ऊ॰ G. [11] ॰वातो TD; G alters ॰वा॰ to ॰व॰. [12] तत्रायनमानानामा॰ C. [13] वक्ष्याः G.
[14] ऊर्ध्वं मासानामन्ततः G. [15] ॰द्यभिप्ल॰ TG, G; TD corr. ॰द्य॰ to ॰द्या॰; ॰द्यस्याभिप्ल॰ C.
[16] G ins. एव स्युः. [17] त्रिका G. [18] ॰मासं अन्यस्याभि॰ G. [19] G om. [20] ॰होभिरह्नः G.

[a] PV. Br. 4, 9, 10.

सप्तविंशतिनो[1] हि मासाः ॥ ४ ॥

यस्मात्सप्तविंशतिनक्षत्रपरिमिता मासाः सप्तविंशतिनो भवन्ति । तस्मान्नाक्षत्रोऽयं[2] संवत्सर[2] इति ॥

षष्ठाद्यस्याभिप्लवस्य स्थाने ज्योतिर्गौश्च ज्योतिरेवावृत्ते[3] स नवोनो[4] नाक्षत्र[5] एव त्रयोदशी ॥ ५ ॥

षष्ठमासाद्यस्याभिप्लवस्य[6] स्थाने ज्योतिर्गौश्चेति[7] दिवसद्वयमेव स्यात् । आवृत्ते[8] सप्तमे मासे[9] अन्त्याभिप्लवस्थाने[10] ज्योतिरेवैकं स्यात् । सो[11] ऽयं[11] नवाहोनो[11] नाक्षत्रः संवत्सरः । त्रयोदशमासवानिति ॥

युग्ममासेष्वाद्यस्याभिप्लवस्य स्थाने तत्पञ्चाहः[12] स[12] षडूनश्चान्द्रमसः[13] ॥ ६ ॥

गवामयनस्य युग्ममासेषु द्वितीयचतुर्थादिष्वाद्याभिप्लवस्थाने[14] अभिप्लवपञ्चाह[15] एव स्यात् । स षडहोनश्चान्द्रमसः[16] संवत्सर इति ॥

षष्ठादौ त्रिकद्रुकानभिप्लवं चोपदध्यात्सोऽष्टादशाधिकः[17] पौर्णमासी-प्रसवस्तैर्यगयनिक[18] आदित्यस्य ॥ ७ ॥

षष्ठमासादौ त्रिकद्रुकानभिप्लवं[19] चेति[19] नवाहमधिकमुपदध्यात्[20] आवपेत्[21] । तथैव[21] सप्तमेऽपि मासे तृतीयाभिप्लवादूर्ध्वं[22] नवाहमुपदध्यात् । सोऽयमष्टादशदिवसो[23]ऽधिकः[23] सूर्यस्य संवत्सरः । पौर्णमास्यां प्रथमसुत्या[24] यस्य[25] स[25] पौर्णमासीप्रसवः[26] । तदा[27] पौर्णमास्यां सुत्यां कुर्यादित्यर्थः[27] । तैर्यगयनिक इति कोऽर्थः । आदित्यस्य यत्तिर्यग्गमनं

[1] °विंशिनो G. [2] यस्संवत्सर G. [3] °वृत्ये TG; °रेवाभूत्ते G. [4] त नवाहोनो TG; नक्षत्र नवोनो G. [5] न° G. [6] °मासाद्यभिप्ल° G. [7] ज्योतिश्च गौ° G. [8] अष्टवृत्ते G. [9] मासि G. [10] °प्लवस्य स्थाने C, G. [11] स नवोनो C. [12] °हस्तु TG; G om. स. [13] षडूसून° TG. [14] °चतुर्थषष्ठेष्वाद्यस्याभिप्लवस्य स्थाने G. [15] °प्लवं चाह C, D. [16] षडून° C; °श्चन्द्र° D, G. [17] ष्टदश G. [18] G om. पौर्णमासो; °प्रवस° C; °र्यगनियक TD; °र्यगायके TG; °र्यगनिथ D. [19] °द्रुकानवाभिप्ल° G; °प्लवश्चेति D. [20] नवाहमधिकृत्य G. [21] G om. [22] तृतीये भिप्ल° C, D. [23] °दिवसात्मकः G. [24] °सूत्र्या D. [25] G om. [26] °प्रवसः C. [27] G om. the passage तदा—°त्यर्थः.

दक्षिणायनमुत्तरायणं च । तत्र कदाचिदादित्यः षण्मासान्दक्षिणत[1] एति[1] नव चाहानि तथा षण्मासानुत्तरत एति[2] नव चाहानीति निदानकारेणोक्तं । तिर्यगयनविशेषनिमित्तः संवत्सरस्तैर्यगयनिक[3] इति । सावनस्तु[4] संवत्सर एको ब्राह्मणक्लृप्त इति ॥ अथेदानीमुत्सर्गिणामयनं प्रस्तौति ॥

उत्सर्जनानि मासि मासि ॥ ८ ॥

उत्सर्जनं कर्मलोपः । स तु बहुप्रकार इति बहुवचनं । मासि[5] मासि उत्सर्जनं कार्यमित्यर्थः । काम्यं चैतत्[6] । यथोक्तमापस्तम्बेन "तदेतत्पौत्रीयं[7] पशव्यमायुष्यं स्वर्ग्यम्"[a] इति ॥

यथा ऽन्त एवमावृत्तानामादिः[8] ॥ ९ ॥

यथा पूर्वस्मिन्यक्षसि मासान्त[9] उत्सर्जनं[10] । एवमावृत्तानां मासानामादावुत्सर्जनं[11] स्यादिति ॥ तदेव दर्शयति ॥

पूर्वेष्वभिप्लवेषु षष्ठमहरुक्थ्यं[12] कृत्वा ऽग्निष्टोममुत्तमे[13] ॥ १० ॥

प्रथमे मासि तावत्पूर्वेषु त्रिष्वभिप्लवेषु षष्ठं षष्ठमहरुक्थ्यसंस्थं कृत्वोत्तमे[14] चतुर्थे ऽभिप्लवे षष्ठमहरग्निष्टोमसंस्थं कुर्यात् । सो ऽयमुक्थ्यसंस्थालोपो नाम किंचिदुत्सर्जनमिति॥ प्रकारान्तरमाह ॥

तद्वैकत्रिकस्तोमम्[15] ॥ ११ ॥

अथवा उत्तमस्याभिप्लवस्य तत् षष्ठमहरेकत्रिकस्तोमं[16] स्यात् । यस्मात्[17] स्तोत्रेष्वेकस्य[18] त्रिकस्य[18] स्तोमो[19] बहिष्पवमानप्रभृति व्यत्यासेन भवतः । तदेकत्रिकस्तोमं । सो ऽयं स्तोत्रीयाणां[20] लोपो नामोत्सर्ग[21] इति । तदानीं विकारमाह ॥

[1] °साद्दक्षि° C, D; °णतेति G. [2] G om. [3] °र्यङयनिकः G. [4] समानस्तु G.
[5] C om. [6] चेत्तत् G. [7] °त्र्यं G. [8] °वृत्तान्तानामादिः TG. [9] G ins. एव.
[10] उत्सर्जं D. [11] °मादा उत्स° D. [12] °कथ्यं TD. [13] °मुत्तमम् G, TG.
[14] C and D ins. च. [15] तेद्वैक TG; D om. त. [16] षष्ठमहरुक्थ्ये के त्रि° G. [17] यथाह C.
[18] स्तोत्रेषु एकी च त्रि चतस्र G. [19] °मौ D; the rest of the Comm. is missing in G. [20] C and D read both स्तोत्रीयसा, but D corr. य to या, and puts a curve above सा to indicate a correction.
[21] °र्ग्य C and, originally, D.

[a] Āpast. S'r. S. 21, 25, 12.

"असृक्षत"[a] इति बहिष्पवमानम्[1] ॥ १२ ॥

षष्ठस्याह्नो[2] "असृक्षत"[2] इत्येकस्यां[2] बहिष्पवमानं। ऋङ्नियमार्थमेतत्सूत्रमिति ॥

गायत्रं गायत्र्यामाश्वमेडं[3] बृहत्यां[4] गोष्ठो वा ॥ १३ ॥

माध्यन्दिने पवमाने गायत्र्यां गायत्रमेकमेव साम स्यात्। बृहत्यामैडमेव स्यात्। गोष्ठो वा साम[5]। अपूर्वविधिरयं[6] अप्राकृतत्वादाश्वगोष्ठयोरिति[7] ॥

"अया[8] रुचा"[b] इति गायत्रपार्श्वमार्भवः ॥ १४ ॥

इदमपि[9] पूर्ववदिति[9]। तदिदमुत्सर्जनद्वयं "आ वा एते संवत्सरं प्यायन्ति"[c] इति खण्डेन ब्राह्मणे दर्शितं। तत्रैव खण्डे अहरुत्सर्ग्ये[10] तृतीयं प्रकारं विधाय तस्याह्नः[11] स्थाने सवनत्रयतुल्यः[12] पशुर्विहितः[13 d] ॥ तत्र शाखान्तरीयं[14] विशेषं दर्शयति ॥

सवनविधं[15] पशुं कुर्वन्नुत्तममभिप्लवं पञ्चाहं कृत्वा षष्ठस्थाने सवनविधः पशुः ॥ १५ ॥

ब्राह्मणोक्तं सवनतुल्यं पशुं कुर्वन्[16] चतुर्थेऽभिप्लवे[17] पञ्चाहं कृत्वा षष्ठस्थाने पशुं कुर्यादिति ॥ तत्रैव विकल्पमाह ॥

प्रथमं वाऽभिप्लवं[18] पञ्चाहं कृत्वा सामान्ते सवनविधः पशुः ॥ १६ ॥

प्रथममभिप्लवं पञ्चाहं कृत्वा षष्ठं लोपयित्वा तदनुग्राहाय सामान्ते पशुं कुर्यादिति ॥

सर्वानूनानेके[19] ॥ १७ ॥

एके शाखिनः सर्वान्मासानूनानेव ब्रुवते। त्यक्तस्याह्नोऽनुग्राहाय[20] सवनविधः पशुर्न कार्यः। किं तु त्यक्तं त्यजेदेवेत्यर्थः[21] ॥ तेषामेव शाखिनामुत्सर्गप्रकारमाह[22] ॥

[1] G om. this Sūtra. [2] G om. [3] °मैडं TG. [4] °त्या C. [5] G om. [6] G om. अयं. [7] अप्रकृ° G. [8] आया G; अथा D. [9] अयमप्यपूर्वो विधिः G. [10] आहरुत्सर्ग G; अहनु° D. [11] तस्यास्य G. [12] °ल्यं G. [13] बहुपशुभिर्हितः G. [14] °रीया G. [15] °विधानं D; °विधिं TG. [16] G adds इति. [17] G om. ऽभि. [18] °व TG, TD. [19] सर्वे नू° G. [20] न ग्रा° D. [21] अन्त्यमेवे° G. [22] °मुत्सर्ग्य° C.

[a] RV. 9, 64, 4. SV. I, 5, 2, 5, 6; II, 4, 1, 2, 1. PV. Br. 13, 7, 5. [b] RV. 9, 111, 1. SV. I, 5, 2, 3, 7; II, 7, 3, 10, 1. PV. Br. 16, 16, 8. [c] PV. Br. 5, 10, 1. [d] Cf. PV. Br. 5, 10, 9-11.

प्रथमं वाऽभिप्लवं पञ्चाहं कुर्युः ॥ १८ ॥

स्पष्टमिति ॥

अहनी वा समस्येयुरभिप्लवपृष्ठ्ययोः सांनिपातिके ॥ १९ ॥

संनिपाते[1] भवं सांनिपातिकं । ते द्वे अहनी समस्येयुः । एतदुक्तं भवति । चतुर्थाभिप्लवस्य षष्ठमहः पृष्ठ्यस्य च[2] प्रथममहरेकस्मिन्नेव[3] दिवसे[3] कुर्यात् । सोऽयमहर्द्वयसमासो नामोत्सर्ग[4] इति ॥

अभिप्लवयोरुत्तमे ॥ २० ॥

उत्तमे द्वादशे मास्यभिप्लवयोरेव सांनिपातिकमहर्द्वयं समस्येयुः पृष्ठ्यसंनिपाताभावादिति ॥ एवमूनकारिणामुत्सर्गिणां दीक्षायां[5] विशेषमाह ॥

तथा सत्येकादश्यां पूर्वपक्षस्य दीक्षित्वा त्रयोदश दीक्षाः कुर्वीरन् ॥ २१ ॥

त्रयोदशदीक्षाकरणं किमर्थं[6] । विषुवतः पूर्वस्य स्वरसाम्नो मासान्यस्य पूर्वपक्षे संपत्त्यर्थं । यदि प्रकृतिवद्द्वादश[7] दीक्षाः स्युः । तदानीमसौ स्वरसामा पूर्वार्धस्योत्तममहरमावास्यायां संपद्येत[8] । ततश्च पूर्वपक्षमासा अभिसंपद्यन्त इति ब्राह्मणोक्तं[a] न साध्यतीति ॥

सप्तदश वा ॥ २२ ॥

सप्तदशदीक्षाकरणं सर्वेषामेव मासानां पूर्वपक्षे समाप्त्यर्थमिति ॥

व्यत्यासं वा पूर्णोनान्[9] ॥ २३ ॥

आद्यो[10] मासः पूर्णः[11] स्यात् । द्वितीयो मास ऊनः स्यात् । एवमेव व्यत्यासमुत्तरानपि मासान्कुर्यादिति ॥

[1] °त C; सांनिपातिके G. [2] G om. [3] °न्नेवासौ G. [4] °र्ग्यं C. [5] दीक्षणीयां G. [6] °र्थमिति निदानममृश्यं G; the rest of the Comm. is missing in G. [7] प्रकृति च द्वा° C. [8] °ते D. [9] °नाम् C, D, TD; °नानीति G; °नावान् TG. [10] अद्यो D. [11] पूर्णाः D.

[a] Cf. PV. Br. 5, 9, 14.

ऊनपूर्णानावृत्ताञ्छालङ्कायनिनः[1] ॥ २४ ॥

आवृत्तेषु[2] मासेषु विपरीतो व्यत्यासः[3]। प्रथम ऊनः कार्यः। द्वितीयः पूर्ण[4] इति ॥

एकाष्टकादीक्षिण उपसर्गिणः[5] ॥ २५ ॥

ये त्यक्तमहः पुनरुत्सृजन्ति सवनविधेन पशुना स्वीकुर्वन्ति[6]। त[7] उपसर्गिण[8] इत्युच्यन्ते। ते एकाष्टकायां[9] दीक्षेरन्। ये[10] पुनस्त्यक्तमहः सर्वथोपेक्षन्ते[11]। तेषां पूर्वमेवोक्तं "तथा सत्येकादश्यां दीक्षित्वा"[a] इत्यादि ॥

ते[12] तूष्णीमेकत्रिंशमहरासीरन् ॥ २६ ॥

त्रिंशतोऽह्नां[13] पूरणं[14] त्रिंशमित्युक्तमहरुच्यते[15]। तस्मिन्नहनि तूष्णीमेवासनमिति ॥

सवनविधेन वा पशुना यजेरन् ॥ २७ ॥

अथवा सवनपशुः कार्य इति ॥ अथोपसर्गिणामूनकारिणां च साधारणमाह ॥

अध्वर्युबह्वृचैः समयं कृत्वा दीक्षेरन्नेवमविलोपो भवतीति भवतीति ॥ २८ ॥

अध्वर्युबह्वृचा[16] अपि[16] बहुप्रकारानुत्सर्गानाहुः[17b]। षडहैः "मासान् संपाद्याहरुत्सृजन्ति"[c] इति। तेन[18] तैः समयं कृत्वा तदुक्तमस्मदुक्तं वैकं प्रकारं निश्चित्य दीक्षादिकं कुर्युः। तथा सति कर्माविलोपः[19] सिध्यतीति ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ ८ ॥

अष्टमः पटलः ॥ ८ ॥

कल्पोक्तं ब्राह्मणोक्तं च यथावदवधारयन्[20]।
अष्टमं पटलं व्याख्यान्धन्वी[21] मेधाविना प्रियः ॥

[1] °र्णानि वृत्ताञ्छा° TG; °र्णानां वृत्ताञ्छा D; °वृत्ताञ्छा° TD; °यनीनः D. [2] अवृ° C, D. [3] °सं G. [4] पूर्व G; D corr. र्व to र्ण. [5] G om. [6] °र्वन्निति D. [7] G om. the beginning of this Comm. up to त incl.; C om. त. [8] उत्सर्गिण C. [9] G has एका only. [10] न G. [11] °क्षणे G. [12] G om. [13] ह्नान् G. [14] पूर्वेण G. [15] त्रिंशत्यु° G. [16] G om. [17] °र्गा° C; °नाह D. [18] G ins. ते. [19] कर्मवि° G. [20] °वदनुधा° G. [21] °ख्ये ध° G; °ख्या ध° D; °ख्यं धन्वि C.

[a] 8, 4, 21. [b] Cf. TS. 7, 5, 6 and 7. Kāty. S'r. S. 24, 7, 23. 24. S'āñkh. S'r. S. 13, 20. [c] TS. 7, 5, 6, 1.

॥ ओं ॥

अथ पृष्ठ्ये[1] षडहे[1] प्रत्यहं पृष्ठस्तोत्रकाले[2] धर्मान्वक्तुमुपक्रमते[3] ॥

पृष्ठ्ये रथमतिवहेयुः पश्चात्प्राञ्चं दक्षिणतो वोदञ्चं बहिर्वेदि रथंतरस्य स्तोत्रे ॥ १ ॥

बहिर्वेदि पश्चात्सन्तं रथं प्राञ्चं वहेयुः । अथवा दक्षिणस्थितमुदञ्चं[4] नयेयुरिति[5] ॥

बृहतो दुन्दुभिमाहन्युः ॥ २ ॥

बृहतः[6] स्तोत्रे[6] दुन्दुभिघोषं कुर्युः ॥

उपवाजयमाना वैरूपेण स्तुवीरन्नुपवाज्यमाना वा[7] ॥ ३ ॥

उपवाजनं[8] नाम व्यजनेन वातोत्पादनं । तत्कुर्वन्तः स्तुवीरन् । यजमानपुरुषैर्वीज्यमाना वा[9] स्तुवीरन्निति ॥

वाचयित्वा यजमानं वातं "वात आ वातु"[a] इति तृचेनानुमन्त्रयेत ॥ ४ ॥

यजमानवाचनानन्तरं व्यजनोत्पादितं वातं तृचेनानुमन्त्रयेतेति ॥

वैराजस्य स्तोत्र उपाकृत उपर्यनूरु[10]शकलं[10] निधाय तृणे च तस्योपरि तिरश्चीमरणिं[11] निधायाध्यात्मं[12] प्रजननं कृत्वा त्रिः प्रदक्षिणमभिमन्थेत् "गायत्रं छन्दो ऽनुप्रजायस्व" "त्रैष्टुभं" "जागतं" "आनुष्टुभं" "वैराजं"[13] इति[13] गौतमः ॥ ५ ॥

उद्गातुरूरोरुपरिष्टादन्वञ्चं[14] शकलं निधाय तथैव स्तोत्रोपाकरणार्थे तृणे[15] बर्हिषी[16]

[1] पृष्ठ्यष्षडहे G; पृष्टे ष° C. [2] प्रष्ठ° D. [3] कर्मणि व° G. [4] °णतस्थि° C; °णमुदञ्चं G. [5] वहेयु° G. [6] बृहत्स्तोत्रे D. [7] TD om. [8] उपवाजं C. [9] C and D om. [10] °र्यनुरूपश्° D, obliterating the प. [11] °रणी TD. [12] °याभ्यात्मं C. [13] वैराजपञ्चमैरिति G, TG. [14] °तुरूरो° C. [15] तृचेन G. [16] °षि C, G; D corr. °षि to °षी.

[a] RV. 10, 186, 1. SV. I, 2, 2, 4, 10; II, 9, 2, 11, 1.

च निधाय शकलस्योपरिष्टात्तिरश्चीमरणिं[1] निधाय प्रजननमुत्तरारणिमध्यात्ममुपरिष्टात्कृत्वा[2] मन्थेन्मन्त्रपञ्चकेन[3]। "त्रैष्टुभं" इत्यादिषु "छन्दो ऽनुप्रजायस्व" इत्यनुषङ्गात्पञ्च मन्त्रा इति ॥

चतुर्भिरिति धानंजय्यः ॥ ६ ॥

त्रिभिरिति शाण्डिल्यः ॥ ७ ॥

अरण्योः संधानमालभ्योपजिघ्रेत्पाणी "तेजो ऽसि तेजो मयि धेहि"[a] इति ॥ ८ ॥

स्पष्टानीति[4] ॥

मथ्यमाने स्तोमं युञ्ज्यात् ॥ ९ ॥

मथ्यमाने ऽग्नौ स्तोमयोगविधानान्मन्थनोपक्रममात्रमुद्गातुरिति[5] गम्यते[6] ॥

जाते स्तुवीरन् ॥ १० ॥

वाचयित्वा यजमानं।
"पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा। पुनर्नः पाह्यंहसः।
सह[7] रय्या[7] निवर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या[8] विश्वतस्परि"[9][b]॥
इत्यनुमन्त्र्याभिजुहुयात् ॥ ११ ॥

स्पष्टे[10] ॥

तदुक्तं ब्राह्मणेन ॥ १२ ॥

"प्रेद्धो अग्ने दीदिहि"[c] इति समन्त्रको[11] होमो ब्राह्मणेन विहित इति[d]। अग्निप्रहरणमाध्वर्यवं[12] सूत्रकारेणोद्गातुर्विधानाभावादिति[13] ॥

स्वाहाकारेणोत्तराम् ॥ १३ ॥

केवलं स्वाहाकारेणोत्तरामाहुतिं[14] जुहुयादिति ॥

[1] °णी D. [2] °मध्यात्म° C. [3] मन्थे° G. [4] G om. [5] स्तोमविधा° G. [6] D om. [7] सहारय्या TG; D and TD have originally सह रन्या, but correct to रय्या and रया respectively. [8] °प्स्निया D, TD; °स्फन्या TG; °स्या G. [9] विश्वतस्वरि TD. [10] G om. [11] मन्त्रेण G. [12] अत्राग्निप्र° G; °प्रहरणनमा° C, D. [13] °विधानादिति G. [14] °त्तरं G.

[a] VS. 19, 9. [b] SV. II, 9, 2, 8, 2. 3. [c] RV. 7, 1, 3. SV. II, 6, 1, 10, 3.
[d] PV. Br. 12, 10, 19.

अपः सावका[1] उपनिधाय महानाम्नीभिः स्तुवीरन् ॥ १४ ॥

अवकायुक्ताः सावका इति ॥

यो यः सामाङ्गं[2] ब्रूयात्स उदघोषं जनयेत् ॥ १५ ॥

यो यः सामाङ्गं[3] प्रस्तावादिकं ब्रूयात् । स उदके[4] घोषं[4] जनयन्ब्रूयादिति ॥

वाचयित्वा यजमानं ता निनयेदास्तावे[5] "अनाधृष्टा ऽसि तां[6] त्वा सोमो राजा ऽवतु यामपीया[7] उपतिष्ठन्त आपो[8] ये[9] शाक्करा ऋषभा ये स्वराजस्ते अर्षन्तु ते वर्षन्तु ते कृण्वन्त्विषमूर्जं रायस्पोषं तद्विदेय" इति । "समन्या[10] यन्ति"[10a] इति[10] वा[11] । "समुद्रं वः प्रहिणोमि"[b] इति वा ॥ १६ ॥

आस्तावे स्तुतिसमीपदेश इति ॥

सर्वैर्वा ॥ १७ ॥

सर्वैर्वा[12] पूर्वोक्तैर्मन्त्रैर्निनयेयुर्न[13] विकल्पितैरित्यर्थः[13] ॥

अष्ठीवतोरवका उपोहेरन् ॥ १८ ॥

यथास्वमष्ठीवतोः[14] कटिप्रदेशयोरवका उपोहेरन्वाससो[15] ऽभ्यन्तरमिति[15] ॥

छदिषि[16] वर्षकामो ऽध्यासयेदिति शाण्डिल्यः ॥ १९ ॥

अवका इत्यनुवर्तते । निदध्यादित्यर्थः[17] ॥

गोष्ठे पशुकामः ॥ २० ॥

सभायां यशस्कामः २१ ॥

श्मशाने ऽभिचरन् ॥ २२ ॥

स्पष्टानीति ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ८ ॥

[1] स्नावका C; स्नावका G. [2] सोमाङ्गं TG. [3] सामादिकं G. [4] उदघोषं G. [5] निनयेनास्तावेन TD. [6] तं G. [7] °पीता C. [8] अपो D. [9] यै TG. [10] समान्यतीवती TG. [11] TD om. [12] G om. [13] C om. न; °नयेरन् अविक° G. [14] यथासाम° G. [15] वाससो न्तर इति G. [16] °षु G. [17] This Comm. is missing in C and D.

[a] RV. 2, 35, 3. SV. I, 7 (Ār. S.), 3, 6. [b] Cf. 4, 1, 8. AV. 10, 5, 23.

वारवन्तीयस्य[1] स्तोत्रे धेनूः[2] संवाशयेयुर्दक्षिणतः कृत्वोत्तरतो वत्सान् ॥ १ ॥

षष्ठेऽहनि वारवन्तीयं पृष्ठं[3]। तत्स्तुतिकाले धेनूः संवाशयेयुः। कथमित्याह[4]। दक्षिणतो बहिर्वेदि धेनूः कृत्वा तासां वत्सान्बहिर्वेद्युत्तरतः[5] कृत्वेति। वत्सैः पृथक्कृतानां धेनूनां यथा शब्दो जायते। तथा कार्यमिति ॥

पूर्वेण[6] सदः[7] संसृज्य पश्चिमेनाग्नीध्रीयमुदीचीरत्यजेयुः[8] ॥ २ ॥

सदसः[9] पुरस्ताद्धेनूर्वत्सांश्च संसृज्य पश्चिमेनाग्नीध्रीयमुदीचीर्धेनूरुत्कालयेयुरिति ॥

वाचयित्वा यजमानं गोनामभिरनुमन्त्रयेत "हव्ये काम्ये चन्द्रे ज्योत[10] इडे[11] रन्ते जुष्टे[12] सूनरि मयि वो रायः श्रयन्तामिड एह्यदित एहि जुष्टे जुष्टिं[13] ते गमेयमुपहूता[14] उपहवं वो[15]ऽशीय" इति ॥ ३ ॥

गोनामभिर्धेनूरनुमन्त्रयेतेति[16] ॥

"सहर्षभाः"[a] इति वा ॥ ४ ॥

उभाभ्यां वा ॥ ५ ॥

स्पष्टे[17] इति[17] ॥

अद्भिश्चेदुपाकुर्युस्ता निनयेदास्तावे आपोहिष्ठीयाभिः ॥ ६ ॥

यद्यध्वर्यवोऽद्भिः स्तोत्रमुपाकुर्युः। तदा स्तोत्रसमाप्तौ स्तुतिदेशे ता[18] अपो[19] निनयेदिति ॥

[1] G om. स्य. [2] धेनु G; धेनुः TD. [3] G om. [4] कथमित्यत आह G. [5] सदसो वहिर्वे° G. [6] TG ins. व. [7] सदसः G, TG. [8] °मुदीचीस्त्यजेयुः TD; मुदीचीं त्य° D. [9] सदः C. [10] द्योत G, TG. [11] इडे C. [12] जुष्टे C. [13] जुष्टं TG. [14] G om. उपहूता. [15] योप TG. [16] °र्धेनुमनु° G. [17] स्पष्टमिति D, G; Sūtras 4 and 5 are one Sūtra in G. [18] G om. [19] आपो C.

[a] SV. I, 7 (Ār. S.), 4, 12.

षष्ठेऽहनि संस्थितेऽबहुवादिनः स्युः[1] ॥ ७ ॥

अबहुवादिन[2] इति[2] बहुभाषणं न कुर्युरिति ॥

न चाधीयीरन्नोत्तरस्याह्न[3] उपाकरणात् ॥ ८ ॥

उत्तरस्याह्न उपाकरणात्पूर्वं स्वाध्यायाध्ययनमपि न कुर्युरिति । वाग्देव्याः[4] श्रमापनोदनार्थमिति[4] ॥

सर्पिर्मधुभ्यामृत्विजो भोजयेदहीनेष्वन्यतरेण वा ॥ ९ ॥

षष्ठेऽहनि संस्थिते सर्पिर्मधुभ्यां व्यञ्जनभूताभ्यामृत्विजो भोजयेदन्यतरेण वेति ॥

सर्पिषैव[5] तृतीयसवने सत्त्रेषु ॥ १० ॥

सत्त्रेषु सर्पिषैव भोजयेत् । निषिद्धं हि[6] मध्वशनं दीक्षितानामिति भावः । अत्र[7] ब्राह्मणं "न बहु वदेन्नान्यं पृच्छेन्नान्यस्मै प्रब्रूयात् । मधु वाशयेद्घृतं वा"[a] इति[7] ॥

एतस्यान्यतरस्मिंस्त्र्यहे[8]ऽतियाह्याणां भक्षयेयुः स्तुत्वा पृष्ठेन ॥ ११ ॥

एतस्य षडहस्यान्यतरस्मिन् त्र्यहे उत्तरस्मिन्वा[9] पृष्ठेन स्तुत्वाऽतिग्राह्यभक्षणमिति[10] ॥

विषुवद्व्रतयोश्च ॥ १२ ॥

विषुवति महाव्रते च पृष्ठेन स्तुत्वा भक्षयेयुरिति ॥ अथ भक्षणस्य[11] मन्त्रं[11] कालं[11] चाह[11] ॥

त्रिष्टुप्छन्दसा पूर्वं चमसेभ्यः ॥ १३ ॥

गतमिति[12] ॥

अन्यच्च चैतस्मिन्काले यानाहरेयुः ॥ १४ ॥

अन्येष्वप्यहःस्वेतस्मिन्पृष्ठ्यस्तुत्यनन्तरकाले यान्ग्रहानाहरेयुः । तानपि त्रिष्टुप्छन्दसा भक्षयेदिति ॥

[1] G om. [2] G om.; C ins. च after इति. [3] °धीयेरन्निति नो° G. [4] वा भेदश्रुत्याश्रमोपनोद° G. [5] सर्पिणैव TG. [6] G ins. माध्वं हि. [7] The passage अत्र—वा इति is missing in C and D. [8] °न्यतसिंस्त्र्यह्ये TG. [9] °स्मिन् त्र्यहे वा G. [10] °ह्याभक्षण° G. [11] भक्षणमन्त्रमाह G. [12] G om.

[a] PV. Br. 13, 12, 14. 15.

सह धर्मैः सर्वत्र पृष्ठ्यः[1] स्यात् ॥ १५ ॥

न केवलं गवामयने । यत्र पृष्ठ्यो भवति[2] । तत्र तत्र सर्वत्र यथोक्तैर्धर्मैरन्वितो भवेत्पृष्ठ्य इति ॥

दशमव्रते च ॥ १६ ॥

[3]दशरात्रस्य दशममहरविवाक्यं च[4] महाव्रतं च सर्वत्र यथास्वं वक्ष्यमाणैर्धर्मैरन्विते स्यातां । न[5] केवलं गवामयन इति ॥

अभीवर्तस्तोत्रीयानाभिप्लविकान्पृष्ठ्ये शंसयेद्ब्राह्मणाच्छंसिना[6] कालेयर्चो ऽच्छावाकेन सर्वत्र यदा पवमाने स्याताम् ॥ १७ ॥

यदा पृष्ठ्ये षडहे माध्यन्दिने पवमाने कल्पकारोक्ते अभीवर्तकालेये स्यातां । तदानीमभीवर्तस्तोत्रीयानभिप्लवे कृतान् "तं वो दस्ममृतीषहम्"[a] इत्यादीन् षट् प्रगाथान्क्रमेणैकैकं पृष्ठ्ये शंसयेत्[7] । तत्र ब्राह्मणाच्छंसिना ऽभीवर्तस्य शंसयेत्[8] कालेयस्याच्छावाकेन[9] । तत्र प्रथमद्वितीययोरह्नोर्नौधसश्यैतयोर्ब्रह्मसाम्नोरभीवर्तस्य च समानस्तोत्रीयत्वान्न पृथगनुशंसनं । तृतीयादिष्वेव[10] । तद्यथा "वयं घ त्वा सुतावन्तः"[b] इत्येतं[11] शस्त्वा[12] "आ[13] त्वा[13] सहस्रमा शतम्"[c] इत्यनुशंसयेदिति[14] ॥

सर्वत्र "इन्द्र क्रतुं नः"[d] ब्राह्मणाच्छंसिनोर्ध्वं विषुवतः प्रागतिरात्रात् ॥ १८ ॥

विषुवत ऊर्ध्वं सर्वेष्वहःसु प्रागुदयनीयातिरात्रादस्तूयमानमपि[15] "इन्द्र क्रतुं न आभर" इति प्रगाथं ब्राह्मणाच्छंसिना ऽनुशंसयेदिति ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ ९० ॥

[1] पृष्ठः TG. [2] भाव इति G. [3] G ins. तथा. [4] C om. [5] D om.
[6] संशये° C; नुशंस° G, TG; °णाच्छंसिनं वा TG; °सिना वेति G; G leaves out the rest of the Sūtra.
[7] संश° C, D; the Comm. is missing in G up to शंसयेत्. [8] संश° C, D. [9] कालेयर्चौ च्छावाकेनेति G.
[10] G ins. पृथगनुशंसनं. [11] इत्येकं G; °तां D (?). [12] शंसित्वा G. [13] G om.
[14] °शंसेदिति G. [15] °दहस्तूय° G.

[a] RV. 8, 88, 1. SV. I, 3, 1, 5, 4; II, 1, 1, 13, 1. PV. Br. 11, 4, 3. [b] RV. 8, 33, 1. SV. I, 3, 2, 2, 9; II, 2, 2, 12, 1. PV. Br. 12, 4, 3. [c] RV. 8, 1, 24. SV. I, 3, 2, 1, 3; II, 6, 2, 5, 1.
[d] RV. 7, 32, 26. SV. I, 3, 2, 2, 7; II, 6, 3, 6, 1. PV. Br. 4, 7, 2.

विश्वजिति वैराजे धर्मान्कुर्यात् ॥ १ ॥

सर्वपृष्ठो विश्वजित् । तत्र वैराजे पृष्ठे अग्निमन्थनादिधर्मान्कुर्यात् । ननु च । षडहप्रयुक्ता[1] धर्माः कथं विश्वजिति स्युः । उच्यते[2] । एकत्र[3] क्रतौ षण्णां पृष्ठानां संनिपातो[4] हेतुः । पृष्ठस्थाने प्रयोगस्य[5] धर्मनिमित्तमिति[6] मन्यत[6] इति ॥

इतरेष्वपि पृष्ठेष्वित्याचार्यमतिः[7] ॥ २ ॥

पृष्ठसंनिपात एव धर्मनिमित्तं । न[8] पृष्ठस्थाने[8] प्रयोगः । तेन विश्वजिति[9] रथंतरादिष्वपि तत्तद्धर्माः[10] स्युः । एतेन सर्वपृष्ठोऽप्तोर्यामो व्याख्यात इति । अथ[11] दशरात्रस्य सप्तमेऽहन्यार्भवे पवमाने गायत्र्यां[12] गायत्रमौक्षमिति सामद्वयं ब्राह्मणविहितं । तत्र[13] शाखान्तरविहितसामद्वयमाहृत्य[14] समुच्चिन्वन्[15] स्तोमातिरेकप्रसङ्गात्त्रीणि सामान्येकर्चानि करोति ॥

सप्तमेऽहन्यग्नेरर्कोऽध्यर्धेडं च सोमसाम[16] मौक्षस्य[16] पूर्वयोः ॥ ३ ॥

अन्त्यस्तोत्रीयामौक्षं कृत्वा ततः पूर्वयोरितरत्सामद्वयमित्येवं[17] सामतृचं कुर्यात् । गायत्रं[18] तु तृचे कुर्यादिति भावः ॥ प्रकारान्तरमाह ॥

मौक्षसोमसामनी[19] गायत्रस्योत्तरयोरग्नेरर्कः तिसृष्विति वा ॥ ४ ॥

स्पष्टमिति[20] । अत्र गायत्रमौक्षाभ्यामेव स्तोमसंपत्तेः[21] शाखान्तरोपसंभारो वैकल्पिक इत्याहुः । तथा[22] निदानकारः । सप्तमेऽहन्यग्नेरर्कः[23] कृताकृतो[24] भवत्यब्राह्मणविहितत्वादिति । सूत्रद्वयमपि[25] "द्विप्रभृतीन्ककुप्प्रभृत्यानन्तर्येण"[25a] इत्यस्यापवाद[25] इति[25] ॥

[1] °क्ता G. [2] C om. [3] एक G. [4] °पातौ C. [5] °गं G. [6] °मित्तमन्यत G. [7] °ष्वाचार्य° D. [8] नष्टस्थाने C. [9] °जिदिति G. [10] धर्मा G. [11] अथा D. [12] °त्र्या C. [13] G om. [14] G om. शाखान्तरविहित. [15] समुच्चितं G. [16] सोमसामयोर्महामौ° TG; सोमसामौ° G. [17] °व G. [18] गेयं G. [19] °सोमसाम्नि TG. [20] C om. and G has before अत्र the following passage: अथ प्रथमायां गायत्रं गीत्वा तस्योत्तरयोर्मौक्षसोमसामनी इति । [21] °संपत्तये ब्राह्मण तैरवेच्याच्च G. [22] C ins. च. [23] हन्यर्कः D. [24] कृतो G. [25] G om.

[a] 16, 3, 26.

साकमश्वेडानांसंक्षारौ व्यतिहरन्त्येके ॥ ५ ॥

अथाष्टमनवमयोर्माध्यन्दिने[1] पवमाने साकमश्वमिडानांसंचारश्चेति[2] क्रमेण सामद्वयं विहितं[a]। तयोर्व्यतिहारमेके[3] शाखिनः कुर्वन्त इत्यर्थः ॥

सुरूपक्रौञ्चे एकर्चयोरेके ॥ ६ ॥

अष्टमे ऽहन्यार्भवे गायत्र्यां सुरूपमनुष्टुभि क्रौञ्चं ब्राह्मणे विहितं[b]। ते एवैकर्चे[4] स्यातां। न लैषिरत्रैडाविति[5]। केचिद्द्विपर्यास एव। स्वपक्षमा "द्विप्रभृतीन्ककुप्प्रभृत्यानन्तर्येण" इति वचनादिति ॥ अथ नवमे ऽहन्याह[6] ॥

नवमस्य ज्योतिष्टोमः पर्यासः[7] साप्तमिक इत्येके ॥ ७ ॥

नवमस्य बहिष्पवमाने[8] "तृच उत्तमो भवति"[c] इति ब्राह्मणं। कः पुनरसौ तृच इति न[9] ज्ञायते तत्राध्ययनाभावात्[10]। तत्रेदमाह। ज्योतिष्टोमसंबन्धो पर्यासः स्यात् सप्तमाहःसंबन्धी[11] वेति। पर्यासशब्दो ऽन्तवचनः[12]। उत्तमस्तृच इत्यर्थः। अत्र ब्राह्मणे[13] "परीतो षिञ्चता सुतम्"[d] इति बृहत्यामेकादश सामानि विहितानि। तद्यथा। पृष्ठं कौल्मलबर्हिषमर्कपुष्पं दैर्घश्रवसं[14] वैयश्वमाभीशवमिति षड्ग्रामेगेयानि। देवस्थानं संक्षति भर्गो[15] यश इति चत्वार्यरण्येगेयानि। ततो वासिष्ठमित्येकादश[e]। "असावि सोमो अरुषः"[f] इति जगत्यां[16] सामद्वयं[17] विहितं[17g] "दीर्घतमसो ऽर्को ऽन्यः[18] सामराजं[19] वा"[19h] इति[19]। तत्र सर्वेषां[20] तृचकरणे स्तोमातिरेकप्रसङ्गात्कथं क्लृप्तिरिति न विद्मः ॥ तत्रेदं[21] प्रतिपद्यते ॥

तस्य[22] बृहत्यामरण्येगेयानि तृचेषु पृष्ठं च ॥ ८ ॥

तस्य नवमस्याह्नो बृहत्यां देवस्थानप्रभृत्यरण्येगेयं[23] सामचतुष्टयं तृचेषु कुर्यात्। पृष्ठं

[1] °नवमयोः अह्नयोर्मा° G. [2] °संचाराविति D; °रं चेति G. [3] °तिहरन्त्येके G. [4] एकै° C. [5] लैपिर° C; °षी° D. [6] This Comm. runs in G. thus: अष्टमे ह्न्यार्भवे पवमाने षोडश सामानि विहितानि तेषु स्तोमातिरेकेषु प्रसङ्गा अवश्य द्वावेकर्चौ तत्र द्विप्रभृतीन्ककुप्प्रभृत्यानन्तर्येणेति वचनात् ऐषितत्रयोरेकत्रा करणमिति स्वपक्षः। पक्षान्तरस्तु सुरूपक्रौञ्चयोरेव करणमिति। अथ नवमे ह्न्याह। [7] पर्यायः G. [8] °नं G. [9] G om. [10] तत्राप्यध्य° G. [11] D corr. in margin सप्तमाहः to सप्तममहः. [12] G om. न्त. [13] G ins. माध्यन्दिने पवमाने गायत्र्यां सामाष्टकं निधाय. [14] दैर्घ्य° G. [15] भागो D. [16] °त्यौ G. [17] G om. [18] G om. [19] °राजमिति सामद्वयविहितं G. [20] वि स वृषां G. [21] अत्रे° G. [22] अत्र G. [23] °स्थानवृहत्य° C; D illegible.

[a] PV. Br. 14, 9, 17, and 15, 3, 14. [b] PV. Br. 14, 11, 10, and 29. [c] PV. Br. 15, 1, 12.
[d] RV. 9, 107, 1. SV, I, 6, 1, 3, 2; II, 5, 2, 12, 1. PV. Br. 15, 3, 3. [e] PV. Br. 15, 3, 18-33.
[f] RV. 9, 82, 1. SV. I, 6, 2, 2, 9; II, 5, 2, 13, 1. PV. Br. 15, 3, 4. [g] PV. Br. 15, 3, 34. 35. [h] 9, 3, 12.

च ग्रामेगेयमपि तृचे कुर्यात् । शिष्टानि षट्सामानि सर्वाण्येकर्चानि[1] स्युरिति ॥ तत्र नियममाह ॥

वासिष्ठमध्यास्यायाम् ॥ ९ ॥

"परि[2] स्वानः"[2a] इत्यध्यास्यायामृचि[2] वासिष्ठं स्यादिति ॥

वैयश्वं प्राग्भर्गादाभीशवं यशसः ॥ १० ॥

पूर्वपठितमपि वैयश्वं स्थानादुत्कृष्य[3] भर्गात्पूर्वं निवेशयेत् जामिदोषपरिहारार्थं । तथाभीशवमपि यशसः[4] पूर्वं[4] निवेशयेत्[4] । एवमेव[5] स्यात् । किमर्थं तर्हि तयोः पूर्वपाठः । ग्रामेगेयत्वात्तैः सह पाठः । न[6] पुनरनुष्ठानार्थमिति[7] । तत्र पृष्ठादुत्तराणि कौल्मलबर्हिषादीनि त्रीणि सामानि सामतृचं कुर्यात् । कुतः । "त्रीनेकतृचे[8] नानास्तोत्रीयासु"[b] इति वचनात् । तदेतदेकं मतमिति ॥ मतान्तरमाह ॥

सप्तैव तृचेषु यैरजामीत्यपरम् ॥ ११ ॥

नावश्यमरण्येगेयं तृचे ग्रामेगेयमेकर्च इति नियमः । किं तु । येषां संनिपाते जामिदोषो न भवति ' तानि यानि कानिचित्सप्त गृहीत्वा तृचेषु कुर्यात् । इतरत्सामचतुष्टयं विकल्पार्थमिति । तदानीमध्यास्या ऽपि लुप्यते अनपेक्षितत्वादिति ॥ अथ यज्जगत्यां सामद्वयमुक्तं ' तद्विकल्प्यत[9] इत्याह ॥

दीर्घतमसो ऽर्को ऽन्त्यः[10] सामराजं वा ॥ १२ ॥

गतमिति[11] ॥ यदा पुनः सामराजं पवमानान्त्यं ' तदा विशेषमाह ॥

पृष्ठस्योत्तरयोर्दीर्घतमसो ऽर्को माण्डवं चैडं सामराजे ऽन्त्ये ॥ १३ ॥

"परीतो षिञ्चता" इति प्रथमायां पृष्ठं कृत्वा तस्योत्तरयोर्दीर्घतमसो[12] ऽर्को माण्डवं[13] चेति[13] । एवं सामतृचं कुर्यात् सामराजस्य पवमानान्त्यत्वपक्ष[14] इत्यर्थः । तत्र नाम्नातमपि माण्डवं सूत्रकारः शाखान्तरात्कल्पितवानिति ॥ अथ दशमे ऽहनि बहिष्पवमानब्राह्मणं "पञ्चानामकामनुरूपैः प्रत्यवयन्ति"[c] इति "तथा तन्नवर्चो भवति"[c] इति[15] च तदस्पष्टमिति मत्वा व्याचष्टे ॥

[1] सर्वाण्ये॰ G. [2] शिणन्त इत्यध्यास्या॰ G. [3] ॰त्कर्ष G. [4] G om. [5] प्रथमायामेव G. [6] G om. [7] ॰र्थं इति G. [8] ॰कर्चतृचे G. [9] ॰ल्प्यत D. [10] न्त्यो G. [11] G om. [12] ॰त्तमयो॰ G. [13] ॰वश्चेति D; ॰वं चैडति G. [14] C om. त्व; G om. पक्ष. [15] G om.

[a] RV. 9, 107, 3. SV. II, 5, 2, 12, 3. [b] 16, 3, 12. [c] PV. Br. 15, 7, 6.

दशमस्य बहिष्पवमानं द्वितीयप्रभृतीनां पञ्चानामह्नामनुरूपाः प्रथमाच्च[1] बहिष्पवमानं तन्नवर्चम् ॥ १४ ॥

पृष्ठ्यषडहस्य द्वितीयप्रभृतीनामह्नां बहिष्पवमानेषु ये अनुरूपास्तृचाः । तानत्राहरेत् । प्रथमाच्च कृत्स्नं बहिष्पवमानमाहरेत् "तन्नवर्चम्" इति ब्राह्मणेनोक्तं[2] । उच्यत[2] इति ॥

अनुरूपेषु तृचाः प्रतिलोमा ऋचो नवर्चे इति गौतमः ॥ १५ ॥

तत्रानुरूपेषु तृचाः प्रतिलोमाः स्युः । "असृक्षत प्र वाजिनः"[a] इति षष्ठस्याह्नो रूपं प्रथममाहरेत् । ततः पञ्चमस्येत्येवं नवर्चे तृचः प्रतिलोमाः स्युः । "उपास्मै गायता नरः"[b] इत्युपक्रम्य "अस्य प्रत्नामनु द्युतम्"[c] इत्येवमन्तं[3] । कुत एतत् । "अनुरूपैः प्रत्यवयन्ति यथा ऽभ्यारुह्य प्रत्यवरोहेत्"[d] तादृक्तदिति । प्रतिलोम्यविधानादिति ॥

सर्वत्र[4] तृचा इति धानंजय्यः ॥ १६ ॥

नवर्चे[5] ऽपि तृचा एव प्रतिलोमाः[6] स्युः । न पुनर्ऋच इत्यर्थः ॥

यथाधीतं नवर्चमिति शाण्डिल्यायनः ॥ १७ ॥

नवर्चे नास्त्येव[7] प्रतिलोम्यमिति मतान्तरं । कुतः[8] । "नवर्चो भवति"[9] इत्येतावन्मात्रश्रुतेरिति ॥

सर्वत्रर्चः[10] प्रतिलोमा इति शाण्डिल्यः ॥ १८ ॥

अनुरूपेषु नवर्चेष्वृच[11] एव प्रतिलोमाः स्युः । न पुनस्तृचा इत्यर्थः[12] । तथा ऽत्र ब्राह्मणं "प्रजापतिं वा एतेनाह्ना परिवेविषति"[e] इत्यादि । तस्यायमर्थः । अस्मिन्नहनि तेन "पवस्वेन्दो वृषा सुतः"[f] इति द्वितीयस्याह्नो रूपं प्रथममाहृत्य प्रतिलोमा ऋचः कुर्यात् ।

[1] ०स्य C. [2] ०णेनोच्यत G. [3] ०न्त्यं C. [4] TG om. त्र. [5] नवर्च्चे G. [6] प्रा० G. [7] नैव G. [8] G om. [9] भवंति C, D. [10] ०र्च्चः G. [11] नवर्चे नवर्चे G. [12] In G the order of the words differ, thus: इत्यर्थः तेन पवस्वन्दो [!] वृषा सुत इति द्वितिय्यस्याह्नो रूपं प्रथममाहृत्य प्रतिलोमा ऋचः कुर्य्यात् एवं क्रमेणोत्तरेषामपीति अत्र ब्राह्मणं प्रजापतिं वा एतेनाह्ना परिवेविषतीत्यादि तस्यायमर्थः तस्मिन्नहनि ऋत्विजां क०, etc.

[a] Cf. 8, 4, 12. [b] Cf. 8, 2, 29. [c] RV. 9, 54, 1. SV. II, 1, 2, 16, 1. [d] PV. Br. 15, 7, 6. [e] PV. Br. 15, 7, 3. [f] RV. 9, 61, 28. SV. I, 5, 2, 5, 3; II, 2, 1, 2, 1. PV. Br. 11, 6, 3.

एवं क्रमे ऋत्विजां कर्तव्यस्य विस्मृतौ न केनचिद्वाच्यं[1]। तथा सति विस्मरदोषोद्भावनेन[2] प्रजापतेर्भोजनविघ्नः[3] कृतः[4] स्यादिति। एवं दोषमुक्त्वा पुनरपि ब्राह्मणं "तद्‌ या आहुः"[a] इत्यादि। तस्यायमर्थः। यथाऽतिथये[5] भोजनार्थमन्नमपथ्येनाह्रियमाणं प्रतिषेधन्ति। एवं कर्तव्यस्य विस्मृतौ[6] विवचनेन प्रतिबोधनं कार्यमिति। तत्र "यावत्यनुष्टुप्तावतीं वाचं[7] संपाद्य[8] विब्रूयुः"[8 b] इति ब्राह्मणं॥ तदाचष्टे[9]॥

अप्रतिभामेतस्मिन्नहन्यनुष्टुम्मात्रां[10] कृत्वाचक्षीरन्॥ १९॥

कर्तव्यस्य विस्मृतिरप्रतिभा तामनुष्टुप्परिमितां वाचं[11] विब्रूयुः। अप्रतिभां निरस्य कर्तव्यं स्मारयेयुरित्यर्थः। तत्र मन्त्रस्याप्रतिभाते यदि मन्त्रोऽनुष्टुप्स्यात्, तदा तं[12] कृत्स्नं मन्त्रं पठेयुः प्रतिबोधनाय॥ अथ यदि छन्दोऽन्तरं, तत्र प्रकारमाह[13]॥

ज्यायसि[14] छन्दसि[15] लुम्पेयुरक्षराणि॥ २०॥

अनुष्टुभो ज्यायसि[16] छन्दसि "त्वामिद्धि हवामहे"[c] इत्यादावप्रतिभाते[17] द्वात्रिंश-दक्षरं मन्त्रे पठित्वा विरमेयुः। तत ऊर्ध्वमप्यप्रतिभाते शिष्टं पठित्वा पुनरपि तं[18] मन्त्रमनु-ष्टुम्मात्रमभ्यस्येयुरिति[19]॥

कनीयस्यभ्यस्येयुः॥ २१॥

अनुष्टुभः[20] कनीयसि[21] छन्दसि[21] गायत्र्यादौ कृत्स्नं पठित्वा पुनरपि गायत्र्याः[22] पादमनपेक्षितमभ्यस्येयुरनुष्टुप्त्वार्थमिति॥

वाचैव विब्रूयुरिति धानंजय्यः "वागनुष्टुप्"[23 d] इति[24] हि ब्राह्मणं भवति॥ २२॥

वाचैव विवचनं[25] कार्यं नानुष्टुबादरणीयेति[26] मतान्तरं। तथा चाश्वलायनोऽप्याह।

[1] क्यं C; केनचिद्विवच्यं G. [2] विस्मरण एव दोषो° G. [3] °घ्नं D; °विप्र C. [4] °तं D. [5] C ins. यो. [6] G om. वि. [7] C and D om.; but D adds वा in margin. [8] °द्यापि ब्रूयुः G. [9] G reads तेन पवस्विन्द्रो वृषा सुत इति द्वितिय्यस्याह्नो रूपं प्रथममाहृत्य प्रतिलोम ऋचः कुर्य्यादेवं क्रमं तद्व्याचष्टे। [10] TG ins. वा. [11] G ins. वृत्का. [12] तत् G. [13] °रान्तरमाह G. [14] °सी TD, G. [15] °सी TD, G, TG. [16] °सी G. [17] इत्यादौ च प्र° G. [18] G om. [19] °ष्टुप् मन्त्र अभ्य° G. [20] °भा D. [21] °सो G. [22] °त्र्यां G. [23] वार्त्तानुष्टुप्बु TG; °ष्टुग् C, D, TD. [24] TG om. [25] हि वचनं C. [26] °ष्टुभादर° C.

[a] PV. Br. 15, 7, 4. [b] PV. Br. 15, 7, 5. [c] RV. 6, 46. 1. SV. I, 3, 1, 5, 2; II, 2, 1, 12, 1. PV. Br. 11, 9, 1. [d] PV. Br. 10, 3, 13 (and elsewhere).

"संशये बहिर्वेदि स्वाध्यायप्रयोगः"[a] इति । कर्मविस्मरणे त्वनुष्टुभा[1] श्लोकेन[2] विवाच्यं[3] । तद्यथा

"पृष्ठहोमस्त्वया कार्यस्तदनन्तरमृग्जपः ।
ततश्च स्तोमयोगः[4] स्यात्ततः[4] स्तोत्रं ततो जपः" ॥ इति ॥

अग्निष्टोमसाम्ना स्तुत्वा[5] प्राक्पत्नीसंयाजेभ्यो यदेभिः प्रसृते[6] परार्ध्यं[7] व्रजितं[8] स्यात्तद्गत्वा प्रत्याव्रज्य मनसाऽनुत्साहे[9] हुतेषु[9] पत्नीसंयाजेषु गार्हपत्य उद्गाता जुहुयात् "उपसृजन्धरुणं मात्रे मातरं धरुणो धयन् रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहा"[10b] इति पूर्वां स्वाहाकारेणोत्तराम् ॥ २३ ॥

प्रसृतो[11] नाम बहिर्वेदिसंचारप्रदेशः[12] । तत्र यदेभिर्यजमानैः परार्ध्यं व्रजितं[13] परः खण्डः अर्धोत्तरं[14] गतं भवेत् । तावन्तं तं प्रदेशं गत्वा प्रत्याव्रज्य जुहुयादित्यन्वयः । मनसाऽनुत्साह इति गमनाशक्तौ[15] मनसैव गमनागमनं भावयेत् । इयन्तं प्रदेशं गतोऽस्म्यागतो[16]ऽस्मीति चेति ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ११ ॥

आहवनीयं गत्वा[17]ऽयं[18] सहोहा इति त्रिरुद्गाता गायेत् ॥ १ ॥

होमानन्तरमाहवनीयमौत्तरवेदिकमग्निं गत्वा गायेदिति ॥

निधनमितरावनुपेयाताम् ॥ २ ॥

स्पष्टमिति[19] ॥

[1] प्यनु॰ G; ॰वा C, D. [2] श्लो॰ C. [3] विद्वाच्यं C. [4] ॰गस्यात्यस्तत G. [5] ह्युत्वा G. [6] प्रसृतो G. [7] ॰र्द्धं TG; ॰र्धं C. [8] G om. तं. [9] नुत्सहेत्तेषु TG. [10] ॰रग्न्वा॰ C. [11] प्रसृतं G; D corr. प्रसृतो to प्रसुतो. [12] ॰संचरदेशः G. [13] G om. [14] G ins. व्रजित. [15] गमनशक्तो G. [16] स्यागतो C. [17] TD adds पश्चात्तिष्ठन्तो; these words occur in D in margin. [18] The Avagraha is not in the MSS. [19] G om.

[a] Āśv. S'r. 8, 12, 11. [b] Cf. Ait. Br. 5, 22, 15. VS. 8, 51.

अभिदक्षिणमावृत्य पूर्वया द्वारा सदः[1] प्रविशेयुः ॥ ३ ॥

गानं कृत्वा प्रदक्षिणमावृत्य प्रविशेयुरिति ॥

यदा ऽध्वर्युरुपाकुर्यात्तदा[2] मानसेन स्तुवीरन् ॥ ४ ॥

स्पष्टमिति[3] ॥

"आयं[4] गौः पृश्निरक्रमीत्"[5][a] इति गायत्रेण ॥ ५ ॥

स्पष्टमिति ॥

पृथक्स्तोत्रीयाभ्यो[6] हिङ्कारम्[7] ॥ ६ ॥

प्रतिस्तोत्रीयमुपक्रमे हिङ्कृत्य गायेदिति ॥

त्रिकेण स्तोमेनास्तोमयोगा[8] यजमानवाचनाकुशाविधानेन[9] ॥ ७ ॥

स्तोमयोगरहितेन यजमानवाचनरहितेन[10] कुशाविधानरहितेन च[11] त्रिकेण स्तोमेन स्तुवीरन्निति ॥

प्रतिहारवेलायां प्रतिहर्ता ऽपन्यात्[12] ॥ ८ ॥

अपाननमुच्छ्वास[13] इति ॥

उत्तमां प्रस्तुत्य[14] "एषा"[14] इति[14] होतारमीक्षेत ॥ ९ ॥

स्पष्टमिति ॥

सर्वमेतस्मिन्स्तोत्रे मनसा कुर्युः समीक्षणेन विज्ञापयन्तः ॥ १० ॥

अन्योन्यसमीक्षणेन[15] प्रस्तावादिभक्तीनामुपक्रमांश्च[16] समाप्तीश्च[17] विज्ञापयन्तः स्तुवीरन्निति ॥

[1] सदसः D. [2] °कुर्यादथ G. [3] G om. [4] अयं D. [5] °रक्रमम् G.
[6] °स्तोत्र्याभ्यो TD. [7] °रे TD; °रेण TG. [8] °योगास्त TG. [9] °धानेति G.
[10] °वाचरहि° C. [11] G om. [12] पत्न्यात् TG. [13] अपानमु° G, C. [14] °त्येषेति G, TG.
[15] अन्योन्यं स° C, G. [16] °भक्तिना° C; °क्रमं च G; °क्रमश्च C, D. [17] °प्तिं च G; °प्तिश्च C, D.

[a] RV. 10, 189, 1. SV. II, 6, 1, 11, 1.

यदा[1]ऽध्वर्युर्भक्षं[1] प्रयच्छन्मन्येत[2] तस्य मनसोपहूय "कस्त्वा कं भक्षयामि" इति भक्षयेयुः ॥ ११ ॥

यदाऽध्वर्युः समीक्षणेन[3] भक्षप्रदानं कुर्वन्मन्यते । तदा तस्य मनसा मन्त्रेण भक्षयेयुरिति ॥

"ब्रह्मोद्यं वदन्ति"[a] इति ॥ १२ ॥

श्रुत्युपादानमेतद्व्याख्यानार्थतां[4] व्याचष्टे ॥

गायत्रीं त्रिर्ब्रूयुरिति धानंजय्यः ॥ १३ ॥

"तत्सवितुः"[b] इत्येतां । सा हि वेदानां माता परब्रह्मणश्च प्रतिपादिकेति । तत्कथनं ब्रह्मोद्यमिति[5] ॥

चतुर्होतारमभिप्रेत्यैतदिति गौतमः ॥ १४ ॥

अत्र तैत्तिरीयकं "चतुर्होतॄन्होता व्याचष्टे स्तुतमनुशंसति शान्त्यै"[c] इति । तथा "एतद्वै देवानां परमं गुह्यं ब्रह्म यच्चतुर्होतारः"[d] इति च । तेन चतुर्होतॄन् चित्तिः स्रुक्[6] चित्तमित्यादीन्पञ्चानुवाकान्मानस्यानुशंसनरूपानभिप्रेत्य[e] एतद्वाक्यं "ब्रह्मोद्यं वदन्ति" इति गौतमस्य पक्ष इति[7] ॥

तर्कं वा कथयेयुर्यथाऽश्वमेध इति शाण्डिल्यः ॥ १५ ॥

यथाऽश्वमेधे[8] वादिप्रतिवादिरूपेण तर्कयोः[9] कथनं[9] । एवमत्रापि स्यात्[10] । तद्ब्रह्मोद्यमिति ॥

प्रजापतिं परिवदन्ति ॥ १६ ॥

"दुर्लभस्त्वं[11] प्रजापते[12] दुराराधश्च[12] त्वं हि पुरुषोत्तमोऽपि सन्[13] स्वमात्मानं[13] छादयसि । तथाऽपि त्वां[14] दृशमेनाक्षा वयं गृहीतवन्तः । क्वेदानीं गमिष्यसि" इत्येवं परिवादः ।

[1] यदध्वर्युर्भक्षणं D. [2] TG om. त. [3] D inserts भक्षणेन. [4] ०नार्थं G.

[5] G reads here: तत्सवितुर्वरेण्यमित्येता गायत्री सा हि साक्षात् ब्रह्मणः प्रतिपादकास्त्रयं च बहुवेदानां ह्यसौ माता तस्या वचनं । ब्रह्मोद्यमिति धानंजय्यः. [6] स्रुक् D; सृक् C, G.

[7] G reads as follows: चित्तिसृक् चित्तमाज्यमिति पञ्चानुवाकांश्चतुर्होतारो ह्यध्वर्युभिराधीतारो स्तेषामाद्यं होता व्याचष्टे सत्यनुशंसनत्वेन तस्य वचनं ब्रह्मोद्यमिति गौतमः । एतद्वै देवानां परमं गुह्यं ब्रह्मवच्चतुर्होतार इति हि तैत्तरीयकमिति. [8] ०धो G. [9] तर्कं प्रश्नप्रतिवचने कुर्वन्ति G.

[10] कुर्युः G. [11] दुर्लभं सत्वं G; दुर्लभत्वं C, D. [12] ०पतेः दु० D; ०पतेरारा० C.

[13] सत् सु मत्यानं मायया G. [14] द्वा C.

[a] PV. Br. 4, 9, 12. [b] RV. 3, 62, 10. SV. II, 6, 3, 10, 1. [c] Taitt. Br. 2, 2, 7, 3.

[d] Taitt. Br. 2, 2, 1, 4; cf. also 2, 2, 7, 3. [e] Cf. Taitt. Br. 2, 2, 4, 1.

तथा च ब्राह्मणं । "आप्नेवैनं[1] तद्याचचते तावदापामैनमिति"[2a] । यथा महावने मत्तगजमुपायेन गृहीत्वा[3] परिवदति[4] क्वेदानीं दुर्बुद्धे[5] गन्तुं[5] शक्तिरिति[5] । तादृशमेतदिति ॥

पापैः कर्मभिरित्येके न त्वधीमहे ॥ १७ ॥

प्रजापतिकृतैः पापैः कर्मभिः परिवदेयुरित्येके न तु तथा वयमधीमहे । किं तु परिवादमन्त्रमधीमहे[6] । तस्माद्यथोक्त एव परिवाद इति ॥

अपि वा ऽध्वर्युबह्वृचानां किंचित्स्यात् ॥ १८ ॥

अपि वा ऽध्वर्युबह्वृचानां[7] किंचित्परिवादरूपमधीतं[8] तेन वा परिवदेयुरित्येके[9] । अकुशलो[10] वा अयं प्रजापतिर्यो दंशमशकान् ससृजे[11] यः[11] स्तेनानित्यादि[12] । तथा बह्वृचानां "प्रजापतिः[13] स्वां[13] दुहितरमभ्यध्यायत्"[b] इत्यादीति ॥

एतस्यां वेलायां वरान्वृणीरन्मनसा यानिच्छेयुः ॥ १९ ॥

मनसा प्रार्थितानि वृणीरन्न वाचेति[14] ॥

अभयं[15] धानंजय्यः[15] सर्वकामानपराधात्[16] ॥ २० ॥

अभयमेव वृणीरन् । तत्रैव सर्वकामानामनपराधात्[17] । अपराधः प्रच्युतिरिति ॥

उत्तरत उद्गातौदुम्बरीं गृह्णीयात्पश्चात्प्रतिहर्ता दक्षिणतो ब्रह्मा पुरस्तादितरे सर्वे ॥ २१ ॥

स्पष्टमिति[18] ॥

अथ जपेयुः "इह धृतिरिह स्वधृतिरिह रन्तिरिह रमध्वम्"[19] "मयि धृतिर्मयि स्वधृतिर्मयि[20] रमो मयि[21] रमध्वम्"[21c] इति वोभौ वा ॥ २२ ॥

स्पष्टमिति ॥

[1] आह्वै° C. [2] °दाप्यमै° D. [3] G ins. सन्तुष्टाः. [4] °न्ति G. [5] G reads दुर्ग्रहो गूढचारी गमिष्यसीति. [6] °वादमाचम° G. [7] अध्वर्य्वादीनां G. [8] G om. तं. [9] °देयुर्यथा G. [10] आकुला G. [11] ससृजेत् यं D; ससृजेय C; सृजेद्य G. [12] स्तेनानित्यानिति C, D. [13] °पतिर्या G. [14] °वेति G. [15] अभवद्धा° TG; D corr. अ to उ. [16] °कर्मान° TG. [17] The beg. of the Comm. up to here missing in G. [18] स्पष्टानीति G. [19] रमस्व G, TG, and, originally, D, TD. [20] स्ववृति° TD. [21] मै रमस्वां TG.

[a] PV. Br. 4, 9, 14. [b] Ait. Br. 3, 33, 1. [c] Cf. VS. 8, 51 (and 22, 19); Ait. Br. 5, 22, 10.

वाग्यता अपिधाय द्वारे आसीरन्ना नक्षत्रप्रवचनात्[1] ॥ २३ ॥

सदः[2] पूर्वापरे द्वारे अपिधाय वाग्यता आसीरन्यावदुदितानि नक्षत्राणीति वदन्ति। तावन्तं कालमिति। औदुम्बरीग्रहणं मन्त्रजपस्य वाग्यमनाङ्गमिति ॥

प्रोक्ते नक्षत्रे पूर्वया द्वारोपनिष्क्रम्य[3] सुब्रह्मण्याप्रणवैर्वाचं विसृजेरन्निति धानंजय्यः ॥ २४ ॥

नक्षत्राण्युदितानीति[4] प्रोक्ते निष्क्रम्य सुब्रह्मण्यायाः[5] प्रणवानुक्त्वा[5] वाचं विसृजेरन्निति ॥

श्रुत्वैवाहूयमानाया इति शाण्डिल्यः ॥ २५ ॥

श्रुत्वैव प्रणवं[6] वाग्विसर्गं[6] इति ॥

वरवरणवाग्यमने[7] यजमान एव कुर्यादहीनेषु ॥ २६ ॥

स्पष्टमिति[8] ॥

कृत्वेतरे यथार्थं कृत्वेतरे यथार्थम् ॥ २७ ॥

इतरे यजमानव्यतिरिक्ताः प्रजापतिपरिवादं[9] कृत्वा यथार्थं गच्छेयुः। औदुम्बरीग्रहणं मन्त्रजपं[10] च[10] ते न कुर्युः। तयोर्वाग्यमनाङ्गत्वादिति ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ १२ ॥

नवमः पटलः ॥ ९ ॥

द्राह्यायणकृते सूत्रदीपे धन्विविनिर्मिते।
नवमः पटलो वृत्तो वामदेवः प्रसीदतु ॥

॥ इति तृतीयो ऽध्यायः ॥

[1] TD om. प्र. [2] सदस: C. [3] द्वारा चोप° G. [4] °त्राभ्युदि° C, D.
[5] सुब्रह्मण्याह्वानकाले सर्वेषु सुब्रह्मण्येष्विति चिरुक्त्वा G. [6] प्रणवं D; प्रणवांस्तूष्णीं वि° G.
[7] वरवारण° TG. [8] G om. [9] °वादनान्तं यथास्वं कर्म G. [10] °जपस्य G.

अथ महाव्रतं प्रस्तौति ॥

महाव्रतस्य पृष्ठ उपाकृते युक्त्वा स्तोमं परिमादो गायेदिति भाडितायनः[1] ॥ १ ॥

गायत्रं[2] बृहद्रथंतरे[3] भद्रं राजानमिति सामपञ्चकं संहत्य पृष्ठस्तुतिसाधनं[4] महाव्रतमित्युच्यते । तद्योगात्क्रतुरपि । तत्र "प्राणेन पुरस्तादाहवनीयमुपतिष्ठन्ते"[a] इत्यादि ब्राह्मणेन त्रयोदश परिमादो महाव्रतस्तोत्राङ्गतया क्लृप्ताः । तासां[5] गानमाह[6] सूत्रकारः । स्तोमयोगानन्तरं गायेत्परिमाद[7] इति[8] । स्तोत्राङ्गतया प्रयोगकाले[9] नामधेयमिति[9] ॥

प्रतिगृह्य तृणे अयुक्त्वेति गौतमशाण्डिल्यौ धानंजय्यश्च ॥ २ ॥

उपाकरणदर्भौ प्रतिगृह्य स्तोमयोगमकृत्वैव गायेदिति मतान्तरमिति ॥

प्रागेव स्तोत्रोपाकरणादित्येके ॥ ३ ॥

पृष्ठोपाकरणात्पूर्वमेव परिमादो गायेदित्येक इति ॥

दक्षिणेनाग्नीध्रीयं गत्वोत्तरेणाग्निं प्राणप्रभृतिभिरुपतिष्ठेरंस्तदुक्तं ब्राह्मणेन[b] ॥ ४ ॥

अग्निशब्देन चित्याग्नेरभिधानमिति[10] । ब्राह्मणेनैवोपस्थानं सर्वमुक्तं ॥ तत्र विशेषमाह ॥

सर्वाण्युद्गाता सकृत्सकृद्गायेन्निधनमितरावनूपेयाताम्[11] ॥ ५ ॥

सर्वाण्युद्गातैव गायेत् । कथं तर्हि ब्राह्मणे "उपतिष्ठन्ते" इति बहुवचनं । इतरयोरपि निधनवचने अन्वयाद्बहुवचनमिति ॥

[1] भाटि° G, TG. [2] °त्र्यां D. [3] °रो G. [4] °स्तुवति सा° G. [5] तयां G.
[6] गानकालमाह G. [7] गायेदिति प° G. [8] D ins. in margin स्तोत्रं.
[9] G reads: प्रयोगकाले महाव्रतस्य पक्षिणो लोमनखस्थानीयानां साम्नां नामधेयमिति.
[10] चित्यग्निभिधियतेति G. [11] °नुपेयातां D, G; °नुपेयातादंताम् TD.

[a] Pv. Br. 5, 4, 1. [b] PV. Br. 5, 4, 1 et seq.

अपि मध्ये निधनेषु ॥ ६ ॥

अन्तर्निधनेष्वपि[1] प्रस्तोतृप्रतिहर्तारावुपेयातामिति ॥

आद्यन्तस्तुब्धेषु[2] पदाय यदाय स्तोभेत ॥ ७ ॥

आद्यन्तस्तोभयुक्तेषु प्राणादिसामसु प्रतिपादं स्तोभेत् । चित्रादादिस्तोमाभावेन प्राणादीनां परिसामत्वाद्यथाध्ययनं गाने[3] प्राप्ते[3] वचनमेतदिति[3] ॥

तेनैव प्रत्याव्रज्य पुच्छम्[4] ॥ ८ ॥

तेनैवोक्तेन मार्गेण प्रत्याव्रज्य पुच्छमपानसाम्ना ब्राह्मणोक्तेनोपतिष्ठेरन्निति[a] ॥

व्रतपक्षयोः पूर्वेण दक्षिणं पक्षम्[5] ॥ ९ ॥

तत्र[6] "व्रतपक्षाभ्यां[7] पक्षावुपतिष्ठन्ते"[b] इति ब्राह्मणं । तत्र[8] प्रतिपक्षं सामद्वये[9] प्राप्ते व्यवस्थामाह । व्रतपक्षयोर्मध्ये पूर्वेण साम्ना दक्षिणं पक्षमुत्तरेण साम्नोत्तरं पक्षमिति ॥ अत्र ब्राह्मणं । "प्रजापतेर्हृदयेनापिकक्षमुपतिष्ठन्ते"[10c] इति । तत्र द्वावपिकक्षौ[11] भवतः । तत्र नियममाह ॥

उत्तरमपिकक्षमुपतिष्ठेरन्[12] ॥ १० ॥

"वसिष्ठस्य निहवेन चात्वालमुपतिष्ठन्ते" "वैश्वदेव्यामृचि भवति"[d] इति च ब्राह्मणं ॥ तत्र वैश्वदेवीमृचं दर्शयति ॥

"विश्वे देवाः"[e] इति वसिष्ठस्य[13] निहवमूहेत[13] ॥ ११ ॥

ननु च ऊहेदिति वचनमनर्थकं[14] । तस्याध्ययनसिद्धत्वात्[14] । सत्यमेतद्वचनोत्तरकालमूहः[15] कृत इत्याहुः । अन्ये तु विस्पष्टार्थं वचनमित्याहुरिति[15] ॥ "सत्रस्यार्ध्याग्नीध्रं"[16f] इत्यादि[17] ब्राह्मणं । तत्रोपस्थानदेशमाह ॥

[1] अप्यन्तर्नि° G. [2] °स्थब्देषु TG. [3] गानेन प्राप्तव° G. [4] पुच्छे TG. [5] G om.
[6] अथ G. [7] D om. व्रत. [8] G om. [9] °द्वयेन G. [10] °पिपक्ष° D.
[11] °पिपक्षौ D. [12] °पिपक्ष° D. [13] वसिष्ठनिह° G, TG, and, originally, TD.
[14] °र्थकं स्यात् अध्यय° G. [15] The passage सत्यमे°—°त्याहुरिति is missing in G.
[16] °ध्रीयं D. [17] इति G.

[a] PV. Br. 5, 4, 2. [b] PV. Br. 5, 4, 3. [c] PV. Br. 5, 4, 4. [d] PV. Br. 5, 4, 5. 6.
[e] RV. 6, 52, 14. SV. I, 7 (Âr. S.), 3, 9. [f] PV. Br. 5, 4, 7.

चात्वालमुपस्थायोत्तरेणाग्नीध्रीयं गत्वा पश्चात्तिष्ठन्तः ॥ १२ ॥

स्पष्टमिति[1] ॥

तत एव प्रत्यङ्मुखा इति धानंजय्यः ॥ १३ ॥

तत एव चात्वालदेश एव स्थित्वेत्यर्थः ॥ तत्रैव "आ तमितोर्निधनमुपयन्ति"[a] इति ब्राह्मणं । किं पुनस्तन्निधनमत आह ॥

तस्योत्तमं निधनमा तमितोरुपेयुः[2] ॥ १४ ॥

तस्य सत्रस्यर्द्धेरुत्तममेव[3] निधनं "सुवर्ज्योतिः"[4] इत्येतद्यावत्प्राणस्य क्रमो भवति । तावन्तं कालमनुच्छ्सन्त आवर्तयेयुरित्यर्थः[5] ॥ "श्लोकानुश्लोकाभ्यां हविर्धाने"[b] इति ब्राह्मणं ॥ तत्र तयोर्देशभेदमाह ॥

पूर्वेण हविर्धाने[6] पुरस्तात्प्रत्यङ्मुखाः पश्चादितरेण ॥ १५ ॥

पूर्वेण श्लोकेन हविर्धानयोः पुरस्तात्प्रत्यङ्मुखाः[7] स्थित्वा । इतरेणानुश्लोकेन हविर्धानयोः पश्चात् स्थित्वेत्यर्थः ॥ "यामेन मार्जालीयं"[c] इति ब्राह्मणं । किं पुनर्यामं कथं चोपस्थानं[8] तदुभयमाह ॥

तत एवेक्षमाणा मार्जालीयं "नाके सुपर्णम्"[d] इति यद्द्वन्द्वेषु ॥ १६ ॥

हविर्धानदेश एव स्थित्वा "नाके सुपर्णं" इति द्वन्द्वेषु[9] सामसु यत्पठितं यामं । तेनोपस्थानमिति ॥ "आयुर्नवस्तोभाभ्यां सदः"[e] इति ब्राह्मणं । तत्र प्रकारमाह ॥

यथा हविर्धाने तथा सदः ॥ १७ ॥

यथा हविर्धाने । तथैव सदोऽप्युपतिष्ठेरन् । सदसः पुरस्तात् स्थित्वा पूर्वेण सामोपस्थानं पश्चादुत्तरेणेत्यर्थः ॥ "ऋष्यस्य[10] साम्ना गार्हपत्यं"[f] इति ब्राह्मणं । तत्र देशमाह ॥

[1] G om. [2] ऋतमिचताऋूपेयुः TG. [3] °र्द्धैरु° G. [4] स्वर्ज्योतिः G.
[5] अवर्तयन्नित्यर्थः D; आवर्त्तयेयुरिति स्वर्ज्योति स्वर्ज्योतिरित्येवं पुनः पुनरिति G (Cf. Sāyaṇa, PV. Br. 5, 4, 9, पुनः पुनरावर्त्तयेयुः). [6] °धानं गत्वा TG. [7] G om. पुरस्तात्.
[8] वोपस्थानं G. [9] यद्द्वन्द्वेषु G. [10] ऋष्यस्य D.

[a] PV. Br. 5, 4, 9. [b] PV. Br. 5, 4, 10. [c] PV. Br. 5, 4, 11. [d] RV. 10, 123, 6. SV. I, 4, 1, 3, 8. II, 9, 2, 13, 1. [e] PV. Br. 5, 4, 12. [f] PV. Br. 5, 4, 13.

अन्तर्वेदि प्रत्यङ्मुखा गार्हपत्यमिति धानंजय्यः १८ ॥

गतमिति[1] ॥

तस्यैव पश्चात्तिष्ठन्त इति शाण्डिल्यः ॥ १९ ॥

तस्यैव गार्हपत्यस्य पश्चात्प्राङ्मुखास्तिष्ठन्त इत्यर्थः ॥ "यत्परोक्षं[2] निधनमुपेयुर्ह्रीतमुखं प्रतिमुञ्चेरन् यत्प्रत्यक्षमुपयन्ति ह्रीतमुखमेवापजयन्ति"[3a] इति ब्राह्मणं[4]। तस्यार्थमाह[4] ॥

इन्द्रप्रभृति[5] प्रत्यक्षं निधनमुपेयुः ॥ २० ॥

किं पुनः प्रत्यक्षमिति चेत् । तदुक्तं निदानकारेण । ह्रस्वं प्रत्यक्षं द्राघितं[6] परोक्षमपि वेन्द्रेति । प्रत्यक्षमिन्द्र इति परोक्षमित्यादि । "ऋष्यास[7] इन्द्रभुङ्"[b] इतीन्द्रपदप्रभृत्युपरि तानि सर्वाणीन्द्रवाचकानि पदानि संबुद्ध्यन्तानि प्रयोज्यानीति सूत्रकारस्याभिप्रायः । इन्द्रप्रभृतीति वचनात् । तेन "इन्द्रस्त्सरपूताः"[b] इति प्रथमान्तमपोह्य इन्द्र सर पूतेति संबुद्ध्यन्तं प्रयोज्यं । यथा "ऋष्यासः"[7] "इन्द्र" "मघवन्" इन्द्रेति त्रीणि संबुद्ध्यन्तानि । तद्वदिति । पुरस्थितस्यैव हि संबोधनमिति । संबुद्ध्यन्तमिति । प्रत्यक्षमिति व्यपदिश्यते । "ह्रीतमुखमेवापजयन्ति" इति स्तुतिवाक्यस्यायमर्थः । प्रगल्भो हि भ्रान्तं[8] संबोधयितुं क्षमः । यथा "शक्तस्त्वमसि राजेन्द्र जगतः परिपालनं" इति । अप्रगल्भस्तु स्वगृह एव[9] परोक्षं[9] कथयति "समर्थोऽयं राजा" इति । तेन प्रत्यक्षनिधनवचने सति ह्रीतमुखं लज्जायुक्तमधृष्टमुखं[10] त्यक्तं भवति । सदसि प्रगल्भो भवतीति[11] यावदिति[11] ॥

प्रथमः खण्डः ॥ १ ॥

[1] G om. [2] तत्र पक्षे रात्रयं G. [3] °क्षयन्ति G. [4] ब्राह्मणस्यार्थमाह G.
[5] इतिप्रभृति TG. [6] In D altered to दीर्घितं. [7] ऋष्यास D. [8] Conj.; D has मांतं, G महंसं.
[9] एवापरोक्षं G. [10] कातरमधृष्ट° G. [11] भवतीत्यर्थः G.

[a] PV. Br 5, 4, 15. [b] SV. I, 7 (Ār. S.), 4, 9 (Stobha). Cf. Sāyaṇa, PV. Br. 5, 4, 14 and 15.

अथ राजानं संनाहयेत् ॥ १ ॥

अथोद्गाता[1] राजानं तद्राष्ट्राधिपतिं[2] क्षत्रियमाहूय तस्य कवचबन्धं[3] कारयेदिति ॥

तस्य द्व्यवरार्ध्यौ रथावनुयायिनौ स्याताम् ॥ २ ॥

अवरपक्षौ[4] द्वौ रथौ[5] तस्य राज्ञोऽनुयायिनौ भवत इति ॥

पूर्वेण देवयजनं संनह्येरन्नन्ये[6] तस्मात्[6] ॥ ३ ॥

तस्माद्राज्ञो ह्येतस्य सचिवाः पुरस्ताद्देवयजनस्य स्थित्वा संनहनं कुर्युः ॥ राज्ञस्तु संनहनदेशं वक्ष्याम इति ॥

दक्षिणेन परियायुः[7] ॥ ४ ॥

दक्षिणेन देवयजनं राजा राजपुरुषाश्च परिगच्छेयुरिति ॥

पूर्वेण पत्नीशालामुद्गाता गत्वा दक्षिणे[8] वेद्यन्ते प्राचो दर्भान्संस्तीर्य[9] तेष्वेनं प्राङ्मुखमुपवेशयेत्[10] ॥ ५ ॥

एनं राजानं प्राङ्मुखमुपवेशयेदिति[11] ॥

अथास्मै वर्माभिहरेत् ॥ ६ ॥

अथास्मै राज्ञे कवचमाहरेदुद्गाता संनहनार्थमिति ॥

[1] अथोमागा G. [2] तस्य राष्ट्रस्याधि° G. [3] वचं वधं D. [4] अपरपक्षे G.
[5] रथं G. [6] °रन्नित्येतस्मात् D, TD. [7] परीयुः TG. [8] °णा TD, G; °णेन TG.
[9] दर्भानांस्तीर्य TG. [10] °ख उप° G. [11] G om. the Comm.

अन्यं वा[1]ऽभिहरन्तमनुमन्त्रयेत[1] "उत्तिष्ठ राजन् परिवर्मा ऽस्यश्वयुक्तो रथो विततो दैव आखणो[2] विशां राजा ब्राह्मण[3] एधि गोप्ता" इति ॥ ७ ॥

कृत्वेत्यध्याहारः[4]। अथवा स्वयं कवचमाहरन्नन्यं पुरुषमभिहरन्तं कृत्वा राजानमुद्गाता[5]ऽभिमन्त्रयेत "उत्तिष्ठ राजन्" इति मन्त्रलिङ्गाद्राजाभिमन्त्रणं। एतच्चर्म पर्यस्यस्वेति[6] मन्त्रपदान्वयः। यथा[7] "घृतवतीमध्वर्यो[8] स्रुचमास्यस्व"[8 a] इति पर्यासः[9]। परिधानं कवचं परिधेहीत्यर्थः[9] ॥

"पश्चिमेन परियाहि" इत्युक्त्वा[10] तेनैव प्रत्याव्रज्योत्तर एनं वेद्यन्ते ऽवस्थाप्य[11] ब्रूयात् "हस्तघ्नं[12] बध्नीष्वोज्ज्यमायुधं[13] कुरुष्व त्रीनिषूनुपकल्पयस्वायस्मयानन्यमेव[14] कं च चतुर्थम्" इति ॥ ८ ॥

पत्नीशालायाः "पश्चिमेन परियाहि" इति राजानमादिश्योत्तरवेद्यन्तमेनमवस्थाप्य[15] ब्रूयात् "हस्तघ्नं बध्नीष्व" इत्यादि प्रैषं। तस्यायमर्थः। हस्तो येन त्रायते ज्याभिघातात्। स हस्तघ्नः। तं हस्ते बध्नीष्व। आयुधं[16] धनुर्ज्यं उद्गतज्यं आततज्यं[16] कुरुष्वेत्यर्थः। त्रीनिषूनयस्मयानुपकल्पयस्व चतुर्थमिषुं स्वयमेव कं च ताम्रमयस्मयं[17] वा कल्पयस्वेति ॥

"प्रतिधत्स्व" इति ब्रूयात् ॥ ९ ॥

धनुषि शरं "प्रतिधत्स्व" इति प्रेष्येदिति ॥

तं प्रतिदधानमनुमन्त्रयेत "वैणावताय प्रतिधत्स्व शङ्कुं[18] मा ऽपप्रोष्ट मो ते ऽतिपप्तद्ब्रह्मणो[19] गुप्त्यै विधृत्यै धारयात्र"[20] इति[20] ॥ १० ॥

"वैणावताय"[21] इत्यादिमन्त्रस्यायमर्थः। वीणावान् प्रवीणः समर्थः। तस्य भावो वैणावतं कौशलं। कौशलाय शङ्कुं[22] शरं[22] प्रतिधत्स्व। न[23] कं चित्प्रतियोगिनमुद्दिश्य[23] किंतु केवलं हस्तकौशलसंपत्त्यर्थं प्रतिधत्स्वेत्यर्थः। "मा ऽपप्रोष्ट मो ते ऽतिपप्तत्" इति सो ऽयं प्रतिहितः शरः प्रमादान्मा ऽपप्रोष्ट मा ऽपगच्छेन्मा[24] गलितो[25] भूयादित्यर्थः। किं च "मो ते ऽतिपप्तत्"[26] त्वामतिलङ्घ्य[26] मा ऽतिपतेत् किं तु ब्राह्मणानां गुप्त्यै केवलमत्र धारयेति[27] ॥

[1] वाहरन्त° D. [2] आखुणो TG, G. [3] व्रह्मण TG, TD. [4] °हार्यः G. [5] जनमुद्गा° D.
[6] पर्यास्यस्वेति D; पर्यस्यस्वेति G. [7] G om. [8] Both D and G read °र्योस्स्रु°.
[9] पर्यासः—°हीत्यर्थः missing in D. [10] इत्युक्ता D. [11] एनमव° TG. [12] अस्तघ्नं G.
[13] वुध्नि° G; °ष्वोध्यमा° D; ष्वाज्यमा° TG, and thus also corrected in TD. [14] °न्यमेकश्च TG; °स्मयन्यामेव G. [15] °न्तमेवमव° G. [16] G reads आयुधिन्धनुरुतगाताज्यमाततज्यां.
[17] ताम्रमयमयस्मयं G. [18] संकु D; शक्त TG. [19] तियत्तद्ब्र° TD. [20] धारयात्त्रेति G.
[21] वैण° G. [22] शंकुशतं G. [23] G om. न—°द्दिश्य. [24] पगच्छन्मा G; हगवे मा D.
[25] For गलितो D substitutes गुरु काष्ठं. [26] तिसप्तत्वाम° G. [27] धामयेति D; धारयेदिति G.
[a] S'. Br. 1, 5, 2, 1.

संहृत्य[1] "आतिष्ठ" इति ब्रूयात् ॥ ११ ॥

शरं संहृत्य[1] रथयोरनुयायिनोरन्यतरं[2] "आतिष्ठ" इति प्रेष्येदिति[2] ॥

उत्तरेणाग्नीध्रीयं पूर्वापरे चर्मणी विबध्नीयुर्दक्षिणेन रथपथं शिष्ट्वा[3] ॥ १२ ॥

आग्नीध्रीयमण्डपस्योत्तरतश्चर्मणी द्वे विबध्नीयुराकाशे यजमानपुरुषाः पूर्वमेकमपरं चैकं। तयोर्दक्षिणतो रथस्य संचरमवशिष्यैवं कुर्युरिति ॥

तं ब्रूयात् "प्रदक्षिणं देवयजनं परीयाः[4] पूर्वं चर्मागमनेषु[5] विध्येरेकैकेनोत्तरोत्तरयेनतिपातयन्नपरस्मा[6] इतरे यथा ऽभिप्रेतमस्येयुस्तृतीयेन विद्ध्वोदङ् प्रयायास्तदा चतुर्थमिषुं यां दिशं मन्येथास्तामस्येः[7] 'अव ब्रह्मद्विषो जहि'[a] इति गा दृष्ट्वा ऽवतिष्ठेथास्तत्र त्वा विस्रंसयेयुः"[8] ॥ १३ ॥

"विस्रंसयेयुः"[9] इति[10] मन्त्रान्तः। इतिशब्दो ऽध्याहर्तव्यो मन्त्रसमाप्तिसूचकः। मन्त्रस्य चायमर्थः। त्वं[11] प्रदक्षिणं देवयजनं परितो गच्छ। परिगत्य परिगत्यागमनं पूर्वं चर्मणैकैकेन विध्येः। उत्तरोत्तरेति। यथा पूर्वविद्धस्य शरस्योपरि उत्तरः शरो भवेत्। तथा विध्येः[12]। अनतिपातयन्निति[13]। यथा चर्मातिलङ्घ्य[14] शरो न[15] गच्छेत्। तथा कुर्वन्नित्यर्थः। अन्यस्मै[16] चर्मणे यथाकाममितरे राजपुरुषाः शरानस्येयुः। तृतीयेन शरेण पूर्वं चर्म विद्ध्वोदङ्मुखो गच्छेः[17]। तदानीं चतुर्थमिषुं यस्यां दिशि निरसितुं मन्येथाः। तां प्रति निरस्येः[18] "अव ब्रह्मद्विषो जहि" इति मन्त्रेण। तदानीं गा दृष्ट्वा तूष्णीमेव[19] तिष्ठेथाः। तत्र त्वां[20] विस्रंसयेयुः[21] विश्वस्ताः सुखं चरेयुः धनुष्पाणिं त्वां दृष्ट्वा तासामुद्वेगो मा भूदित्यर्थः ॥

ब्राह्मणमुल्केमं[22] हिङ्कारवेलायां कारयेयुः[23] ॥ १४ ॥

द्वितीयः खण्डः ॥ २ ॥

[1] संभृत्य G. [2] G reads °तरमातिप्रेष्यादिति. [3] शिष्टेति D, G. [4] परियात् G, TG. [5] चर्मावगम° D, TD. [6] °पादय° TG, G; °र्येमतिपा° D. [7] °स्येयुः G, TG. [8] विश्रंभयेयुः G, TD, D. विस्रब्धयेयुः TG; cf. Caland, Zeitschrift d. deutschen Morgenl. Gesellschaft, 52, p. 427. Though the reading विश्रंभ° rests on MS. authority, and is not, as Caland believes in his notes on the corresp. Sūtra in Lāṭyāyana (3, 10, 16) "falsch gelesen oder gedruckt worden," I have adopted Caland's conjecture, since in Drāhy. 15, 2, 4 (= Lāṭy. 5, 6, 7) the Grantha MSS. actually read विस्रंसयेत्, as also the Devanāgarī MS. W in the Comm. on that Sūtra. [9] विस्रंभ° D; G om. [10] G om. [11] G om. [12] विध्यः C; विध्यैः G; D corr. विध्यैः to विध्यः. [13] °पादय° G. [14] °लंघ्यं G. [15] G om. [16] अपरस्मै G. [17] गच्छत् G. [18] °स्येयुः G. [19] D om. [20] G ins. गावो. [21] विस्रंभ° D, G. [22] °मुकथेम TG; °मुल्कैमं D. [23] कारयेति TD; कारयेदिति TG, G.

[a] Cf. RV. 8, 53 (64), 1. SV. I, 3, 1, 1, 1; II, 6, 1, 3, 1.

भूमिदुन्दुभिमाव्रजेत् ॥ १ ॥

उत्तरकाले स्तुत्युपक्रमे हिङ्कारवेलायामिमं राजानं[1] "प्रदक्षिणं देवयजनं परीयाः" इत्यादिप्रैषार्थं कारयेदिति कं चिद्ब्राह्मणमादिश्य[1] भूमिदुन्दुभिं प्रत्युद्गाता गच्छेदिति ॥ कः पुनर्भूमिदुन्दुभिः । तमाह ॥

पश्चादाग्नीध्रीयस्यार्धमन्तर्वेदि श्वभ्रस्याखातं[2] स्यादर्धं बहिर्वेदि ॥ २ ॥

आग्नीध्रीयस्य पश्चाच्छ्वभ्रं निखनेत् । तस्यार्धमन्तर्वेदि स्यादर्धं बहिर्वेदीति ॥

आर्षभेणोत्तरलोम्ना चर्मणा पिहितः स्यात् ॥ ३ ॥

ऋषभचर्मणोत्तरलोम्ना सोऽयं श्वभ्रः पिहितः स्यात् । स भूमिदुन्दुभिरित्युच्यत इति ॥

"त्वं वागसि"।
"ये नः सत्त्वे अनिन्दिषुर्दीक्षायां[3] श्रान्त आसिते[4]।
अराद्धिं[4] तेभ्यो दुन्दुभे राद्धिमस्मभ्यमावद" ॥ इति ।

"परावद[5] द्विषन्तं घोरां वाचं परावदाथास्मभ्यं[6] सुमित्र्यां वाचं दुन्दुभे कल्याणीं कीर्तिमावद"इति । "परावद[7] द्विषतो वाद्यं[8] दुर्हार्दो[9] यो[10] विषूकुहो ऽथास्मभ्यं पुष्टिं राद्धिं[11] श्रियमावद दुन्दुभे" इत्येतैर्मन्त्रैः[12] पृथगाहत्य वालधानेन ॥ ४ ॥

"त्वं वागसि" इत्येकं यजुः । "ये नः सत्त्वे" इत्यानुष्टुभश्लोकः । द्वयमप्येको मन्त्रः तयोरन्त इतिकारणात् । तस्य चायमर्थः । यस्मात्सत्त्वे अनिन्दिषुर्दीक्षायां[13] दीक्षादिवसेषु[13] न किंचिदेभिस्तपस्तप्तमिति । हे श्रान्ते नित्यं तपस्विनि हे आसिते नित्यमासीने इति संबुद्धिः । नित्यमासीना[14] हि भूमिः । इतरास्तु दुन्दुभयो जङ्गमाः । अथवा "श्रान्ता

[1] G reads राजान (lacuna) कारयेदिति प्रदक्षिणं देवयजनं परीया इत्यादि कश्चित् ब्रा°.
[2] श्वभ्रस्य खातं G, TG. [3] अनिर्दिषुर्दी° D, TD. [4] आसीतारा° TD; आसीतेति रा° G; आसिते आरा° D; आसिते रा° TG (without avagraha). [5] °वतं G. [6] TD om. अथ.
[7] °वतं TG; °वत G. [8] वाक्यं D, TG; D corr. वाक्यं to वाद्यं. [9] दुह्रुहादेद्राम (?) TG.
[10] ये D (in margin). [11] राद्ध्यं TG. [12] इत्येनमेतैः TG, G (om. मन्त्रैः). [13] अनिर्दिष्टदीक्षादि° D.
[14] °मासिता G.

आसते" इति पाठः । तस्यायमर्थः । ये श्रान्ताः कर्म कर्तुमसमर्थाः कुर्वाणान्निन्दन्त आसत इति । हे दुन्दुभे तेभ्यो निन्दकेभ्यो अराद्धिमसिद्धिमावद ' अस्मभ्यं तु राद्धिं सिद्धिमावदेति ॥ अथ द्वितीयो मन्त्रः "परावद" इत्यादि । तस्यायमर्थः । यथा ऽस्माकं शत्रुः[1] पराभवेत् ' तथा तं वद घोरां वाचं निर्णुद । अथास्मभ्यं सुमित्र्यां[2] मैत्रगुणयुक्तां[3] वाचं कल्याणीं च कीर्तिमावदेति ॥ अथ तृतीयो मन्त्रः । "परावद[4] द्विषतः"[5] इति । तस्यायमर्थः । द्विषतो वाक्यं[6] परावद यो दुर्हार्दो[7] विषूकुहः ' यो विषुर्व्याप्तो भूत्वा किं कुत्र फलिष्यतीति नास्तिकवादं वदति ' स विषूकुहः । स्पष्टः शेषः । एवमेतैस्त्रिभिर्मन्त्रैर्वालधानेन पुच्छकाण्डेन पृथक्पृथग्भूमिदुन्दुभिमाहन्यादिति ॥

अन्यं वा घ्नन्तमनुमन्त्र्य[8] ॥ ५ ॥

हत्वेत्यध्याहारः । अथवा ऽन्यं पुरुषं घ्नन्तं हत्वा भूमिदुन्दुभिमुक्तैर्मन्त्रैरभिमन्त्रयेत । न स्वयं हन्यादिति[9] ॥

अप उपस्पृश्य यथेतं[10] प्रत्याव्रज्य पश्चात्तिष्ठन्तो ऽग्निमुपतिष्ठेरन् "नमस्ते गायत्राय यत्ते पुरो यत्ते शिरो नमस्ते रथंतराय यत्ते दक्षिणतो यस्ते[11] दक्षिणः[12] पक्षो नमस्ते बृहते यत्त उत्तरतो यस्त उत्तरः पक्षो नमस्ते यज्ञायज्ञीयाय यत्ते पश्चाद्यत्ते पुच्छं नमस्ते वामदेव्याय[13] यस्त आत्मा यत्ते मध्यम्" इत्येतैः पृथगङ्गान्यन्वर्थम् ॥ ६ ॥

अप उपस्पृश्य यथैत[14] प्रत्याव्रज्य पश्चात्तिष्ठन्तः संचितं[15] चित्याग्निमुपतिष्ठेरन्[15] "नमस्ते" इत्यादिभिर्मन्त्रैर्यथालिङ्गं तानि तान्यङ्गानि शिरःपक्षादीन्यङ्गानि । अत्र राजनवामदेव्ययोरात्मत्वे ब्राह्मणे विकल्प उक्तः[a] । तथा भद्रयज्ञायज्ञीययोः पुच्छत्वे[b] । तत्र यदा भद्रराजनाभ्यां स्तुतिः ' तदोपस्थानमन्त्रस्योहः कार्यः । तथैव बह्वृचा अप्यधीयते[c] ॥

[1] शत्रुं G. [2] °त्रा D. [3] मैत्रागु° D; मैत्रावरुणयुक्तां G. [4] परमावद D; परावत G. [5] द्विषन्त G. [6] वाक्यः G. [7] दुर्हृदो D; दुर्ह्राद G. [8] °न्त्रयेत TG; न्त्रयतेति G. [9] The Comm. runs in G thus: अन्यमिति सप्तम्यर्थे द्वितीया अन्यस्मिन्वा पुरुषे वालधानेन घ्नति सति भूमिदुन्दुभिमन्त्रैः अभिमन्त्रयेन्न स्वयं हन्यादिति । अथवा हत्वेत्यध्याहारः । अन्यं वा पुरुषं घ्नन्तं हत्वा इति ॥ [10] यथेतं TD. [11] G om. [12] दक्षिणतः G. [13] °देव्यानि G. [14] यथेतं G. [15] संचितस्त्रिता° D; G om. संचितं and reads चित्यग्नि°.

[a] Cf. PV. Br. 5, 2, 6. [b] Cf. PV. Br. 5, 1, 19. [c] Cf. S'āṅkh. S'r. 17, 13, 1 et seq.

अथ सर्वं समस्तेन "तस्मै ते[1] सुभोः सुभुवो[2] भूयास्म नामासि नाम भूयासमाविरस्याविर्मा[3] कुरु सवितः प्र मा सुव यं[4] मनुष्याणां भूतौ संपश्यसि तेष्वपि[5] भूयासं श्रियं मयि धेहि" इति ॥ ७ ॥

अथ सर्वं चित्याग्निं समस्तेन "तस्मै ते" इत्यादिना मन्त्रेणोपतिष्ठेरन्निति ॥

उपस्थाय सदः प्रविशेयुः ॥ ८ ॥

एवं चित्याग्निमुपस्थाय[6] सदः प्रविशेयुर्महाव्रतस्तुत्यर्थं । अत्र[7] पक्षद्वयमस्ति । "सर्वे महर्त्विजो महाव्रतेन स्तुवीरन्"[a] "उद्गातैव वा सर्वेणोद्गायेत्"[b] इति । तत्र प्रथमपक्ष[8] उपस्थानान्तरमेव[8] सदःप्रवेशः[9] । द्वितीये तु पक्षे महाव्रतस्य शिरःपक्षपुच्छैर्यथा ब्राह्मणं "हविर्धाने शिरसा स्तुत्वा"[c] इत्युक्तप्रकारेण पुच्छपर्यन्तं गत्वा[10] राजनस्तुत्यर्थं सदःप्रवेश इति मन्तव्यं । कुतः । एतत्सदः प्रविष्टानां पुनर्निष्क्रमणविधानात् शिरःप्रभृतीनां च[11] तत्र तत्रैव देशे गेयत्वाच्चेति ॥

तृतीयः खण्डः ॥ ३ ॥

अपरया द्वारौदुम्बरीमासन्दीं मौञ्जविवानामनुहरेयुः[12] ॥ १ ॥

मौञ्जीभी[13] रज्जुभिर्वेष्टनं[13] यस्याः सा मौञ्जविवाना[14] । तामासन्दीं सदः प्रवेशयेयुर्यजमानपुरुषा[15] इति ॥

यज्ञीयस्य वृक्षस्यौदुम्बराभावे ॥ २ ॥

औदुम्बराभावे[16] यज्ञीयस्य वृक्षस्य विकारः स्यादासन्दीति ॥

मुञ्जाभावे दार्भम् ॥ ३ ॥

मुञ्जाभावे दर्भमयैः शुल्बैरासन्द्यावेष्टनं स्यादिति ॥

तस्याः प्रादेशमात्राः पादाः ॥ ४ ॥

तस्याश्चत्वारः पादाः प्रादेशमात्राः स्युरिति ॥

[1] मते G. [2] शुभवो TD; D corr. सुभुवो to सुभवो. [3] भूयासमाविर्मा G.
[4] यां G; यम TG. [5] तेष्वभि G, TG. [6] चित्यग्नि° G. [7] मन्त्र G. [8] °पक्षमुप° D.
[9] प्रविशो G. [10] गीत्वा D. [11] G om. [12] °विधानम° TD; °विवानमतिह° G, TG.
[13] मौञ्जीभिस्त्रिभिरथ तं वेष्टनं G. [14] मौंजी वि° D. [15] प्रविशेयुर्य° G. [16] उदु° G.

[a] PV. Br. 5, 6, 1. [b] PV. Br. 5, 6, 6. [c] PV. Br. 5, 6, 7.

अरत्निमात्राणीतराण्यङ्गानि ॥ ५ ॥

इतराण्यङ्गानि[1] प्राचीनोदीचीनफलकान्यरत्निमात्राणि स्युरिति ॥

दक्षिणेनौदुम्बरीं हृत्वा तस्या उत्तरतो निदध्युः ॥ ६ ॥

सदसो मध्ये यौदुम्बरी स्थूणा । तां दक्षिणेनासन्दीं[2] हृत्वा तस्या उत्तरतो निदध्युरिति ॥

तामुत्तरेणोद्गाता गत्वा पश्चादुपविश्य भूमिस्पृशोऽस्याः पादान्कृत्वा कूर्चानधस्तादुपोह्याभिमृशेत् "बृहद्रथंतरे ते[3] पूर्वौ पादौ श्यैतनौधसे अपरौ वैरूपवैराजे अनूची शाक्वररैवते तिरश्ची"[4] इत्येतैः पृथगङ्गानि ॥ ७ ॥

अस्या आसन्द्याः पादान्भूमिस्पृशो भूमौ[5] सुप्रतिष्ठिताकृत्वा चतुरः[6] कूर्चानासन्द्या अधस्तादुपोह्य तदङ्गान्यभिमृशेन्मन्त्रेण यथालिङ्गं[7] "वैरूपवैराजे अनूची" इत्यादि । अनूची प्राचीनफलके तिरश्ची उदीचीनफलके इति ॥

विवयनमालभ्य[8] "ऋचः प्राञ्च आताना यजूंषि तिर्यञ्चः सामान्यास्तरणं श्रीरुपबर्हणं वाकोवाक्यमतिरोका[9] वारवन्तीयं संधयो[10] राजनमात्मा प्रतिष्ठा यज्ञायज्ञीयम्"[a] इति ॥ ८ ॥

मुञ्जमयं[11] विवयनमालभ्य "ऋच प्राञ्चः" इत्यादि मन्त्रं जपेत् । प्राञ्च आतानाः प्राचीना रज्जवः । उदीचीना रज्जवस्तिर्यञ्चः[12] आतानाः । आस्तरणमुपबर्हणं च मुञ्जमयमेव । अतिरोका[13] छिद्राणीति[13] ॥

तां[14] मुखेनोरसा[14] बाहुभ्यामिति स्पृष्ट्वारोहेत् "वसवस्त्वा गायत्रेण छन्दसारोहन्तु तानन्वधिरोहामि राज्याय रुद्रास्त्वा त्रैष्टुभेन छन्दसारोहन्तु तानन्वधिरोहामि वैराज्यायादित्यास्त्वा जागतेन छन्दसारोहन्तु तानन्वधिरोहामि स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन छन्दसारोहन्तु तानन्वधिरोहामि साम्राज्याय"[b] इति ॥ ९ ॥

मुखेनोरसा बाहुभ्यामिति त्रिभिरङ्गैः स्पृष्ट्वा "वसवस्त्वा" इत्यादि मन्त्रैरारोहेदिति ॥ अथ मन्त्रविकल्पमाह ॥

[1] G om. [2] दक्षिणेनौदुम्बरीं G. [3] TD om. [4] °श्चीन TG. [5] भूतौ D. [6] चत्वारः G. [7] यालिंगं D. [8] व्यवय° TG; विवयनालभ्य D. [9] °तिलोका TD; °वाक्यमिति त्रिरोको TG; °वाक्यमिति रोहा G. [10] सिद्धयो TG. [11] मौ° G. [12] राज्जुरास्ति° G. [13] अतिरोहिणीति G; अतिलोका छि° D. [14] तामजमु° G.

[a] Cf. Ait. Br. 8, 17, 2 (and 8, 12, 3). [b] Cf. Ait. Br. 8, 12, 4; 17, 4.

अथैतैरेव देवता उदस्य राज्यशब्दं च "अमुना त्वा छन्दसारोहामि" इति वैराजपञ्चमैरिति गौतमः[1] ॥ १० ॥

एतैः पूर्वोक्तैरेव[2] मन्त्रैर्देवतापदानि त्यक्त्वा राज्यशब्दं च व्युदस्य "अमुना त्वा छन्दसारोहामि" इत्येवंरूपैर्वैराजपञ्चमैरारोहेत्[3]। तद्यथा "गायत्रेण त्वा छन्दसारोहामि। त्रैष्टुभेन त्वा छन्दसारोहामि। जागतेन त्वा छन्दसारोहामि। आनुष्टुभेन त्वा छन्दसारोहामि। वैराजेन त्वा छन्दसारोहामि" इति मन्त्रपञ्चकमिति ॥

चतुर्भिरिति धानंजय्यः ॥ ११ ॥

त्रिभिरिति शाण्डिल्यः ॥ १२ ॥

स्पष्ट इति ॥

आरुह्य जपेत् "स्योनामासदं[4] सुखदामासदं नमस्ते ऽस्तु मा मा हिंसीः" इति ॥ १३ ॥

स्पष्टमिति ॥

तस्मिन्नारोहति कूर्चानारोहेयुः[5] प्रष्टी ब्रह्मा गृहपतिः ॥ १४ ॥

तस्मिन्नुद्गातर्यारोहति सति[6] चतुरः कूर्चानेकैकमारोहेयुः[7] प्रष्टी प्रस्तोतृप्रतिहर्तारौ ब्रह्मा गृहपतिश्चेति ॥

आसन्द्या व्याख्यातं द्रव्यं वाणस्य[8] द्रव्यं वाणस्य[8] ॥ १५ ॥

वाणो नाम वीणाविशेषो ब्राह्मणे[a] विहितः[9]। तस्य[9] प्रकृतिद्रव्यमासन्द्या व्याख्यातं। उदुम्बरो वा यज्ञीयो वा वृक्ष इति[b] ॥

चतुर्थः खण्डः ॥ ४ ॥

दशमः पटलः ॥ १० ॥

छन्दोगसूत्रदीपे ऽस्मिन्धन्विना निर्मिते ऽधुना[10]।
दशमः पटलो वृत्तस्तस्मिन्क्लिष्टमुदीरितम्[11] ॥

[1] ॰मो G. [2] पूर्वैरेव G. [3] ॰राज्यप॰ D. [4] स्यो॰ TG. [5] ॰रोहेद्यु TG. [6] G om. [7] ॰माहरेयुः G. [8] वा॰ MSS. [9] विहितस्य G. [10] G has इति च्छन्दोगसूत्रस्य दीपे धन्विविनिर्मिते. [11] वृत्त अस्मिन् श्लोलिमु॰ G.

[a] Cf. PV. Br. 5, 6, 12. [b] Cf. above Sūtras 1 and 2.

रोहितेनानडुहेनोत्तरलोम्ना[1] चर्मणा पिहितः स्यात् ॥ १ ॥

पूर्वोक्तो वाणश्चर्मणा छादितः स्यात् । वाणमुखस्य बिलं चर्मणा छादयेदित्यर्थः ॥

तस्य[2] दशसु पश्चाच्छिद्रेषु दश दश तन्त्र्यो बद्धाः स्युर्मौञ्ज्यो दार्भ्यो वा ॥ २ ॥

तस्य वाणस्य पश्चाद्भागे मुखादितरस्मिन्प्रान्ते दश च्छिद्राणि कृत्वा प्रत्येकं[3] दश दश तन्तवो बद्धाः स्युः । मौञ्जा[4] वा[5] दर्भमया[6] वेति ॥

त्रिष्विति शाण्डिल्यश्चतुस्त्रिंशन्मध्यमे त्रयस्त्रिंशतावभितः ॥ ३ ॥

त्रीण्येव च्छिद्राणि कृत्वा मध्यमे चतुस्त्रिंशत्तन्तूनितरयोस्त्रयस्त्रिंशताविति । एवं शततन्तुर्वाण[7] इति ॥

पुरस्तादेकैकशस्तांस्त्रेधं[8] विभज्य "भूर्भुवः स्वः"[9] इत्येताभिः पृथगुत्तरोत्तर्येदूहेत् ॥ ४ ॥

एकैकश उदूहेदित्यन्वयः । बन्धनात्प्रागेव तांस्त्रेधं समं[10] विभज्य मध्यमं भागं एकाधिकं कृत्वा प्रतिवर्गं पृथग्व्याहृतिभिः प्रत्येकं तन्तूनुदूहेत्[11] । च्छिद्रेषु तन्तूनासृज्योर्ध्वमुदूह्य बिले बध्नीयादित्यर्थः । उत्तरोत्तरीति कोऽर्थः । बाह्यच्छिद्रे प्रथमं कुर्यान्मध्यमे[12] द्वितीयं ततोऽभ्यन्तरे[13] तृतीयमपवर्गमिति[14] । तेन प्रथमां व्याहृतिमुक्त्वा बाह्ये छिद्रे त्रयस्त्रिंशत्तन्तून्बध्नीयात् । प्रति तन्तुमावर्तयेत्[15] । एकैकश उदूहेदिति वचनात् । एवं मध्यमे छिद्रे द्वितीयया व्याहृत्या । तृतीये छिद्रे तृतीयया व्याहृत्येति । यदा पुनर्दश च्छिद्रेषु दश दश[16] तन्तवः । तदाऽपि त्रेधं विभज्य व्याहृतिभिरुदूहनमिति ॥

[1] लोहि॰ G. [2] G om. [3] G ins. तेषु. [4] ॰ञ्ज्यो G. [5] G om. [6] दर्भ्यमया G.
[7] शत तन्तुवाणा G. [8] ॰स्त्रेध G [9] सुवः G. [10] G om. [11] ततदूहेत् G.
[12] ॰त्प्रथमे G. [13] भ्यहरे G. [14] ॰वर्ग्य॰ D; तृतीयं वर्गमिति G. [15] तन्तुमन्त्रमावर्त्तयेते G.
[16] C and D have दश once only.